- Title – भागवत महापुराण , अष्टम स्कन्ध
- Accession No – Title –
- Accession No –
- Folio No/ Pages – 1 – 59 (59 / 118)
- Lines-
- Size
- Substance Paper –
- Script Devanagari – देवनागरी
- Language – संस्कृत
- Period –
- Beginning – ॐ नमः श्रीपरमहंसास्वादितचरणकमलचिन्-मकरंदाय भक्तजनमानसनिवासाय श्रीरामाय ॥
- End – त्वया कृतैः संप्रश्नैर्मयाविवृतं प्रकाशितं, वस्त्रेण डोरकरूपेण, श्री गोपीजनवल्लभाय नमः। श्रीकृष्णाय नमः
- Colophon-
- Illustrations -
- Source -
- Subject - भागवत पुराण,
- Revisor -
- Author -

1. Remarks- 1-59, पूर्ण

1-51

भागवत महापु०

अष्टमस्कंधः

1

भा० अ० ८

॥श्री॥ ॐ नमः श्रीपरमहंसास्वादितचरणकमलचिन्मकरंदाय भक्तजनमानसनिवासाय श्रीरामाय ॥ अष्टमे च चतुर्विंशत्यध्यायैर्मनु
वर्णनं ॥ तत्सुतेशर्षि[illegible]देवेंद्रमूर्तिभिश्च हरेः सह ॥१॥ प्रतिमन्वंतरं चैवमन्वाद्याः षट् पृथक्पृथक् । प्रवर्त्तयंति सद्धर्मान्यात्लपंत्यु
चरंति च ॥२॥ अतो मन्वंतरस्योक्तः सद्धर्म इति लक्षणं ॥ तत्र तु प्रथमे स्वायंभुवः स्वारोचिषस्तथा ॥ उत्तमस्तामसश्चेति चतुर्मनुनिरूपणं ॥ 2

ये नैव श्रीपमालेन
नरोनतिरयंत्रजेत्

॥ ॐ नमो भगवते श्रीवासुदेवाय ॥ श्रीराजोवाच ॥ स्वायंभुवस्येह गुरो वंशोयं विस्तराच्छ्रुतः ॥ यत्र विश्वसृजां सर्गो मनूनन्या
न्वदस्व नः ॥१॥ यत्र यत्र हरेर्जन्म कर्माणि च महीयसः ॥ गृणंति कवयो ब्रह्मन्तानि नो वद शृण्वतां ॥२॥ यद्यस्मिन्नंतरे ब्रह्म
न्भगवान्विश्वभावनः ॥ कृतवान्कुरुते कर्त्ता ह्यतीतेनागतेद्य वा ॥३॥ ऋषिरुवाच ॥ मनवोस्मिन्व्यतीताः षट् कल्पे स्वा
यंभुवादयः ॥ आद्यस्ते कथितो यत्र देवादीनां च संभवः ॥४॥

स्वायंभुवेंतरे नंतदुरंतगुणवर्णनात् ॥ मुदितः परिपप्रच्छ सर्वमन्वंतरस्थितिं ॥ स्वायंभुवस्येति त्रिभिः ॥ यत्र विश्वसृजां मरीच्यादीनां अष्टमः
मनुकन्यासु पुत्रपौत्रादिसर्गः ॥ महीयसो हरेः ॥ यत्र क्वचित्कुमन्वंपांतरमस्ति तदुपेक्षितमस्माभिः ॥ यस्मिन्नतीते यत्कृतवान्यस्मि १
स्मिन्ननागते यत्कर्त्ता करिष्यति । अद्य वा वर्त्तमाने यत्कुरुते तद्वदेत्यन्वयः ॥ अस्मिन्कल्पे षण्मनवो व्यतीताः ॥४॥ ॥ ॥

भा॰ अ॰ ननु यदि स सर्वं व्याप्नोति तर्हि चक्षुरादिभिः किं न गृह्यत इत्यत आह ॥ यं पश्यन्तं जनाः चक्षुषा न पश्यन्ति च क्षुराद्यविषयत्वात् ॥ नहि प्रमाता
२ रं प्रमाणं विषयीकरोतीति भावः तथा च श्रुतिः चक्षुषश्चक्षुः श्रोत्रस्य श्रोत्रमित्यादि ॥ ननु तर्हि घटनाशे द्रष्टव्यत्तस्य तद्विषयं चाक्षुषं ज्ञा
नमिवेश्वरस्यापि स्वरूपभूतं तद्विषयं ज्ञानं नश्येदित्यत आह ॥ यस्य तु प्रश्नतश्च चक्षुर्हि नेन रिष्यति तु न श्यति ॥ तत्तदाकारेणोत्पन्नायाः वृत्ते
रेव नाशो न स्वरूपस्य ज्ञानस्य न हि सविर्तुः प्रकाशः प्रकाश्य नाशे नश्यतीति भावः ॥ भूतानि निर्यमयोयस्य तं सर्वान्तर्यामिणं ॥ तथापि सुप
र्णं शोभनं पतनं त्वमतंग उपधावत भजध्वं ॥ तत्स्वरूपस्यानित्यत्वमेवोपपादयन्नाह ॥ नयस्येति ॥ अमूनि आद्यन्तादीनि विश्वस्य यस्मा
यं न पश्यति पश्यं तं च चक्षुर्यस्य न रिष्यति ॥ तं भूतनित्यं यं देवं सुपर्णमुपधावत ॥ ८ ॥ न यस्याद्यन्तौ मध्यं च स्वः परो नान्तरं बहिः ॥ वि
श्वस्यामूनि यद्यस्माद्विश्वं च तदृतं महत् ॥ ९ ॥ स विश्वकायः पुरुहूत ईशः सत्यः स्वयंज्योतिरजः पुराणः ॥ धत्तेऽस्य जन्माद्यजयात्म
शक्त्या तां विद्ययोदस्य निरीह आस्ते ॥ १० ॥ अथाग्रे ऋषयः कर्माणीहन्तेऽकर्महेतवे ॥ ईहमानो हि पुरुषः प्रायोऽनीहां प्रपद्यते ॥ ११ ॥
वंतीति विश्वं चयतस्तद्रूपं च अत एव व्याप्तिचारित्वात् ॥ तद्दृतं सत्यं महत्पीदपूर्णं ब्रह्म ॥ ननु विश्वं चेत्तद्रूपं तर्हि तस्य कुतो जन्माद्यभावः स्वप्रकाश
त्वं वा कथं वा जगज्जन्मादिकर्तृत्वे न विकारित्वेन सत्यत्वं पूर्णत्वं वा तत्राह ॥ स ईशः अजः सत्यश्च स्वप्रकाशश्च पुराणश्च निर्विकारः विश्वं
कायो यस्य पुरूणि हूतानि नामानि यस्य ॥ तथाविधोऽपि यः ॥ अस्य विश्वस्य जन्मादिस्वशक्त्या मायया धत्ते तां च नित्यसिद्धया विद्यया उ
दस्य हित्वा निः क्रिय एवास्ते ॥ यस्मादेवमीश्वरः कर्म कृत्वा संन्यस्य निःकर्मास्ते अथास्मादेतोः ऋषयो ह्यग्रे आदौ कर्माणि कु
र्वन्तीति किमर्थं अकर्महेतवे मोक्षार्थं पाठान्तरे कर्मनाशाय हि यस्मात् ॥ ७ ॥

तस्य मनोर्दुहित्रोः कपिलस्य ब्रह्मर्षिभ्यां पुत्रतां प्राप्तः ॥ घोरं दुश्चरं तपस्तप्यमानः समाधावनुभूतमिदं वक्ष्यमाणं निजबोधविलसितवद्विलसित इव उ-
पादिशन्निव अनुवदन्निव वा अष्टभिः श्लोकैरन्वाह ॥ येन चिदात्मना विश्वं चेतयते चेतनं भवति ॥ विश्वं तु यं न चेतयते न चेतनी करोति स्व-
तएव चिद्रूपत्वात् ॥ तत्र हेतुः ॥ अस्मिन् शयाने स्वपिति यो जागर्त्ति साक्षितया वर्त्तते ॥ अहो चित्रं नायं जनस्तं वेद स तु इमं वेद ॥ तस्येश्वरत्वं द-
र्शयं श्लोकस्य पदितमुपदिशति ॥ आत्मना ईश्वरेण आवास्यं व्याप्तं सत्ताचेतन्याभ्यां संव्याप्तं विश्वं सर्वं जगत्यां लोके यत्किंचित् जगद्भूतजातं ॥ आ-

आकूत्यां देवहूत्यां च दुहित्रोस्तस्य वै मनोः ॥ धर्मज्ञानोपदेशार्थं भगवान् पुत्रतां गतः ॥ ४ ॥ कृतं पुरा भगवतः कपिलस्यानुवर्णितं ॥
आख्यास्ये भगवान् यज्ञो यच्चकार कुरूद्वह ॥ ५ ॥ विरक्तः कामभोगेषु शतरूपापतिः ^मनुः^ प्रभुः ॥ विसृज्य राज्यं तपसे सभार्यो वनमा-
विशत् ॥ ६ ॥ सुनंदायां वर्षशतं पदैकेन भुवं स्पृशन् ॥ तप्यमानस्तपो घोरमिदमाह स भारत ॥ श्रीमनुरुवाच ॥ येन चेतयते
विश्वं विश्वं चेतयते न यं ॥ यो जागर्त्ति शयानेऽस्मिन्नायं तं वेद वेद सः ॥ आत्मावास्यमिदं विश्वं यत्किंचिज्जगत्यां जगत् ॥ तेन त्यक्ते-
न भुंजीथा मा गृधः कस्यचिद्धनं ॥ ९ ॥

तः तेनेश्वरेणायत् त्यक्तं दत्तं धनं तेनैव भुंजीथा भोगान् भुंक्ष्व ॥ यद्वा तेन त्यक्तेन ईश्वरार्पितेनैव भुंजीथाः न स्वार्थं कस्यस्वित्
कस्यचिदपि धनं मा गृध्यः मा भिकांक्षीः । यद्वा कस्यस्वित् इति कस्यान्यस्य धनमभिलष यतो धन कां क्षां क्रियते इत्यर्थः ॥ तथा च श्रुतिः ॥
ईशावास्यमित्याद्याश्लोकमेव ॥ ७ ॥ ॥ ॥

भा॰ अ॰ विभोरस्याधारणं चरितमाह अष्टाशीतिसहस्राणीति ॥ सत्यजित इंद्र स्य सखा सम नं तु त्तमस्स तीयो मनुः तस्य भ्राता त्रिशिर्ष ईश्वरः इंद्रः

३

तत्रेंद्रो रोचनस्त्वासीद्देवाश्च तुषितादयः ॥ ऊर्जस्तंभादयः सप्त ऋषयो ब्रह्मवादिनः ॥ १६ ॥ ऋषेस्तु वेदशिरसस्तुषिता नाम पत्न्यभूत ॥ तस्यां जज्ञे ततो देवो विभुरित्यभिविश्रुतः ॥ १७ ॥ अष्टाशीतिसहस्राणि मुनयो ये धृतव्रताः ॥ अन्वशिक्षन्व्रतं तस्य कौमारब्रह्मचारिणः ॥ १८ ॥ तृतीय उत्तमो नाम प्रियव्रतसुतो मनुः ॥ पवनः सृंजयो यज्ञहोत्राद्यास्तत्सुता नृप ॥ १९ ॥ वसिष्ठतनयाः सप्त ऋषयः प्रमदादयः ॥ सत्या वेदश्रुता भद्रा देवा इंद्रस्तु सत्यजित ॥ २० ॥ धर्मस्य सूनृतायां तु भगवान्पुरुषोत्तमः ॥ सत्यसेन इति ख्यातो जातः सत्यव्रतैः सह ॥ २१ ॥ सोऽनृतव्रतदुःशीलानसतो यक्षराक्षसान ॥ भूतद्रुहो भूतगणांश्चावधीत्सत्यजित्सखः ॥ २२ ॥ चतुर्थ उत्तमभ्राता मनुर्नाम्ना च तामसः ॥ पृथुः ख्यातिर्नरः केतुरित्याद्या दश तत्सुताः ॥ २३ ॥ सत्यका हरयो वीरा देवास्त्रिशिख ईश्वरः ॥ ज्योतिर्धामादयः सप्त ऋषयस्तामसेंतरे ॥ २४ ॥ देवा वैधृतयो नाम विधृतेस्तनया नृप ॥ नष्टाः कालेन यैर्वेदा विधृताः स्वेन तेजसा ॥ २५ ॥ तत्रापि जज्ञे भगवान्हरिण्यां हरिमेधसः ॥ हरिरित्याहृतो येन गजेंद्रो मोचितो ग्रहात ॥ श्रीराजोवाच ॥ बादरायण एतत्ते श्रोतुमिच्छामहे वयं ॥ हरिर्यथा गजपतिं ग्राहग्रस्तममूमुचत ॥ तत्कथासु महत्पुण्यं धन्यं स्वस्त्ययनं शुभं ॥ यत्र यत्रोत्तमश्लोको भगवान्गीयते हरिः ॥ २८ ॥ 5

अन्यानपि विशिष्टपराक्रमानदेवानाह देवा वैधृतय इति हरिरित्याहृतः ग्राहग्रस्तममूमुचत मोचयामास ॥ श्रवणे इच्छायां हेतुः तत्कथासु तासु कथास्वेव वा सुमहत्पुण्यं पुण्यमपविशेषणं धन्यमित्यादि ॥ ३ ॥ इत्यष्टमे प्रथमोऽध्यायः ॥ १ ॥ ॥ ३

नन्वीदृग्मानः कर्मभिरवगुंठितः कोशकार इव बध्येतैव तत्राह॥ ईहत इति॥ अतस्तमनुवर्त्तमानमात्मानं येन नावसीदति न विषज्जते तं देवं लोका
नुग्रहाय विश्वसृष्ट्यादिचेष्टाः करोति श्रीरामकृष्णादिवत तद्बृहद्वेदो कर्मनव्याचरति तं धारयेद् ब्रह्मामीत्याह तमिति निजं वर्त्म न राव तारा
नुरूपो मार्गः तं असमस्य कुर्वन्तं स्थितं अतः ईदृशं कर्माचरंतं तथापि जीवेल्लक्षणमप्रमादिनिरहं कुर्वन्तं निराशिषं । अनन्य नोदितमिति चनिर
हंकारत्वे हेतुः बुधं। निराशीष्ट्वे हेतुः पूर्णं अनन्यानियुक्तत्वे हेतुः प्रभुं तथापि कर्मानुष्ठाने हेतुः नृन् स्वाचारे शिक्षयंतं ततः किमर्थं

इहते भगवानीशो न हि तत्र विषज्जते॥ आत्मलाभेन पूर्णार्थो नावसीदंति येनुतं॥११॥ तमीहमानं निरहंकृतं बुधं निराशिषं पूर्णमनन्य
नोदितं॥ नृन् शिक्षयंतं निजवर्त्मसंस्थितं प्रभुं प्रपद्येऽखिलधर्मभावनं॥१२॥ श्रीशुक उवाच॥ इति मंत्रोपनिषदं व्याहरंतं समा
हितं॥ दृष्ट्वासुरा यातुधाना जग्धुमभ्यद्रवन्क्षुधा॥१३॥ तांस्तथावसितान्वीक्ष्य यज्ञः सर्वगतो हरिः॥ यामैः परिवृतो
देवैर्हत्वाशासत्त्रिविष्टपं॥१४॥ स्वारोचिषो द्वितीयस्तु मनुरग्नेः सुतोऽभवत्॥ द्युमत्सुषेणरोचिष्मत्प्रमुखास्तस्य चात्मजाः॥१५॥

तत्राह॥ अखिलान्धर्मान् भावयतीति तथा तं॥ समाहितमपि चैवं तं मंत्रोपनिषदं व्याहरंतं दृष्ट्वासुरा तत्र हि वशाभिवमत्वासु
राया तुधाना अश्व क्षुधानिमित्ते जग्धुं अमुं अभ्यद्रवन्॥ यामैः स्वपुत्रैः त्रिपिष्टपं स्वर्गमपालयत् स्वयमेवेंद्रो भूत्वेत्यर्थः॥ तत्र चातिम
न्वंतरं मन्वादयः षडन्ये भवंति तथा हि सप्तानां आद्ये च ह्यधीति मन्वंतरं मनुर्देवा मनुपुत्राः सुरेश्वराः ऋषयोंऽशावताराश्च हरेः षड्विध
मुच्यते॥ तत्रायं स्वायंभुवो मनुः प्रियव्रतोत्तानपादौ मनुपुत्रौ यामाद्यो देवाः मरीचिप्रमुखाः सप्त ऋषयः यज्ञो हरेरवतारः इंद्रश्च स
एवेत्यर्थः॥ स्वारोचिषमन्वंतरं पंचविधमेव । तच्च तुर्यस्कंधोपक्रमे निरूपितं द्वितीयादिषु त्रिषु मन्वंतरेषु मन्वादिषट्कमाह॥
स्वारोचिषो द्वितीय इति यावद्गजेंद्रमोक्षप्रसंगं॥ ६॥

श्री
४

कैरवखंडकैः सरित्सरोभिर्युतः मणिमयरेणुवालुकायेषु तैः पुलिनैश्च युतः ॥ देवस्त्रीणां मज्जनेन यच्चामोदः तेन सौरभयुक्तान्यंबूनि च
निलाश्च तैर्युत आस्ते ॥ तस्य द्रोण्यां वरुणस्योद्यानमास्ते ॥ गिरि वनादि सर्वं वर्ण्यमिति वक्ष्यति अतो गिरिमुपवर्णयति सर्वतो लंकृतमिति ।
पुनर्गिरिं वर्णयति ॥ मंदारैरिति चतुर्भिः मंदारादिभिर्वृतः इत्यन्वयः ॥ तस्मिन् गिरौ सरश्चास्ते तद्वर्णयति सुविपुलमित्यादिश्लोकैः पंचभिः ॥

सरित्सरोभिरखंडैः पुलिनैर्मणिवालुकैः ॥ देवस्त्रीमज्जनामोदसौरभांभोभिर्निलैर्युतः ॥ ७ ॥ तस्य द्रोण्यां भगवतो वरुणस्य महात्मनः ॥ उद्याने
ऋतुमन्नाम आक्रीडं सुरयोषितां ॥ सर्वतोलंकृतं दिव्यैर्नित्यपुष्पफलद्रुमैः ॥ मंदारैः पारिजातैश्च पाटलाशोकचंपकैः ॥ ९ ॥ चूतैः प्र
यालैः पनसैराम्रैराम्रातकैरपि ॥ क्रमुकैर्नालिकेरैश्च खर्जूरैर्बीजपूरकैः ॥ १० ॥ मधुकैः शालतालैश्च तमालैरसनार्जुनैः ॥ अरिष्टोडुं
वरप्लक्षैर्वटैः किंशुकचंदनैः ॥ ११ ॥ पिचुमंदैः कोविदारैः सरलैः सुरदारुभिः ॥ द्राक्षेक्षुरंभाजंबूभिर्बदर्यक्षाभयामलैः ॥ १२ ॥ बिल्वैः कपि
त्थैर्जंबीरैर्वृतो भल्लातकादिभिः ॥ यस्मिन्कांचनं नं (?) श्वेतहंसे व ते वै दिवाकरः ॥ अपरं राजतं श्वेतहंसे वर्तते च निशाकरः ॥ पांडुरांबुदसंकाशं तु
षारचयसंनिभं ॥ १४ ॥ तत्तीर्थं ब्रह्मसदनं प्रकृष्टं गमुत्तमं ॥ न तत्कृतघ्नाः पश्यंति न नृशंसा न नास्तिकाः ॥ १५ ॥ नातप्ततपसो लो
केयं च पापकृतो जनाः ॥ तस्मिन्सरः सुविपुलं लसत्कांचनपंकजं ॥ १६ ॥ कुमुदोत्पलकल्हारशतपत्रश्रियोर्जितं ॥ मत्तषट्पदनिर्घुष्टं
शकुंतैश्च कलस्वनैः ॥ १७ ॥ हंसकारंडवाकीर्णं चक्राह्वैः सारसैरपि ॥ जलकुक्कुटकोयष्टिदात्यूहकुलकूजितं ॥ १८ ॥ मत्स्यकच्छपसं
चारं चलत्पद्मरजःपयः ॥ कदंबवेतसनलनीपवंजुलकैर्वृतं ॥ १९ ॥ कुंदैः कुरवकाशोकशिरीषैः कुटजेंगुदैः ॥ कुब्जकैः स्वर्णयूथी
भिर्नागपुन्नागजातिभिः ॥ २० ॥ मल्लिकाशतपत्रैश्च माधवीजालकादिभिः ॥ शोभितं तीरजैश्चान्यैर्नित्यर्तुभिरलं द्रुमैः ॥ २१ ॥

लसत्कांचनपंकजान्यस्मिन् ॥ कुमुदादीनां श्रिया ऊर्जितं कलः स्वनो येषां तैः शकुंतैश्च निर्घुष्टं च चक्राह्वैः सारसैरप्याकीर्णं जलकु
कुटादीनां कुलैः कूजितं मत्स्यादीनां कच्छपानां च संचारेण चलत्पद्मानां रजसा युक्तं पयो यस्मिन् तत् ॥ नित्यमृतवः फलपुष्पादिसंपत्ति

॥ ७ ॥ [illegible]

४

तुर्यमन्वंतरे प्रोक्तं गजेंद्रस्य विमोक्षणं ॥ द्वितीयादित्रिभिस्तत्तु विस्तरेणोपवर्ण्यते ॥१॥ द्वितीये तु गजेंद्रस्य गजीभिः क्रीडतो जले । देवा
ग्राहेण ग्रहणं तस्य हरिस्मृतिरुदीर्यते ॥२॥ आसीत्त्रिकूटता वता योजनायुतेन पर्यक्परीतः ॥ त्रिकूटसमाख्यो वा जनमात्रविस्तृतः त्रिभिः शृंगैर्दुग्धोद
अन्यैश्च शृंगैर्निर्झरांभसां निर्घोषैश्च ककुभः सर्वा रोचयन्नास्त इति पूर्वेणैवान्वयः ॥ कथंभूतैः शृंगैः रत्नैर्धातुभिश्च विचित्रितैः नानावि

श्री सूत उवाच ॥ परीक्षितैवं स तु बादरायणिः प्रायोपविष्टेन कथासु चोदितः ॥ उवाच विप्राः प्रतिनंद्य पार्थिवं मुदा मुनीनां सद
सि स्म शृण्वतां ॥ ॥ इति श्रीभागवते महापुराणे ८ स्कंधे चतुर्विंशोऽध्यायः ॥१॥ श्रीशुक उवाच ॥ आसीद्गिरिवरो राजंस्त्रिकू
ट इति विश्रुतः ॥ क्षीरोदेनावृतः श्रीमान्योजनायुतमुच्छ्रितः ॥१॥ तावता विस्तृतः पर्यक्त्रिभिः शृंगैः पयोनिधिं ॥ दिशः खं रोचय
न्नास्ते रौप्यायसहिरण्मयैः ॥२॥ अन्यैश्च ककुभः सर्वा रत्नधातुविचित्रितैः ॥ नानाद्रुमलतागुल्मैर्निर्घोषैर्निर्झरांभसां ॥३॥
स चावनिज्यमानांघ्रिः समंतात्पयऊर्मिभिः ॥ करोति श्यामलां भूमिं हरिन्मरकताश्मभिः ॥४॥ सिद्धचारणगंधर्वविद्याधरमहो
रगैः ॥ किन्नरैरप्सरोभिश्च क्रीडद्भिर्जुष्टकंधरः ॥५॥ यत्र संगीतसन्नादैर्नदद्गुहममर्षया ॥ अभिगर्जंति हरयः श्लाघिनः परशंक
या ॥६॥ नानारण्यपशुव्रातसंकुलद्रोण्यलंकृतः ॥ चित्रद्रुमसुरोद्यानकलकंठविहंगमः ॥७॥

द्रुमलतानां गुल्मायेषु तैः पयस ऊर्मिभिः समंतादवनिज्यमानाः अंघ्रयो मूलानि यस्य हरिद्भिः पालाशवर्णैः किन्नरादीनां संगीत
सन्नादैर्नदंतो गुहा यस्मिन् तद्गदप्रदेशं अभिगर्जयंति हरयः सिंहाः ताः अमर्षया असहनेन नानायेऽरण्यपशवः तेषां व्रातैः संकु
लभिः द्रोणिभिः अलंकृतः आस्ते किंच चित्रा द्रुमा येषु तेषु सुरोद्यानेषु कलकंठा मधुरस्वना विहंगा यस्मिन् ॥ ॥ ॥ ॥

भा० अ०
५

मनउत्साहशक्तिः बलं शारीरं ओजः ऐंद्रियं तेषां ॥ सकलं बलादि विपर्यये विपरीतं अधिकं जलौकसो याहस्य सह तस्येय हा प्राणसंकटमाप
यतो देही ॥ बुद्धिमेवाह ॥ नममिति ॥ अहं च न ग्रमवाभियतः ग्राहरूपेण केवलं विधातुः पाशे नावृतः तथापि तं परं परमेश्वरं परेशां ब्रह्मा
दीनां अयनमाश्रयभूतं शरणं यामि कोसौ यं शरणं यामि तत्राह यः कश्चनेति ॥ अंतकएवोरगस्तस्मात् । तं शरणमीमहि व्रजेम ॥ यद्भ

नियुध्यतोरेवमिभेंद्रनक्रयोर्विकर्षतोरंतरतो बहिर्मिथः ॥ समाः सहस्रं व्यगमन्महीपते सप्राणयोश्चित्रममंसतामराः ॥ २९
ततोगजेंद्रस्य मनोबलौजसां कालेन दीर्घेण महानभूद्व्ययः ॥ विकृष्यमाणस्य जलेवसीदतो विपर्ययोभूत्सकलं जलौकसः ॥ ३० ॥ इ
त्थं गजेंद्रः स यदाप संकटं प्राणस्य देही विवशो यदृच्छया ॥ अपारयन्नात्मविमोक्षणे चिरं दध्याविमां बुद्धिमथाभ्यपद्यत ॥ ३१ ॥ न
मामिमे ज्ञातय आतुरं गजाः कुतः करिण्यः प्रभवंति मोचितुं ॥ ग्राहेण पाशेन विधातुरावृतोप्यहं च तं यामि परं परायणं ॥ ३२ ॥ यः
कश्चनेशो बलिनोंतकोरगात्प्रचंडवेगादभिधावतो भृशं ॥ भीतं प्रपन्नं परिपाति यद्भयान्मृत्युः प्रधावत्यरणं तमीमहि ॥ ३३ ॥
इति श्रीभागवते महापुराणे अष्टमस्कंधे मन्वंतरानुवर्णने गजेंद्रोपाख्याने द्वितीयोध्यायः ॥ २ ॥ श्रीशुक उवाच ॥ एवंव्य
वसितो बुद्ध्या समाधाय मनो हृदि ॥ जजाप परमं जाप्यं प्राग्जन्मन्यनुशिक्षितं ॥ १ ॥

५

यादित्यत्र श्रुतिः ॥ भीषास्माद्वातः पवते भीषोदेति सूर्यः भीषास्मादग्निश्चेंद्रश्च मृत्युर्धावति पंचम इति ॥ इत्यष्टमे द्वितीयोध्यायः ॥ २ ॥
तृतीये तु गजेंद्रेण स्तुतो हरिरूपेयिवान् । समुद्दधार भंग्राहाद्दं देवलशापतः ॥ १ ॥ जाप्यं जप्यं स्तोत्रं प्राग्जन्मनि इंद्रद्युम्नसंज्ञके ॥

१

तत्रैवं सति एकदा ततः गिरिकाननाश्रयो वारणयूथपः करेणुभिश्चरन् तृषार्दितेन यूथेन दैवात् सरोवरस्याभ्यासं समीपम् आगमत् इति पंचमेनान्वयः॥ किं कुर्वन्॥ कीचकवेणुवेत्रवंतं विशालं गुल्मलतादिसंदर्भं वनस्पतींश्च प्ररुजन् चभंजन्। कथंभूतो गजः मत्तत्वात् गंधमात्रा द्रव्यः

तत्रैकदा तद्गिरिकाननाश्रयः करेणुभिर्वारणयूथपश्चरन्॥ सकंटकान् कीचकवेणुवेत्रवद्विशालगुल्मं प्ररुजन्वनस्पतीन्॥२०॥
यद्गंधमात्राद्धरयो गजेंद्रा व्याघ्रादयो व्यालमृगाः सखड्गाः॥ महोरगाश्चापि भयाद्द्रवंति सगौरकृष्णाः शरभाश्चमर्यः॥२१॥ वृकावराहाम
हिषर्क्षशल्या गोपुच्छशालावृकमर्कटाश्च॥ अन्यत्र क्षुद्रा हरिणाः शशादयश्चरंत्यभीता यदनुग्रहेण॥२२॥ स घर्मतप्तः करिभिः क
रेणुभिर्वृतो मदच्युत्कलभैरनुद्रुतः॥ गिरिं गरिम्णा परितः प्रकंपयन्निषेव्यमाणोलिकुलैर्मदाशनैः॥२३॥ सरोनिलं पंकजरेणुरूषि
तं जिघ्रन्विदूरान्मदविह्वलेक्षणः॥ वृतः स्वयूथेन तृषार्दितेन तत्सरोवराभ्याशमथागमद्द्रुतं॥२४॥ विगाह्य तस्मिन्नमृतांबु निर्मलं
हेमारविंदोत्पलरेणुवासितं॥ पपौ निकामं निजपुष्करोद्धृतमात्मानमद्भिः स्नपयन्गतक्लमः॥२५॥ स पुष्करेणोद्धृतशीकरांबुभिर्नि
पाययन्संस्नपयन्यथा गृही॥ घृणी करेणुः कलभांश्च दुर्मदो नाचष्ट कृच्छ्रं कृपणोजमायया॥२६॥ तं तत्र कश्चिन्नृप दैवचोदितो ग्राहो
बलीयांश्चरणे रुषाग्रहीत्॥ यदृच्छयैवं व्यसनं गतो गजो यथाबलं सोतिबलो विचक्रमे॥२७॥ तथातुरं यूथपतिं करेणवो विकृष्यमाणं तर
सा बलीयसा॥ विचुक्रुशुर्दीनधियोपरे गजाः पार्ष्णिग्रहास्तारयितुं न चाशकन्॥२८॥

सिंहा गजेंद्रा यस्य भयात् द्रवंति पलायंति। वृकादयस्तु क्षुद्राः अल्पप्राणिनः अन्यतः तद्दृष्टिपथं त्यक्त्वा चरंति। पुनः कीदृशः घर्मत
प्तः मदच्युतः मदस्रावी। मदमश्नंतीति तथा तैः। निजेन पुष्करेण करायेण उद्धृतं गतक्लमः सन् निकामं पपौ। दीनधियः करेणवः तं केवलं 10

उपकारं करिष्यंति [illegible] विचुक्रुशुः

भा॰अ॰ अतएतद्वदाद्योयस्यस्वरूपंनविदुःअयंजंतुरर्वाचीनः गंतुंज्ञातुंवकंच ॥ दुरत्ययंदुर्गमम्अनुक्रमणंचरितंकथितंवयस्यसमामं
६ अवतुकस्यतदिदंतमेवाविदित्वापिमन्मुमेतीत्यादिस्तुतिरित्याशंक्यततत्ज्ञानोपायंकथयन्नाह, दिदृक्षवइति ॥ अलोकव्रतंब्रह्मच
र्यादि अव्रणंअखिंडं भूतानामात्मभूताःभूतेष्वात्महृदय्यःसंतःसमेगतिरस्तु ॥ दुरत्ययानुक्रमणत्वंरूपंनुयन्नाणमीति नविद्यतइ
स्कं॰ ८ त्यादिनालोकानामप्ययःसंभवोजन्मतयोर्द्वंद्वेकातदर्थंयस्तानिजन्मादीनिस्वीकरोति तस्मैनमइत्युत्तरेणान्वयः ॥ ब्रह्मणेब्रह्म
रूपायअरूपायअनंतशक्तयेउरुरूपायअतआश्चर्याणिकर्माणियस्यतस्मैपरेशायनमः ॥ आत्मप्रदीपायस्वप्रकाशांतरस्या

नयस्येदंवाप्रकाशयः पर्दीकुर्जंतुःपुनःकारीतिगंतुमीर्द्दतुं ॥ यथानटस्याकृतिभिर्विचेष्टितोदुरत्ययानुक्रमणःसमावतु ॥ ६ ॥
दिदृक्षवो यस्य पदं सुमंगलं विमुक्तसंगा मुनयः सुसाधवः ॥ चरंत्यलोकव्रतमव्रणं वने भूतात्मभूताः सुहृदः समेगतिः ॥ ७ ॥ न विद्य
ते यस्य च जन्म कर्म वा न नामरूपे गुणदोष एव वा ॥ तथापि लोकाप्ययसंभवाय यः स्वमायया तान्यनुकालमृच्छति ॥ ८ ॥ तस्मै नमः परे
शाय ब्रह्मणे नंतशक्तये ॥ अरूपायोरुरूपाय नम आश्चर्यकर्मणे ॥ ९ ॥ नम आत्मप्रदीपाय साक्षिणे परमात्मने ॥ नमो गिरां विदू
राय मनसश्चेतसामपि ॥ १० ॥ सत्वेन प्रतिलभ्याय नैःकर्म्येण विपश्चिता ॥ नमः कैवल्यनाथाय निर्वाणसुखसंविदे ॥ ११ ॥ ॥

विषयायकुतःसाक्षिणेप्रकाशकायपरमात्मनेजीवनियंत्रेअतएवगिरांविदूरायअप्राप्यायचेतसांवृत्तीनां तथाचश्रुतिः यतोवा ६
चोनिवर्त्तंतेअप्राप्यमनसासहेति ॥ एवमपिविपश्चितानिर्गुणेनानैःकर्म्येणसंन्यासेनसत्वेनशुद्धेनसंन्यासयोगाद्यतयःशुद्धसत्वाइ
तिश्रुतेः ॥ प्रतिलभ्यायप्रत्यक्केनप्राप्यायनिर्वाणसुखसंविदेमोक्षानंदानुभूतये ॥ ९ ॥

श्री

तस्मै नमो नमनं अभिधीमहि अभिध्यायेम केवलं ग्रहणं तु तत्त्वेन कायप्रमाणेतरशक्यत्वात् । अस्य तत्त्वज्ञानं संभावयितुं विशिनष्टि यत इदं
पात एतद्देहादि चिदात्मकं चेतनं भवति तद्रूपेण चेतयते विद्यामिति तत्र हेतुः पुरुषाय दृष्टुं कारणत्वेन प्रविष्टाय ननु प्रकृतिपुरुषौ
कारणमिति प्रसिद्धं तत्राह ॥ आदिः प्रकृतिः बीजं पुरुषस्तद्रूपाय प्रविष्टत्वोपजीवकत्वपारतंत्र्यं वारयति परेशायेति । परमैश्वर्यं विव
त्वन्नाह यावदध्यायसमाप्ति ॥ यस्मिन्नधिष्ठाने यतो यदुपादानात् येन कर्त्रा यश्च स्वयमेवेदं विश्वं भवति अस्मात् कार्यात् परस्मात् का
रणाच्च यः परः तं ॥ स्वयंभुवं स्वतःसिद्धं प्रपद्ये शरणं व्रजामि ॥ विश्वहेतुत्वं स्वतःसिद्धत्वं चोक्तं ॥ इदानीं विश्वप्रकाशकत्वं स्वप्रकाश

गजेंद्र उवाच ॥ ॐ नमो भगवते तस्मै यत एतच्चिदात्मकं ॥ पुरुषायादिबीजाय परेशायाभिधीमहि ॥२॥ यस्मिन्निदं यतश्चेदं येनेदं
य इदं स्वयं ॥ योस्मात्परस्माच्च परस्तं प्रपद्ये स्वयंभुवं ॥३॥ यः स्वात्मनीदं निजमाययार्पितं क्वचिद्विभातं क्व च तत्तिरोहितं ॥ अवि
द्धदृक् साक्ष्युभयं तदीक्षते स आत्ममूलोवतु मां परात्परः ॥४॥ कालेन पंचत्वमितेषु कृत्स्नशो लोकेषु पालेषु च सर्वहेतुषु ।
तमस्तदासीद्गहनं गभीरं यस्तस्य पारेपि विराजते विभुः ॥५॥

त्वं च वर्णयन् प्रार्थयते ॥ यः स्वात्मनीति विभातं अभिव्यक्तं सत् क्वचित् प्रलये तिरोहितं लीनं सत् तदुभयं कार्यकारणं च साक्षी सा
क्षित्वे हेतुः ॥ अविद्धदृक् अलुप्तदृष्टिः आत्ममूलः स्वप्रकाशः कुतः परात् प्रकाशकात् चक्षुरादेरपि परः । तस्यापि प्रकाशक इ
त्यर्थः ॥ चक्षुषश्चक्षुरित्यादि श्रुतिः ॥ तिरोहितमाह तदन्वेतत्स्वरूपं च पूर्वकं तदुर्ज्ञानत्वं वदन् प्रार्थयते । कालेनेति द्वाभ्यां पंचत्वमि
तेषु नाशं प्राप्तेषु ॥ गहनं दुरवगाहं गभीरमनंतं तस्य तमसः आदित्यवर्णं तमसः परस्तादिति श्रुतेः ॥५॥ ॥

भा०स्क० गुणा एवारणयस्तया छन्नश्चिद्रूष्मा यो हृता नाग्निः तस्मै ॥ तेषां गुणानां क्षोभे कार्ये विस्फूर्जितं बहिर्वृत्तिकं मानसं यस्य सोऽकामयत बहु स्यामि-
ति श्रुतेः ॥ नैःकर्म्यमात्मतत्त्वं तस्य भावेन भावनया विवर्जिता ये आगमा विधिनिषेधलक्षणा ये तेषु स्वयमेव प्रकाशो यस्य तस्मै ॥ मादृक् प्रपन्नो यश्चा-
सौ प्रपन्नः पशुः तस्य पाशोऽविद्या तस्य विशेषेण मोक्षणं येन तस्मै तामाह मुक्तायेति मोचने हेतुः भूरिकरुणाय यस्य अतस्तत्रापि अलयाय
अनलसाय स्वांशेनान्तर्यामिरूपेण सर्वेषां तनुभृतां मनसि प्रतीताय प्रत्यातायात्यप्रत्यक् दृक् तस्मै तथा च श्रुतिः य आत्मनि तिष्ठन्नात्मा 13

गुणारणिच्छन्नचिदूष्मपाय तत्क्षोभविस्फूर्जितमानसाय ॥ नैःकर्म्यभावेन विवर्जितागमस्वयंप्रकाशाय नमस्करोमि ॥ १६ ॥ मादृक्
प्रपन्नपशुपाशविमोक्षणाय मुक्ताय भूरिकरुणाय नमोऽलयाय ॥ स्वांशेन सर्वतनुभृन्मनसि प्रतीतप्रत्यक्दृशे भगवते बृह-
ते नमस्ते ॥ १७ ॥ आत्मात्मजाप्तगृहवित्तजनेषु सक्तैर्दुःप्रापणाय गुणसंगविवर्जिताय ॥ मुक्तात्मभिः स्वहृदये परिभाविताय ज्ञा-
नात्मने भगवते नम ईश्वराय ॥ १८ ॥ यं धर्मकामार्थविमुक्तिकामा भजंत इष्टां गतिमाप्नुवंति ॥ किं त्वाशिषो रात्यपि देहमव्ययं करो-
तु मेऽदभ्रदयो विमोक्षणं ॥ १९ ॥ ॥

नमं तरं यमयतीति भगवते सर्वेषां तनुभृतां नियमनेन समर्थाय तेषां मनसि स्थितत्वेपि बृहते अपरिच्छिन्नाय ॥ अंतःस्थत्वेपि देहादिषु आ- ७
सक्तैर्दुःप्रापणाय प्राप्तुमशक्याय तत्र हेतुः गुणसंगविवर्जिताय अत एव मुक्तात्मभिः देहादिषु नासक्तैर्भिंतिताय तैः परिभावितं स्व-
रूपमाह ॥ ज्ञानात्मने हृत्पादि इष्टां गतिं कामि तं धर्मादिफलं वा प्राप्नुवंत्येव न तु तावदेव किं तु याचित्तैरकामितानन्याप्याशिषो राति देह-
मप्यव्ययं करोति ॥ एवं यः अदभ्रदयः स मे विमोक्षणमेव केवलं करोतु नाधिकं प्रार्थये ॥ ८ ॥ ॥

गुणधर्मिणे। सत्वादिधर्मानुकारिणे। ज्ञानघनाय चेति॥ निर्विशेषत्वेपि साम्या[त्] वैलक्षण्यमुक्तं। साक्षिण इति सर्वाध्यक्षत्वेपि निर्विका
रत्वमुक्तं॥ आत्मनां क्षेत्रज्ञानां मूलाय मूलस्य प्रधानस्यापि प्रकृतये उद्भवहेतवे तत्र हेतुः पुरुषाय पूर्वमेवासते तथा च श्रुतिः
पूर्वमेवाहमिहासमिति॥ तत्पुरुषस्य पुरुषत्वमिति॥ पूर्णायेति वा॥ सर्वेन्द्रियाणां ये गुणाः विषयास्तेषां द्रष्ट्रे॥ सर्वे प्रत्यया इन्द्रियवृत्त
यो हेतवो ज्ञापका यस्य तस्मै तदेवाह असता अहंकारादिरूपेण छायया उक्ताय प्रतिबिंबेन बिंबमिव सूचिताय तत्र हेतुः सद्

७ नमः शांताय घोराय मूढाय गुणधर्मिणे॥ निर्विशेषाय शांताय नमो ज्ञानघनाय च॥ १२॥ क्षेत्रज्ञाय नमस्तुभ्यं सर्वाध्यक्षाय सा 14
क्षिणे॥ पुरुषायात्ममूलाय मूलप्रकृतये नमः॥ १३॥ सर्वेन्द्रियगुणद्रष्ट्रे सर्वप्रत्ययहेतवे॥ असताछाययोक्ताय सदाभासाय ते नमः॥ १४॥
नमो नमस्तेऽखिलकारणाय निःकारणायाद्भुतकारणाय॥ सर्वागमाम्नायमहार्णवाय नमोऽपवर्गाय परायणाय॥ १५॥ ॥

तेषु विषयेषु आभासो यस्य तस्मै तदुक्तं तीर्थेयपाङ्जलस्य आभास इत्यादिना पटांतरे असतां छायया अध्यासेन उक्ताय युक्ता
यतदधिष्ठानत्येत्यर्थः॥ अखिलकारणाय सर्वकारकरूपाय॥ अतएव स्वयं निःकारणाय कारणत्वेपि मृदादिवद्विकारं वारयति
अद्भुतकारणायेति॥ एवंभूतत्वे प्रमाणमाह॥ सर्वे आगमाः पंचरात्रादयः आम्नायाश्च वेदाः तेषां महार्णवाय॥ स्रोतसामिव प
र्यवसानस्थानाय॥ अपवर्गाय मोक्षरूपाय अतः परायणाय उत्तमानामाश्रयाय॥ ३॥ ॥

भा॰ अ॰
८

नचयाह शरीरस्य मोक्षणेनाहं जीवितुमिच्छामि तत्र हेतुः अमुया अंतर्बहिश्चाविवेकव्याप्तया। गजजात्या किं प्रयोजनं आत्म
लोकस्य आत्मप्रकाशस्य यदावरणमज्ञानं तस्यैव तु मोक्षमिच्छामि यस्य मोक्षस्य तु कालेन नाशो नास्ति यद्वा देहबंधो देहनाशे
नश्येदेव किं तन्मोक्षणार्थं नेन। आत्मलोकावरणस्य तु कालेन विप्लवो नास्ति ज्ञानैकनिवर्त्यत्वात् अतस्तस्यैव मोक्षमिच्छामी 15
त्यर्थः॥ सोऽहं मुमुक्षुः विश्वं विश्वरूपं अविश्वं विश्वव्यतिरिक्तं च विश्वं वेदो धनमुपकरणं यस्य तं। विश्वस्यात्मानं च केवलं प्रणतो

जिजीविषे नाहमिहामुया किमंतर्बहिश्चावृतयेभयोन्या (ज्ञात्या) ॥ इच्छामि कालेन न यस्य विप्लवस्तस्यात्मलोकावरणस्य मोक्षं ॥२२॥ सो
हं विश्वसृजं विश्वमविश्वं विश्ववेदसं ॥ विश्वात्मानमजं ब्रह्म प्रणतोस्मि परं पदं ॥२३॥ योगरंधितकर्माणो हृदि योगविभाविते ॥ योगिनो
यं प्रपश्यंति योगेशं तं नतोस्म्यहं ॥२४॥ नमो नमस्तुभ्यमसह्यवेगशक्तित्रयायाखिलधीगुणाय ॥ प्रपन्नपालाय दुरंतशक्तये कदिंद्रिया
णामनवाप्यवर्त्मने ॥२५॥ नायं वेद स्वमात्मानं यच्छक्त्याहंधियाहतं ॥ तं दुरत्ययमाहात्म्यं भगवंतमितोस्म्यहं ॥२६॥

स्मि नतु तं जानामि॥ योगं विना दुर्ज्ञानत्वादित्याह॥ योगेन भगवद्धर्मेण रंधितानि दग्धानि कर्माणि येषां ते यं प्रपश्यंति॥ तर्हि [illegible] सर्वेपि
योगमेव किं नाश्रिताः तत्राह, नम इति द्वाभ्यां॥ असह्यो वेगो रागादिलक्षणो यस्य तथाभूतं शक्तित्रयं यस्य तस्मै वहिश्चाखिल ८
धियां सर्वेंद्रियाणां गुणाय शब्दादिरूपेणोपतायमानाय॥ अतः कदिंद्रियाणां कुत्सितानींद्रियाणि येषां तेषामनवाप्यं वर्त्म यस्य॥
यच्छक्त्या यस्य मायया अहंधीः तयाहृतं आवृतं अयं जनो न वेद दुरत्ययमाहात्म्यं यस्य तं इतः प्राप्तोस्मि॥ ७

एतावदप्यहं भक्तिसुखान्नाभिवृत्ते न वांछामियस्फले कांतभक्ताः नकिंचिदर्थं वांछंति तं परमेश्वरमीडे इत्युत्तरेणान्वयः॥ तेषां
निःकामत्वे हेतुः ये वै भगवतः सर्वज्ञानमुक्तानन्दरूप न्नासेवितवंतः॥ अत्यद्भुतं सुमंगलत्वप्रदर्शनार्थं मङ्गलत्वादिति शेषेण
निपरिपूर्णत्वं प्रदर्शयन्नाह द्वाभिः यस्य फल्ग्व्या स्वल्पया वैकलया अंशेन कृताः सृज्यन्ताभितित्त् तायेनान्वयः॥ कथं कृ
ताः इत्यपेक्षायां दृष्टांतो यथार्चिषोऽग्नेरित्यवादेदृष्टांतः सवितुर्गभस्तय इत्या नंत्येनियंति तत्र संति संयांति लीयंते गुणसंप्र 16

नो
एकांतिको यस्य न कंचनार्थं वांछंति ये वै भगवत्प्रपन्नाः॥ अत्यद्भुतं तच्चरितं सुमंगलं गायंत आनंदसमुद्रमग्नाः॥१८॥ त
मक्षरं ब्रह्म परं परेशमव्यक्तमाध्यात्मिकयोगगम्यं॥ अतींद्रियं सूक्ष्ममतीवदूरमनंतमाद्यं परिपूर्णमीडे॥१९॥ यस्य ब्रह्माद
यो देवा वेदा लोकाश्चराचराः॥ नामरूपविभेदेन फल्ग्व्या च कलया कृताः॥२०॥ यथार्चिषोऽग्नेः सवितुर्गभस्तयो निर्यांति सं
यांत्यसकृत्स्वरोचिषः॥ तथा यतोऽयं गुणसंप्रवाहो बुद्धिर्मनः खानि शरीरसर्गाः॥२१॥ स वै न देवासुरमर्त्यतिर्यङ् न स्त्री न षं घ
ढो न पुमान्न जंतुः॥ नायं गुणः कर्म न सन्न चासन्निषेधशेषो जयतादशेषः॥२२॥

वाहमेवाह॥ बुद्धिर्मनः खानीति करणानि शरीरसर्गाः कार्यदेहाः संप्रवाहाश्च यतो भवंति सः॥ अत एव स सर्वे देवादीनां मध्ये को
पि न भवतीत्याह न जंतुः लिंगत्रयशून्यं प्राणिमात्रमपि॥ किंतु सर्वस्य निषेधे अवधित्वेन शिष्यत इति निषेधशेषः मायांया अशे
षात्मकः स जयतां महिमोत्कर्षेणाविर्भवतु॥ छ॥

भा॰ अ॰ कथंभूतं यशसो धाम आश्रयं । अतः कीर्तन्याः कीर्तनीयाः गुणाः सत्कथा च यस्य तं ॥ स्वं गंधर्वलोकं कुलाचले मलयाचले वाश्रयाय
९ सत्त्वं जीरः रहस्युपासीनं वीक्ष्य क्रुद्धो मे वाह ॥ अकृतात्मा अशिक्षितात्मा बुद्धिर्यस्य गजो यथा स्तब्धमतिस्तथैवायं अतः स एव गजो भवत्विति
शापः ॥ दिष्टं दैवप्रापितं तत् उपधारयन् आलोचयन् कौंजरीं योनिमापन्नः । तर्हि पशुत्वात्कथं स्मृतिर्जाता तत्राह ॥ हर्यर्चनस्यानुभावेनेति ॥

प्रणम्य शिरसाधीशमुत्तमश्लोकमव्ययं ॥ अगायत यशोधामकीर्तन्यगुणसत्कथं ॥ ४ ॥ सोनुकंपित ईशेन परिक्रम्य प्रणम्य तं 17
लोकस्य पश्यतो लोकं स्वमगान्मुक्तकिल्बिषः ॥ ५ ॥ गजेंद्रो भगवत्स्पर्शाद्विमुक्तोऽज्ञानबंधनात् ॥ प्राप्तो भगवतो रूपं पीतवा
साश्चतुर्भुजः ॥ ६ ॥ स वै पूर्वमभूद्राजा पांड्यो द्रविडसत्तमः ॥ इंद्रद्युम्न इति ख्यातो विष्णुव्रतपरायणः ॥ ७ ॥ स एकदाराधनकाल आत्म
वान् गृहीतमौनव्रत ईश्वरं हरिं ॥ जटाधरस्तापस आप्लुतोच्युतं समर्चयामास कुलाचलाश्रमः ॥ ८ ॥ यदृच्छयात्र महायशा
मुनिः समागमच्छिष्यगणैः परिश्रितः ॥ तं वीक्ष्य तूष्णीमकृतार्हणादिकं रहस्युपासीनमृषिश्चुकोप ह ॥ ९ ॥ तस्मा इमं शापमदा
दसाधुरयं दुरात्माकृतबुद्धिरद्य ॥ विप्रावमंता विशतां तमोंधं यथा गजः स्तब्धमतिः स एव ॥ १० ॥ श्रीशुक उवाच ॥ एवं शप्त्वा गतोग
स्त्यो भगवान्नृप सानुगः ॥ इंद्रद्युम्नोपि राजर्षिर्दिष्टं तदुपधारयन् ॥ ११ ॥ आपन्नः कौंजरीं योनिमात्मस्मृतिविनाशिनीं ॥ हर्यर्च
नानुभावेन यद्गजत्वेप्यनुस्मृतिः ॥ १२ ॥ एवं विमोक्ष्य गजयूथपमब्जनाभस्तेनापि पार्षदगतिं गमितेन युक्तः ॥ गंधर्वसिद्धविबु ९
धैरुपगीयमानकर्माद्भुतं स्वभुवनं गरुडासनोगात् ॥ १३ ॥ एतन्महाराज तवेरितो मया कृष्णानुभावो गजराजमोक्षणं ॥ स्वर्ग्यं
यशस्यं कलिकल्मषापहं दुःस्वप्ननाशं कुरुवर्य शृण्वतां ॥ १४ ॥ ॥

अद्भुतं स्वभुवनमगात् ॥ एतन्महाराज मोक्षणं नाम कृष्णानुभावस्तवेरितः कथंभूतं तत्राह स्वर्ग्यमित्यादि दुःस्वप्नं नाशयतीति तथा ॥ ७ ॥

निर्विशेषं

उपवर्णितं मूर्तिभेदं विना परं तत्त्वं येन तं विविधा चासौ लिंगभिदा मूर्तिभेदः तस्यामभिमा नो येषां अत एते यदा नोपजग्मुः तत्र तदा अ-
खिलामरमयः सर्ववेदमयमूर्तिः द्विविजेंद्रैः वेदः सह छंदोमयेनेति श्रीधरी आर्तो ख आशु शीघ्रं उपात्तं चक्रं येन सः पि मंदगतिः
ततः सहसावतीर्य अरिणा चक्रेणावपाटितमुखं ग्राहं उद्धृतवान् इति श्री तृतीयोध्यायः ॥३॥ [तं तु पश्चात्तं ग्राहं हूहूगंधर्वतां]

श्रीशुक उवाच ॥ एवं गजेंद्रमुपवर्णितनिर्विशेषं ब्रह्मादयो विविधलिंगभिदाभिमानाः ॥ नैते यदोपससृपुर्निखिलात्मकत्वात्तत्रा-
खिलामरमयो हरिराविरासीत् ॥२७॥ तं तद्वदार्तमुपलभ्य जगन्निवासः स्तोत्रं निशम्य दिविजैः सह संस्तुवद्भिः ॥ छंदोमयेन गरुडेन
समुह्यमानश्चक्रायुधोभ्यगमदाशु यतो गजेंद्रः ॥२८॥ सोंतःसरस्युरुबलेन गृहीत आर्तो दृष्ट्वा गरुत्मति हरिं ख उपात्तचक्रं ॥ उत्क्षि-
प्य सांबुजकरं गिरमाह कृच्छ्रान्नारायणाखिलगुरो भगवन्नमस्ते ॥२९॥ तं वीक्ष्य पीडितमजः सहसावतीर्य सग्राहमाशु सरसः
कृपयोज्जहार ॥ ग्राहाद्विपाटितमुखादरिणा गजेंद्रं संपश्यतां हरिरमूमुचदुस्रियाणां ॥३०॥ इति श्रीभागवते महापुराणे अष्टम-
स्कंधे तृतीयोध्यायः ॥३॥ श्रीशुक उवाच ॥ तदा देवर्षिगंधर्वा ब्रह्मेशानपुरोगमाः ॥ मुमुचुः कुसुमासारं शंसंतः कर्म तद्धरेः
॥१॥ नेदुर्दुंदुभयो दिव्या गंधर्वा ननृतुर्जगुः ॥ ऋषयश्चारणाः सिद्धास्तुष्टुवुः पुरुषोत्तमं ॥२॥ योसौ ग्राहः स वै सद्यः परमाश्चर्य-
रूपधृक् ॥ मुक्तो देवलशापेन हूहूर्गंधर्वसत्तमः ॥३॥ ॥

॥ चतुर्थे तु तयोर्ग्राहः शापगंधर्वतां पुनः ॥

नाथ ॥ गजं स्वपार्षदं कृत्वा हरिर्निन्ये निजं पदं ॥१॥ हूहूः संज्ञो गंधर्वसत्तमः ॥ असौ देवलस्य शापेन ग्राहो जातः स वै ततः सद्यो मुक्तः सन्नुत्तम-
श्लोकमगायत तत्प्रन्वयः एवं हाति हासो नाम च कथासरसि स्त्रीभिः क्रीडन्नसौ स्नातुं प्रविष्टं देवलं पादेन जले विचकर्ष स कुपितो ग्रा-
होभवेति शशाप तेन च प्रसादितः सन्नुवाच एवमेव गजेंद्रं गृहीत्वा धततश्च गजेंद्रमुद्धरन् हरिस्त्वामपि मोचयिष्यतीति ॥४॥ ॥ 18

भा॰अ॰ याम्‌ तास्वानमस्माभिरध्यायैरनुवर्णिते ॥ स्वभक्तपक्षपातेन यत्र योगाधितं हरेः ॥ १ ॥ पंचमे पंचमं चाथ षष्ठं चकथयन्मनुं ॥ विप्रशाप
१० च्चानिःश्रीकैः कृता देवैर्हरेः स्तुतिः ॥ २ ॥ तामसस्यवतुर्थोमनुस्तस्य सोदरो भ्राता तस्य वैकुंठसंभूतस्य हरेरनुभावः ॥ सनकादिशापेन दैत्यतां

श्री शुक उवाच ॥ राजन्नुदितमेतत्ते कर्माघनाशनं हरेः ॥ गजेंद्रमोक्षणं पुण्यं रैवतं त्वंतरं शृणु ॥ १ ॥ पंचमो रैवतो नाम मनुस्तामससो
दरः बलिविंध्यादयस्तस्य सुता अर्जुनपूर्वकाः ॥ २ ॥ विभुरिंद्रः सुरगणा राजन्भूतरयादयः ॥ हिरण्यरोमा वेदशिरा ऊर्द्ध्वबाह्वादयो द्वि
जाः ॥ पत्नी विकुंठा शुभ्रस्य वैकुंठैः सुरसत्तमैः ॥ तयोः स्वकलया जज्ञे वैकुंठो भगवान्स्वयं ॥ ३ ॥ वैकुंठः कल्पितो येन लोको लोकन
मस्कृतः ॥ रमया प्रार्थ्यमानेन देव्या तत्प्रियकाम्यया ॥ ४ ॥ तस्यानुभावः कथितो गुणाश्च परमोदयाः ॥ भौमान्रेणून्स विममे यो वि
ष्णोर्वर्णयेद्गुणान् ॥ ५ ॥ षष्ठश्च चक्षुषः पुत्रश्चाक्षुषो नाम वै मनुः ॥ पुरुपूरुषसुद्युम्नप्रमुखाश्चाक्षुषात्मजाः ॥ ६ ॥ इंद्रो मंत्रद्रुम
स्तत्र देवा आप्यादयो गणाः ॥ मुनयस्तत्र वै राजन्हविष्मद्वीरकादयः ॥ ७ ॥ तत्रापि देवः संभूत्यां वैराजस्याभवत्सुतः ॥ अजितो नाम भ
गवानंशेन जगतः पतिः ॥ ८ ॥ पयोधिं येन निर्मथ्य सुराणां साधिता सुधा ॥ भ्रममाणोंऽभसि धृतः कूर्मरूपेण मंदरः ॥ ९ ॥ श्री राजो
वाच ॥ यथा भगवता ब्रह्मन्मथितः क्षीरसागरः ॥ यदर्थं वा यतश्चाद्रिं दधारांबुचरात्मना ॥ १० ॥ यथामृतं सुरैः प्राप्तं किं चान्यदभवत्त
जु॰ तः ॥ एतद्भगवतः कर्म वदस्व परमाद्भुतं ॥ ११ ॥ त्वया संकथ्यमानेन महिम्ना सात्वतां पते ॥ नातितृप्यति मे चित्तं सुचिरं तापतापितं ॥ १२ ॥ १०

प्राशाम्यांन्तपार्थितम्यांवारम्तादिक्त्स्येन बुध्यादिललनाः गुणाश्चि चलरयेपतादयः परमोदयाश्चमहर्द्धयः कथितास्तृतीयस्कंधादिषु य
तोऽतो अंबुचरात्मना कूर्मरूपेण सुराणां साधिता सुधेत्युक्तमायुष्मानघापिसृचितं अत इत्यति किंचान्यदिति ॥ ८ ॥

अतः श्रेयस्कामाः एतद्यथावदनुकीर्तयंति अनेन श्रेयो भवतीति कुतो ज्ञातं साक्षाद्भगवद्वचनादेवेत्याह ॥ इदमाहेत्यादियावत्समाप्तिः
प्रसंगाद्गजस्यापि स्मरणे फलमुच्यते ॥ सर्वेषां द्वितीयांतानां स्मरंतीत्यष्टमेनान्वयः ॥ अव्यक्तं मायां अव्ययं धर्मं भक्तिलक्षणं सोमकस्य

यथानुकीर्तयंत्येतच्छ्रेयस्कामा द्विजातयः ॥ शुचयः प्रातरुत्थाय दुःस्वप्नाद्युपशांतये ॥ १४ ॥ इदमाह हरिः प्रीतो गजेंद्रं कुरुसत्तम ॥ शृ-
ण्वतां सर्वभूतानां सर्वभूतमयो विभुः ॥ १५ ॥ श्रीभगवानुवाच ॥ ये मां त्वां च सरश्चेदं गिरिकंदरकाननं ॥ वेत्रकीचकवेणूनां गुल्मानि सु- 20
रपादपान् ॥ १६ ॥ शृंगाणीमानि धिष्ण्यानि ब्रह्मणो मे शिवस्य च ॥ क्षीरोदं मे प्रियं धाम श्वेतद्वीपं च भास्वरं ॥ १७ ॥ श्रीवत्सं कौस्तुभं मालां
गदां कौमोदकीं मम ॥ सुदर्शनं पांचजन्यं सुपर्णं पतगेश्वरं ॥ १८ ॥ शेषं च मत्कलां सूक्ष्मां श्रियं देवीं मदाश्रयां ॥ ब्रह्माणं नारदमृषिं भवं प्र-
ह्लादमेव च ॥ १९ ॥ मत्स्यकूर्मवराहाद्यैरवतारैः कृतानि मे ॥ कर्माण्यनंतपुण्यानि सूर्यं सोमं हुताशनं ॥ २० ॥ प्रणवं सत्यमव्यक्तं गोवि-
प्रान् धर्ममव्ययं ॥ दाक्षायणीर्धर्मपत्नीः सोमकश्यपयोरपि ॥ २१ ॥ गंगां सरस्वतीं नंदां कालिंदीं सितवारणं ॥ ध्रुवं ब्रह्मर्षीन्सप्त पुण्य-
श्लोकांश्च मानवान् ॥ २२ ॥ उत्थायापररात्रांते प्रयताः सुसमाहिताः ॥ स्मरंति मम रूपाणि मुच्यंते ह्येनसोऽखिलात् ॥ २३ ॥ ये मां स्तुवंत्यने-
नांग प्रतिबुध्य निशात्यये ॥ तेषां प्राणात्यये चाहं ददामि विमलां मतिं ॥ २४ ॥ श्रीशुक उवाच ॥ इत्यादिश्य हृषीकेशः प्राध्माय जलजो-
त्तमं ॥ हर्षयन्विबुधानीकमारुरोह खगाधिपं ॥ २५ ॥ इति श्रीभागवते महापुराणेऽष्टमस्कंधे चतुर्थोऽध्यायः ॥ ४ ॥ ॥ ॥ ॥

पयोधेरपि पत्नीर्दाक्षायणीः सितवारणमैरावतं ॥ सुसमाहिताः एकाग्रचित्ताः मम रूपाणि मद्विभूतीः जलजोत्तमं शंखं प्राध्माय वादयित्वा ॥
इत्यष्टमे चतुर्थः ॥ ४ ॥ ॥

भा०अ०
११ स्थितिपालनक्षणः कालः अतः सुरप्रियः स नः स्वानां नः शं शुभं करिष्यति ॥ यत्र धीरा ध्रौ हरेर्वासस्तद्देव तमसः परस्मात् अयवालोका
लोकात्परतोयत्तमसस्ततः परस्मात् जगाम ॥ दैवीभिः लोकेषुप्रसिद्धाभिः वैदिकीभिर्गीर्भिः स्तुतिमकरोत् ॥ देववरं नमामहे । नमामहे देव
वरं त्वां नमामीति वा वरत्वे हेतुः सत्यं कुतः अविक्रियं तत्कुतः अनंतं आद्यं च अनादिं तत्कुतः मनोग्रयानं मनसोपि जविष्ठं मनः प्राप्यस्था
नं ततः प्रागेव विद्यमानत्वात् तथा च श्रुतिः । अनेजदेकं मनसो जवीयो नैनं देवा आप्नुवन्पूर्वमर्षत् । तद्धावतोन्यानत्येति तिष्ठदिति ॥
वचसानिरुक्तं अविषयत्वात् । यद्वाचानभ्युदितं येन वागभ्युद्यत इति श्रुतेः ॥ मनोवचसोरगोचरत्वात् अप्रतर्क्यं यथेष्टं वा सर्वेषां हेतुर्हेतुम २१

अयं तु तस्य स्थितिपालनक्षणः सत्वं जुषाणस्य भवाय देहिनां ॥ तस्माद्व्रजामः शरणं जगद्गुरुं स्वानां स नो धास्यति शं सुरप्रियः ॥२१॥
श्रीशुक उवाच ॥ इत्याभाष्य सुरान्वेधाः सह देवैररिंदम ॥ अजितस्य पदं साक्षाज्जगाम तमसः परं ॥२२॥ तत्रादृष्टस्वरूपाय श्रुत
पूर्वाय वै प्रभो ॥ स्तुतिमब्रूत दैवीभिर्गीर्भिस्त्ववहितेंद्रियः ॥२३॥ श्रीब्रह्मोवाच ॥ अविक्रियं सत्यमनंतमाद्यं गुहाशयं निःकलमप्र
तर्क्यं ॥ मनोग्रयानं वचसानिरुक्तं नमामहे देववरं वरेण्यं ॥२४॥ विपश्चितं प्राणमनोधियात्मनामर्थेंद्रियाभासमनिद्रमव्रणं
छायातपौ यत्र न गृध्रपक्षौ तमक्षरं खं त्रियुगं व्रजामहे ॥२५॥ रम ॥

सद्भावः ॥ किंच प्राणादीनां विपश्चितं ज्ञातारं आत्मा अहंकारो देहो वा न तद्व्यतिरिक्तं ज्ञेयमस्तीत्याह ॥ अर्था विषयाः इंद्रियाणि तत्तया १२
ह्रुकाशीनि तदुभयरूपेणाभास इति तथा तं तथाप्यनिद्रं स्वप्नसुषुप्त्यवस्थारहितं कुतः अव्रणं अदेहं अतएव अक्षरं खमिव व्यापि
नं च सर्वत्र हेतुः यत्र यस्मिन् गृध्रपक्षौ जीवपक्षपातिनौ छायातपौ । अविद्या च तन्निवर्त्तकाविद्या च नास्ति तं त्रिषु युगेषु आविर्भवंतं
शरणं व्रजामः ॥ ॥

नोत्तिष्ठेरन् न न पुनर्जीवंति स्मेत्यर्थः ॥ तत्र दुर्वाससा हि कदाचिन्मार्गे गच्छता भिंद्रं दृष्ट्वा स्वकंठस्था माला तस्मै दत्ता तेन च श्रीमदेनानादृ
त्यैरावतस्य कुंभयोर्निक्षिप्ता स च मत्तः पद्भ्यां तां मालां चूर्णीचकार ॥ ततः कुपितो दुर्वासास्तं शशाप त्रिभिः लोकैः सह निःश्रीको भवेति
तदेतदाह ॥ यदा दुर्वाससः शापे नेति ॥ इज्यादयः यज्ञाद्याः असुरान् अयथापुरा देवैर्वैलक्षण्येन बल पुष्ट्यादियुक्तान्विलोक्येत्यर्थः ॥

सू॰ त उ वा च ॥ संपृष्टो भगवानेवं द्वैपायनसुतो द्विजाः ॥ अभिनंद्य हरेर्वीर्यमभ्याचष्टुं प्रचक्रमे ॥१३॥ श्री शुक उवाच ॥ यदा युद्धे
ऽसुरैर्देवा बाध्यमानाः शितायुधैः ॥ गतासवो निपतिता नोत्तिष्ठेरन् स्म भूयशः ॥१४॥ यदा दुर्वाससः शापात्सेंद्रा लोकास्त्रयो नृप
निःश्रीकाश्चाभवंस्तत्र नेशुरिज्यादयः क्रियाः ॥१५॥ निशाम्यैतत्सुरगणा महेंद्रवरुणादयः ॥ नाध्यगच्छन् स्वयं मंत्रैर्मंत्रयंतो वि
निश्चयं ॥१६॥ ततो ब्रह्मसभां जग्मुर्मेरोर्मूर्द्धनि सर्वशः ॥ सर्वं विज्ञापयां चक्रुः प्रणताः परमेष्ठिने ॥१७॥ स विलोक्येंद्रवाय्वा
दीन् निःसत्वान्विगतप्रभान् ॥ लोकानमंगलप्रायानसुरानयथापुरा ॥१८॥ समाहितेन मनसा संस्मरन् पुरुषं परं ॥ उ
वाचोत्फुल्लवदनो देवान्स भगवान्परः ॥१९॥ अहं भवो यूयमथोऽसुरादयो मनुष्यतिर्यग्द्रुमघर्मजातयः ॥ यस्यावतारांशक
लाविसर्जिता व्रजाम सर्वे शरणं तमव्ययं ॥२०॥ न यस्य वध्यो न च रक्षणीयो नोपेक्षणीयादरणीयपक्षः ॥ अथापि सर्गस्थितिसं
यमार्थं धत्ते रजः सत्वतमांसि काले ॥२१॥

सर्वे
हरिं शरणं गताः संतः यथा स्वं वृंदिस्याम इति हर्षेणोत्फुल्लं विकसितं वदनं यस्य ॥ मनुष्यादयो जरायुजांडजोद्भिज्जस्वेदजाः यस्यावता
रः पुरुषः तस्यांशो ब्रह्मा तस्य कला मरीच्यादयस्ताभिर्विसर्जिताः पुत्रपौत्रादिद्वारा जनिताः ॥ ननु तर्हि सर्वेषां सोऽसमः स्यात्तत्किं तच्छर
णाश्रयेण सत्यं ॥ यद्यप्येवं तथापि सत्त्वपक्षपातीति विध्यतीत्याशयेनाह न यस्येति द्वाभ्यां ॥८॥

भा॰ अ॰ अर्थं न वेदेति पदुक्तं तत्स्वरूपं वयन्नाह ॥ इमे वयं देवाः अप्ययश्च यस्य त्रियया तन्त्वासत्वे नैव सत्या अपि वदिश्वातश्च स तात्त्वकाष्ठा
१२ म्यामाविः प्रकटमपिस्वस्मिं गतिं च निरुपाधिस्वरूपं च न विदुः ॥ इतरप्रधाना रजस्तमोमयाः कुतो विदुः तं न मामेति पूर्वेणान्वयः ॥
॥ इदानीं वैराजरूपेणस्तुवन्प्रार्थयते ॥ पादौ महीति द्वादशभिः ॥ यत्र मत्स्याण्डजरायुजादिभूतसर्गः सा मही यस्य पादौ स नः प्रसीदतु
आत्मतंत्रः पराहिं मत्वेपि न तत्परतंत्रः कुतः ब्रह्मचयच्युतस्तस्य तत्कुतः महती विभूतिरैश्वर्यं यस्य सः ॥ उदारं वीर्यं शक्तिर्यस्य 23

इमे वयं तास्त्रियये वतत्त्वासत्वे न सत्त्वावदिरं तराविः ॥ गतिं न सद्दमाम् अप्ययश्च विमदेकुतोसुराद्या इतरप्रधानाः ॥ २९ ॥ पादौ
महीयं स्वकृतैव यस्य चतुर्विधोय त्रादिभूतसर्गः ॥ स वै महापूरुष आत्मतंत्रः प्रसीदतां ब्रह्म महाविभूतिः ॥ ३० ॥ अंभस्तु यद्रेत उ
दारवीर्यं सिध्यंति जीवंत्युत वर्द्धमानाः ॥ लोकास्त्रयो याखिले लोकपालाः प्रसीदतां ब्रह्म महाविभूतिः ॥ ३१ ॥ सोमं मनो यस्य
समामनंति दिवौकसां वै बलमंध आयुः ॥ ईशो नगानां प्रजनः प्रजानां प्रसीदतां नः समहाविभूतिः ॥ ३२ ॥ अग्निर्मुखं यस्य तु जा
तवेदाः जातः क्रियाकांडनिमित्तजन्मा ॥ अंतःसमुद्रे नुपचन् स्वधातून् प्रसीदतां नः समहाविभूतिः ॥ ३३ ॥

तदंभो यस्य रेतः स नः प्रसीदतु ॥ उदारवीर्यतामाह यतो भसो लोकाद्ययः सिद्ध्यंति जायंते ॥ यः सोमो देवानाम् अंधः अन्नं अत एव १२
बलमायुश्च । नगानां वृक्षाणां प्रकर्षेण जनयति वर्द्धयतीति प्रजनः तं यस्य मनः समामनंति स प्रसीदतु ॥ अग्निर्यस्य तु मुखं जा
तः ॥ कथंभूतः जातवेदो धनं यस्मात् क्रियाकांडं तत्प्रतिपाद्यं कर्म तन्निमित्तं जन्म यस्य ॥ अंतःसमुद्रे उदरमध्ये स्वधातून्
कार्लीनवान्नादीन्प्रसिद्धः समुद्रोपि नाडीरूपेण उदकानेव पचन्नास्ते ॥ व ॥

तदेवमविक्रियत्वादिभिः सर्वज्ञत्वादिभिश्च सतत्त्वं वरेण्यत्वं चोक्तं संसारस्य चक्राधारत्वेनापि तदेव दर्शयन्नाह ॥ अजस्य जीवस्य चक्रं चक्र
वदावर्त्तमानं देहादि अजया मायया प्रेर्यमाणं यत्तत्र यः अध्यक्षो यस्य यदधिष्ठानमाक्रम्य स्थितम् तं सततं प्रपद्ये । कथंभूतं चक्रं मनोमयं मनः प्र
धानं दशेन्द्रियादिपंचप्राणाश्चेति पंचदशारा यस्य ॥ आशुभ्रमणं त्रयो गुणा नाभिरिव मध्ये यस्य विद्युदिव चंचलं ॥ अष्टौ प्रकृतयो
नेमय इव चरणानि यस्य ॥ सर्वजीवनियंतृत्वादिना विशिष्टत्वमाह ॥ यत्र तिष्ठत्यसुपर्णो जीवसमीपे तन्नियंतृत्वेन ॥ आसां चक्रारस्यात्र
स्य ॥ द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते इति श्रुतेः ॥ यद्वा भंजनरन्ध्रां यो गारुडस्योपरि उपविष्ट इत्यर्थः । तदिदं देह 24

अजस्य चक्रं त्वजयेर्यमाणं मनोमयं पंचदशारमस्य ॥ त्रिणाभिविद्युच्चलमष्टनेमि यदक्षमाकृस्तमहं प्रपद्ये ॥ २६ ॥ य एकवर्णं
तमसः परं तल्लोकमव्ययक्रममनंतपारं ॥ आसांचकारोपसुपर्णमेनमुपासते योगरथेन धीराः ॥ २७ ॥ न यस्य कश्चातितितर्त्ति
मायां यया जनो मुह्यति वेद नार्थं ॥ तं निर्जितात्मात्मगुणं परेशं नमाम भूतेषु समं चरंतं ॥ २८ ॥

स्यत्वात् अक्षरप्रमाणादिक्रियाविशिष्टात् जीवसाम्यं स्यात् तत्राह । एकवर्णं त्वनेकस्वरूपं तमसः प्रकृतेः परं अलोकं अदृश्यं अव्ययक्रमं नि
र्वि[illegible]कल्पं अनंतपारं ॥ कालतो देशतश्चापरिच्छिन्नं तत्रैव यः अत्र च्युतस्वरूपत्वात् न जीवसाम्यं । तयोरैक्यः पिप्पलं स्वाद्वत्य
नश्नन्नन्यो अभिचाकशीति विशेषश्रवणादित्यर्थः ॥ अत एवं धीराः योगिनः रथेन प्राप्तिसाधनेनोपासते भजंते तं नमाम इत्युत्तर
णान्वयः ॥ मायानियंतृत्वेनापि जीवसाम्यं परिहरन् वैशिष्ट्यमाह ॥ यस्य मायां कश्चिदपि नातितितर्त्ति नातिक्रामति कथंभूतां जनो
यया मुह्यति ॥ अर्थं आत्मस्वरूपं न तु वेद निर्जित आत्मा आत्मगुणः शक्तिर्माया च तद्गुणाश्रयेण तं ॥ छ ॥

भा०अ० उपरि उत्तरोष्ठात् ॥ नस्तः नासिकातो द्युतिः कांतिः पशव्यः पशूनां हितः कामः स्पर्शेनाभूत् ॥ द्रव्यं भूतानि वयः कालः विशेषं भौतिक
२२ प्रपंचं यद्यस्मात् दुर्विभाव्यं कुतः प्रबुधापबाधं विवेकिदृशो ऽपि समनंतरं प्रबुधानां मायेयमेवं बोधयस्मिन्नित्यर्थः ॥ तदेवं सप्रपंचमुप
वर्ण्य निःप्रपंचमुपवर्णयन् प्रणमति ॥ वृत्तिभिर्दृष्ट्यादिभिः ॥ नभस्वान् वायुः ॥ तस्येव ऊतिर्लीला यस्य तस्मै ॥ तं सस्मितं मुखांबुजं
दिदृक्षूणां नो ऽस्माकं चक्षुरादिकरणगोचरं यथा भवति तथैवं चालानं दर्शय ॥ भक्तेच्छानुवर्तित्वं चतत्ववक्तुं प्रोद्दिष्टमेवेत्याह ॥ तैस्तैरिति ।

लोभो ऽधरात्प्रीतिरुपर्यभूद्द्युतिर्नस्तः पशव्यः स्पर्शेन कामः ॥ भ्रुवोर्यमः पक्ष्मभवस्तु कालः प्रसीदतां नः स महाविभूतिः ॥ ४० ॥ द्र
व्यं वयः कर्म गुणान्विशेषं यद्योगमायाविहितान्वदंति ॥ यद्दुर्विभाव्यं प्रबुधापबाधं प्रसीदतां नः स महाविभूतिः ॥ ४१ ॥ नमो ऽस्तु
तस्मा उपशांतशक्तये स्वाराज्यलाभप्रतिपूरितात्मने ॥ गुणेषु मायारचितेषु वृत्तिभिर्न सज्जमानाय नभस्वदूतये ॥ ४२ ॥
स त्वं नो दर्शयात्मानमस्मत्करणगोचरं ॥ प्रपन्नानां दिदृक्षूणां सस्मितं ते मुखांबुजं ॥ ४३ ॥ तैस्तैः स्वेच्छाभूतै रूपैः काले काले
स्वयं विभो ॥ कर्म दुर्विषहं यन्नो भगवांस्तत्करोति हि ॥ ४४ ॥ क्लेशभूर्यल्पसाराणि कर्माणि विफलानि च ॥ देहिनां विषया १२
र्तानां न तथैवार्पितं त्वयि ॥ ४५ ॥

यन्नो दुर्विषहमशक्यं कर्म तत् ज्ञात्वा स्वयमेव करोति हि ॥ न च वक्तृमुखतोनामिव तज्ज्ञत्वा नामस्माकं त्वय्यर्पितानि पूर्वपुण्या
नि विपरीतफलानि भवितुमर्हंतीत्याह ॥ क्लेशो भूरिर्येषु अल्पः सारः फलं येषु यद्वा विफलानि एवंसकामानां कर्माणि त्वय्य
र्पितं तु नैव तथा ॥ ७ ॥

एषः तरणिर्यस्य चक्षुरासीत् ॥ कथंभूतः देवयानं अर्चिरादिमार्गदेवता त्रयीमयः ॥ सैषा त्रय्येव विद्या तपतीति श्रुतेः । ब्रह्मणो धिष्ण्यं ।
उपासनास्थानं । य एषोन्तरादित्ये हिरण्मयः पुरुष इति श्रुतेः ॥ मुक्तेर्द्वारं देवयानत्वात् । अमृतं च पुण्यफलोकलत्वात् । मृत्युश्च का
लात्मकत्वात् ॥ एवंभूतस्तरणिर्यस्य चक्षुः सः ॥ कथंभूतो वायुः चराचराणां सहआदि धर्मवान् प्राणः यं प्राणं वयं बुध्या ध्यधि

यच्चक्षुरासीत्तरणिर्देवयानं त्रयीमयो ब्रह्मण एष धिष्ण्यं ॥ द्वारं च मुक्तेरमृतं च मृत्युः प्रसीदतां नः स महाविभूतिः ॥ २४ ॥ प्राणा
दभूद्यस्य चराचराणां प्राणः सहो बलमोजश्च वायुः ॥ अन्वास्म सम्राजमिवानुगा वयं प्रसीदतां नः स महाविभूतिः ॥ २५ ॥ श्रोत्रा
द्दिशो यस्य हृदश्च खानि प्रजज्ञिरे खं पुरुषस्य नाभेः ॥ प्राणेंद्रियात्मासुशरीरकेतः प्रसीदतां नः स महाविभूतिः ॥ २६ ॥ बलान्महें
द्रस्त्रिदशाः प्रसादान्मन्योर्गिरीशो धिषणाद्विरिंचः ॥ खेभ्यश्च छंदांस्यृषयो मेढ्रतः कः प्रसीदतां नः स महाविभूतिः ॥ २७ ॥ श्री
र्वक्षसः पितरश्छायया सन् धर्मः स्तनादितरः पृष्ठतोऽभूत् ॥ द्यौर्यस्य शीर्ष्णोऽप्सरसो विहारात् प्रसीदतां नः स महाविभूतिः ॥ २८ ॥ विप्रो
मुखं ब्रह्म च यस्य गुह्यं राजन्य आसीद्भुजयोर्बलं च ॥ ऊर्वोर्विडोजोंघ्रिरवेदशूद्रौ प्रसीदतां नः स महाविभूतिः ॥ २९ ॥

प्रातरो देवाः सम्राजं भृत्या इव अन्वास्म अनुसृत्य स्थिताः ॥ एवंभूतो वायुर्यस्य प्राणादभूत् ॥ खानि देहगतछिद्राणि प्राणः पंच
वृत्तिः इंद्रियाणि च आत्मा मनः असवो नागकूर्मादयः शरीरं च तेषां केतं आश्रयभूतं खं यस्य पुरुषस्य नाभ्याः प्रजज्ञे सः ॥ यस्य
बलान्महेंद्रो जज्ञे छंदांसि ऋषयश्च खेभ्यः कः प्रजापतिः इतरः अधर्मः विट् वैश्यः ऊर्जः नैपुण्यं तस्य वृत्तिः अंघ्रिजावित्यर्थः ॥
अवेदः शूद्रो अवेदो वेदव्यतिरिक्ता शुश्रूषा वृत्तिः तद्वृत्तिमान् शूद्रश्च पाठांतरं सुगमं ॥ छ ॥

महान्तं मणयो यस्मिन् तेन किरीटेन कर्णाभरणे मकरकुंडले ताभ्यां निर्भातौ योः कपोलौ ताभ्यां श्रीः शोभा यस्य तत् मुखाम्बुजं यस्याः कौस्तुभाभरणं कंठे यस्याः लक्ष्मीवक्षसि बिभ्रती ॥ देवदेवरो ब्रह्मा सर्वांगैः रवनिं गतैः साष्टांगप्रणतेः ॥ अनाविर्भूतं भावो यस्य स्वयं नाभूत् आविर्भूत इति त्रिभुवनं ब्रह्मा
नेष्टोति निमित्त्वं विभुत्वे भगवन्नमोः ॥ श्रीमूर्तेः दयमाविर्भावएव नतस्य महादिव जन्मादि तत्वासी इत्याह ॥ नजातो जन्मादयो यस्य
कुतः अगुणाय कुतो निर्वाणसुखस्यार्णवाय ॥ अपारं मोहं सुखस्वरूपायेत्यर्थः ॥ तथापि अणोर् अणीयसे अतिसूक्ष्माय दुर्ज्ञान

महामणि किरीटेन केयूराभ्यां च भूषितां ॥ कर्णाभरणनिर्भातकपोलश्रीमुखाम्बुजां ॥ ६ ॥ कांचीकलापवलयहारनूपुर
शोभितां ॥ कौस्तुभाभरणां लक्ष्मीं बिभ्रतीं वनमालिनीं ॥ ७ ॥ सुदर्शनादिभिः स्वास्त्रैर्मूर्तिमद्भिरुपासितां ॥ तुष्टाव देववरः
सशर्वः पुरुषं परं ॥ ८ ॥ सर्वामरगणैः साकं सर्वांगैरवनिं गतैः ॥ ब्रह्मोवाच ॥ अजातजन्मस्थितिसंयमायागुणाय निर्वाण
सुखार्णवाय ॥ अणोरणिम्नेपरिगण्यधाम्ने महानुभावाय नमो नमस्ते ॥ ९ ॥ रूपं तवैतत्पुरुषर्षभेज्यं श्रेयोर्थिभिर्वैदिकतांत्रि
केण ॥ योगेन धातः सह नस्त्रिलोकान् पश्याम्यमुष्मिन्नु ह विश्वमूर्तौ ॥ १० ॥

याय ॥ वस्तुतस्तु अपरिगण्यं इयत्तातीतं धाम महिमा यस्य तस्मै न चैतदसंभावितं यतः महान् अचिंत्यो नुभावो यस्य ॥ तन्मूर्तिः सनातन
त्वमपरिमेयत्वं चोपपादयति ॥ रूपमिति ॥ हे पुरुषर्षभ हे धातः एतत्तव रूपं वैदिकेन तांत्रिकेन च योगेन उपायेन श्रेयोर्थिभिः स २४
दाइज्यं पूज्यं ॥ अतो नेदमिदानीमपूर्वं जातमिति भावः ॥ ननु पूर्वं देवाः पूज्यत्वेन प्रसिद्धाः सत्यं सर्वेप्यत्रैवान्तर्भूता इत्याह ॥ उअहो
हस्फुटं अमुष्मिंस्त्वयि नोस्मान् त्रैलोक्यं च अहं पश्यामि तत्र हेतुः विश्वं मूर्तौ यस्य तस्मिन् वैतद्रूपं परिच्छिन्नमपि न भवतीति भावः ॥ १० ॥

खा

तत्रैवैफल्यमुपपादयति॥ अयमः अल्पोपि कर्मकल्पः कर्मसमूहोपि ईश्वरार्पितश्चेद्विफलाय न कल्पते हि यस्मात्स एव ईश्वरः पु-
रुषस्यात्मा अत एव दयितो हितश्च न ह्यात्मनि दयिते हिते चार्पितं निःफलं स्यात्॥ अनंतफलत्वमाह॥ यथा हि मूलावसेचनं स्कंधा-
नां शाखानां च भवति॥ एवं सत्यपि त्वदर्पितकर्मणोऽनंतफलत्वज्ञानामस्माकं यन्निमित्तमिदं दुःखमिति तन्मे वक्तव्यमित्याशयेनाह नम इति
दुर्वितर्क्याण्यात्मकर्माणि स्वभावश्चेष्टितानि यस्य तस्मै॥ इत्यष्टमेऽटीकायां पंचमः॥ षष्ठे पुनः स्तुतिर्विस्तृताविर्भूते सुरैः स्तुता।

नायमः कर्मकल्पोपि विफलायेश्वरार्पितः॥ कल्पते पुरुषस्यैव स ह्यात्मा दयितो हितः॥४६॥ यथा हि स्कंधशाखानां तरोर्मूला-
वसेचनं॥ एवमाराधनं विष्णोः सर्वेषामात्मनश्च हि॥४७॥ नमस्तुभ्यमनंताय दुर्वितर्क्यात्मकर्मणे॥ निर्गुणाय गुणेशाय सत्वस्था-
य च सांप्रतं॥४८॥ इति श्रीभागवते महापुराणेऽष्टमस्कंधे अमृतमथने पंचमोऽध्यायः॥५॥ श्रीशुक उवाच॥ एवं स्तुतः सुर-
गणैर्भगवान्हरिरीश्वरः॥ तेषामाविरभूद्राजन्सहस्रार्कोदयद्युतिः॥१॥ तेनैव सहसा सर्वे देवाः प्रतिहतेक्षणाः॥ नापश्यन्-
खं दिशः क्षोणीमात्मानं च कुतो विभुं॥२॥ विरिंचो भगवान्दृष्ट्वा सह शर्वेण तां तनुं॥ स्वच्छां मरकतश्यामां कंजगर्भारुणे-
क्षणां॥३॥ चतुर्भुजां महादेहः केयूरादिविभूषितां॥ शंखचक्रगदापद्मदिव्यमालाविभूषितां॥४॥ तप्तरूपावदातेन लस-
त्कौशेयवाससा॥ प्रसन्नचारुसर्वांगीं सुमुखीं सुंदरभ्रुवं॥५॥

तन्मंत्राश्चासुरैः साकममृतार्थमुद्यमः॥१॥ सहस्रार्काणामुदये द्युतिरिव द्युतिर्यस्य॥ महसा तेजसा॥ प्रतिहतानीक्षणानि च
क्षूंषि येषां॥ तामाविर्भूतां तनुं विरिंचो दृष्ट्वा तुष्टावेति पंचमेनान्वयः॥ कंजगर्भवदरुणे ईक्षणे यस्याः॥ तप्तहेमवत् अवदातेन
पीतेन लसता कौशेयवाससा युक्तां प्रसन्नानि चारूणि सर्वाण्यंगानि यस्याः शोभनं मुखं यस्याः सुंदरे भ्रुवौ यस्याः॥ ठ

भा॰ ग्र॰
९

स्वयमेव किंचित्कुरुतेति चेन्नत्राह अथ्यहामिति ॥ अग्ने: कनको विस्फुलिंगा: इव तेन सौवर्यं रूपं विभाता: आत्मन: शंसेय: किंवा विद्म:
अतस्त्वमेव द्विजानां देवानां च ॥ विधत्स्व इदं कुरुते तु पायमुपदि शेत्यर्थ: ॥ हृदयं मंत्रं उपदेष्टव्य इत्यभिप्रेतं ॥ यथा तथैव वित्ताय ज
गद संवृतानि सर्वाणि करणानि ज्ञियाणि ये: तान् ॥ ईश्वरस्यापि तथैवाभिप्रेतमित्याह ॥ एक एवेश्वर: समर्पोपि ॥ देसुरा: देवा: अन्ये च

अहंगिरि त्रसुसुराद्यो येह त्रादयोग्नीर्नि वकेतवस्ते ॥ किंवा विदामेशापृथग्विभाता विधत्स्व शंनो द्विजदेवमंत्रं ॥ १६ ॥ श्री गु क
रु वा च ॥ एवं विरिंच्यादिभिराउक्त्या ज्ञाय तेषां हृदयं यथैव ॥ जगाद जीमूतगभीरया गिरा बद्धांजलीन् संवृतसर्वकारकान् ॥ ७ ॥
एक एवेश्वरस्तस्मिन् सुरकार्ये सुरेश्वर: ॥ विहर्तुकामस्तानाह समुद्रोन्मथनादिभि: ॥ १८ ॥ श्री भ ग वा नु वा च ॥ हंत ब्रह्मन्न
हो शंभो हे देवा मम भाषितं ॥ श्रृणुतावहिता: सर्वे श्रेयो व: स्याद्यथा सुरा ॥ २० ॥ यात दानवदैतेयैस्तावत्संधिर्विधीयतां ॥ कालेना
नुगृहीतैस्तैर्यावद्वो भव आत्मन: ॥ २१ ॥ अरयोपिहि संधेया: सति कार्यार्थगौरवे ॥ अहिमूषकवद्देवा अर्थस्य पदवीं गतै: ॥ २२ ॥
अमृतोत्पादने यत्न: क्रियतामविलंबितं ॥ यस्य पीतस्य वै जंतुर्मृत्युग्रस्तोमरो भवेत् ॥ २३ ॥ क्षिप्त्वा क्षीरोदधौ सर्वा वीरुत्तृणलता
तौषधी: ॥ मंथानं मंदरं कृत्वा नेत्रं कृत्वा तु वासुकिं ॥ सहायेन मया देवा निर्मथ्यध्वमतंद्रिता: ॥ २४ ॥ ॥

१५

गंधर्वाद्य: आत्मन: यावद्भवो वृद्धिर्भवति ॥ अर्थस्य प्रयोजनस्य पदवीं सिद्धिं प्राप्तै: ॥ तत: पश्चात् अहिमूषकवद्यथा तत्कथा वेन नवर्ति
तव्यमिति शेष: ॥ यथा पेटिकायां निरुद्धो हि सर्पो यथा निर्गमद्वारविधानार्थं प्रपन्नं मूषकं न संधिं विधत्ते पश्चात्तमेव कदाचिद्भक्षय नेत्रं रज्जुं ॥
ति यथा तथार्थमार्गं प्रपन्नै: शत्रुभि: अयं संधेय इत्यर्थ: ॥ ततस्तै: सह किं कार्यं तदाह अमृतोत्पादन इति ॥ यस्याम् तस्य पीतस्य सत: ॥ ७ ॥

विश्वमूर्तिस्त्वमेवाहं त्वयीति ॥ घटस्यमृत्तिकायथा ॥ आदिरंतश्चमध्यंच तथात्वमस्यजगतः तत्रहेतुः परस्मात्प्रधानादपिपरः ॥ मृत्ति
कादृष्टांतेनपरिणामशंकांवारयति त्वमिति ॥ स्वयास्वाधीनया ॥ अतएवगुणेनांव्यवायेपि ॥ गुणमयेप्यगुणमेवत्वांयुक्ताः पश्यंतिमनीषिणोवि
वेकिनः विपश्चितः शास्त्रज्ञाः एतदेवदृष्टांतमाह ॥ यथाग्निंकाष्ठमथनेन अमृतंगव्यंगोषु दोहनादिना भुविअन्नं बीजादिकर्ष
णादिना अंबुउद्यमनेखननेन ॥ उद्यमनेपुरुषकारे वाणिज्यादिनावृत्तिंजीविकांच ॥ यद्वाअंबुउद्यमनेघटीयंत्रादिनोद्धरणेयोगै

त्वय्यग्रआसीत्त्वयिमध्यआसीत्त्वय्यंतरासीदिदमात्मतंत्रे ॥ त्वामादिरंतोजगतोस्यमध्यंघटस्यमृत्स्नेवपरः परस्मात् ॥ ११ ॥ त्वं
मायायात्माश्रययास्वयेदं निर्मायविश्वंतदनुप्रविष्टः ॥ पश्यंतियुक्तामनसामनीषिणोगुणव्यवायेप्यगुणंविपश्चितः ॥ १२ ॥ यथा
ग्निमेधस्यमृतंचगोषुभुव्यन्नमंबूद्यमनेचवृत्तिं ॥ योगैर्मनुष्याअधियंतिहित्वांगुणेषुबुद्ध्याकवयोवदंति ॥ १३ ॥ तंत्वावयंना
थसमुज्जिहानंसरोजनाभातिचिरेप्सितार्थं ॥ दृष्ट्वागतानिर्वृतिमद्यसर्वेगजादवार्त्ताइवगांगमंभः ॥ १४ ॥ सत्वंविधत्स्वा
खिललोकपालावयंयदर्थास्तवपादमूलं ॥ समागतास्तेबहिरंतरात्मनकिंवान्यविज्ञाप्यमशेषसाक्षिणः ॥ १५ ॥

हृत्पायैर्मनुष्याअधियंतिप्राप्नुवंतिवदंतिच ॥ तथाकवयस्त्वांप्रपंचबुध्यागुणेष्वधियंतिवदंतिच ॥ हेनाथसरोजनाभअतिचि
रमीप्सितमर्थं योगैकप्राप्यंत्वांसम्यगुज्जिहानंआविर्भवंतंप्रत्यक्षतोदृष्ट्वावयंनिर्वृतिंगताः ॥ दावाग्निपीडिताः ॥ यद्वायंतत्कथ
मुतेति चेत् तत्राह ॥ हेअंतरात्मन् अशेषसाक्षिणस्तेबहिः किंवान्यद्विज्ञाप्यमस्ति ॥ ७ ॥

30

भा॰अ॰ ९६ विसर्जितः प्रस्थापितः सुपर्णेन तत्र स्थिते वासुकेरागमनायोग्यादिति भावः ॥ इति षष्ठः ॥ ॥ सप्तमे मथनोद्भूतविषभीत्याखिलेश्वरी
नेः स्तुतः स्वनं रूपमारूढः पपौ विषमितीर्यते ॥२॥ फलभागेनेत्यत्र फलभागो भविष्यतीति सम्मान्य वासुकिं नेत्रं गिरौ परिवी

तं स्तथा भग्नमनसो भग्नबाहूरुकंधरान् ॥ विज्ञाय भगवांस्तत्र बभूव गरुडध्वजः ॥३७॥ गिरिपातविनिःपिष्टान्विलोक्यामरदानवान् ॥
ईक्षया जीवयामास निर्जरान्निर्व्रणान्यथा ॥३८॥ गिरिं चारोप्य गरुडे हस्तेनैकेन लीलया ॥ आरुह्य प्रययावब्धिं सुरासुरगणैर्वृतः ॥ अ
वरोप्य गिरिं स्कंधात्सुपर्णः पततांवरः ॥ ययौ जलांत उत्सृज्य हरिणा स विसर्जितः ॥४०॥ इति श्री भा ग व ते म हा पु रा णे ८ म स्कं धे
अमृतमथने मंदरानयने षष्ठोध्यायः ॥६॥ श्री शुक उवाच ॥ ते नागराजमामंत्र्य फलभागेन वासुकिं ॥ परिवीय गिरौ तस्मिन्नेत्रम
ब्धिं मुदान्विताः ॥१॥ आरेभिरे सुरा यत्ता अमृतार्थे कुरूद्वह ॥ हरिः पुरस्ताज्जगृहे पूर्वं देवास्ततोभवन् ॥ तन्नैच्छन्दैत्यपतयो महापुरुष
चेष्टितं ॥२॥ न गृह्णीमो वयं पुच्छमहेरंगममंगलं ॥ स्वाध्यायश्रुतसंपन्नाः प्रख्याता जन्मकर्मभिः ॥ इति तूष्णीं स्थितान्दैत्यान्विलोक्य
पुरुषोत्तमः ॥४॥ स्मयमानो विसृज्याग्रं पुच्छं जग्राह सामरः ॥ कृतस्थानविभागास्त एवं कश्यपनंदनाः ॥५॥ ममंथुः परमं यत्ता अमृ
तार्थं पयोनिधिं ॥ मथ्यमानेर्णवे सोद्रिरनाधारो ह्यपोविशत् ॥ ध्रियमाणोपि बलिभिर्गौरवात्पांडुनंदन ॥ तेसुनिर्विण्णमनसः परिम्लान
मुखश्रियः ॥ आसन्स्वपौरुषे नष्टे दैवेनातिबलीयसा ॥७॥ ९६

यसं वेष्टय ॥ अब्धिं मथितुमारेभिरे ॥ वासुकेर्मुखं तीव्रं दैत्या न ग्राहयितुमेव पूर्वं हरिः पुरस्तात् मुखं जगृहे ॥ ततोभ[illegible]व न मुखं जगृहुः ॥
कृतो धारणे स्थानविभागो यैः दैवेन हेतुना स्वपौरुषे नष्टे सति ॥ ७ ॥

31

ननु तर्हि तेष्व मृ. तपा नेनामृ तां स्युस्तत्राह क्लेशभाज इति बलिभिः सह कार्येभिः साध्या अर्था सत्तदनुसरणं विना न सिध्यंतीति कलावा मादिकमुपदिशतियूयमिति द्वाभ्यां हे सुराः संरंभेण संभ्रमेण सांत्वया साम मार्गेणयथा सिध्यंति । वस्तुषु मथनाद्युत्पन्नेषु सुरादिषु ॥ बलि

क्लेशभाजो भविष्यंति दैत्या यूयं फलग्रहाः ॥ यूयं तदनुमोदध्वं यदिछंत्यसुराः सुराः ॥ २५ ॥ न संरंभेण सिध्यंति सर्वार्थाः सांत्वया यथा ।
न भेतव्यं कालकूटाद्विषाज्जलधिसंभवात् ॥ २६ ॥ लोभः कार्यो न वो जातु रोषः कामस्तु वस्तुषु ॥ श्री शु क उ वा च ॥ इति देवान्समादिश्य
भगवान्पुरुषोत्तमः ॥ तेषामंतर्दधे राजन्स्वछंदगतिरीश्वरः ॥ अथ तस्मै भगवते नमस्कृत्य पितामहः ॥ २७ ॥ भवश्च जग्मतुः स्वं स्वं धा
मोपेयुर्बलिं सुराः ॥ दृष्ट्वारीनप्यसंयत्तान्जातक्षोभान्स्वनायकान् ॥ न्यषेधद्दैत्यराट् श्लोक्यः संधिविग्रहकालवित् ॥ ते वैरोचनिमा
सीनं गुप्तं चासुरयूथपैः ॥ ३० ॥ श्रिया परमया जुष्टं जिताशेषमुपागमन् ॥ महेंद्रः श्लक्ष्णया वाचा सांत्वयित्वा महामतिः ॥ अभ्य
भाषत तत्सर्वं शिक्षितं पुरुषोत्तमात् ॥ ३१ ॥ तदरोचत दैत्यस्य तत्रान्ये ये सुराधिपाः ॥ शंबरोरिष्टनेमिश्च ये च त्रिपुरवासिनः ॥ ३३ ॥ त
तो देवासुराः कृत्वा संविदं कृतसौहृदाः ॥ उद्यमं परमं चक्रुरमृतार्थे परंतप ॥ ३४ ॥ ततस्ते मंदरगिरिमोजसोत्पाट्य दुर्मदाः ॥ नदंत उ
दधिं निन्युः शक्ताः परिघबाहवः ॥ ३५ ॥ दूरभारोद्वहश्रांताः शक्रवैरोचनादयः ॥ अपारयंतस्तं वोढुं विवशा विजहुः पथि ॥ निपतन्स
गिरिस्तत्र बहूनमरदानवान् ॥ चूर्णयामास महता भारेण कनकाचलः ॥ ३६ ॥ ॥

मुपेयुः उपजग्मुः असंयत्तानपि दृष्ट्वा श्लोक्यः कीर्त्यर्हः वैरोचनिं बलिं जितमशेषं त्रैलोक्यं येन तं तत्सर्वं अमृतोन्मथनादि ॥ तत्रान्ये अन्ये
वासुराधिपाः पौलोमकालेयादयः शंबरादयश्च तेष्वप्यरोचत ॥ संविदं समयं ॥ परिघा इव बाहवो येषाम् ॥ ॥

32

भा॰ग्र॰
१७

धृतोऽद्रिर्येन स धृताद्रिः भगवान्परमपुरुषोऽनंतरमशोभतेत्यन्वयः कथंभूतः कनकपरिधिः पीतवासाः कर्णविद्योतमाना
विद्युत्कुंडललक्षणा यस्य स तथा॥ मूर्ध्नि भ्राजंतो विलुलिताः कचा यस्य स तथा॥ जैत्रैर्जित्नुभिः दंदशूकं सर्पं। प्रतिगिरिः प्रतिद्वंद्वी
पर्वतः॥ हालाहलत्वभिख्या का नाम यस्य सः भ्रांता मीना उन्मत्ता मकरादयश्च यस्मिन्॥ मत्स्यादिभिराकुलाच्च। तद्विषं अप्रति अप्रति 33

मथ्यमानेन तथा सिंधोर्देवासुरवरूथपैः॥ यदा सुधा न जायेत निर्ममंथाजितः स्वयं॥१७॥ मेघश्यामः कनकपरिधिः कर्णविद्यो
तविद्युन्मूर्ध्नि भ्राजद्विलुलितकचः स्रग्धरो रक्तनेत्रः॥ जैत्रैर्दोर्भिर्जगदभयदैर्दंदशूकं गृहीत्वा मथ्नन्मथ्ना प्रतिगिरिरिवाशोभ
अप्रति तथो धृताद्रिः॥१८॥ निर्मथ्यमानादुदधेरभूद्विषं महोल्बणं हालाहलाह्वमग्रतः॥ संभ्रांतमीनोन्मकराहिकच्छपात्तिमिद्वि
पग्राहतिमिंगिलाकुलात्॥१९॥ तदुग्रवेगं दिशि दिश्युपर्यधो विसर्पदुत्सर्पदसह्यमप्रति॥ भीताः प्रजा दुद्रुवुरंग सेश्वरा
अरक्ष्यमाणाः शरणं सदाशिवं॥२०॥ विलोक्य तं देववरं त्रिलोक्या भवाय देव्याभिमतं मुनीनां॥ आसीनमद्रावपवर्गहेतो
स्तपो जुषाणं स्तुतिभिः प्रणेमुः॥२१॥

५

मं अप्रतिक्रियामिति वा कृतः॥ उग्रो वेगो यस्य॥ तदेवाह दिशि दिशि इति यद्वा उग्रा वेगा रोमांचस्वेदादयो यस्मात्॥ अत एव सर्वे विलोक्य
भीताः अन्येन केनाप्यरक्ष्यमाणाः सदाशिवं शरणं दुद्रुवुः जग्मुः॥ त्रिलोक्या उद्भवाय देव्या सह अद्रौ कैलासे आसीनं॥ तथापि
मुनीनामभिमतं॥ तेषामेवापवर्गाय तपो जुषाणं॥ क॥

देवेनदेवाकारेणत्वष्ट्रा २ बोध

विघ्नेशस्य विधिं ते नरचितं विघ्नं अवितथः सत्योभिसंधिः संकल्पो यस्य ॥ लत्वयोज्ज नवृत्तारोविलासस्याप्तानितत्याते नपृष्ठे नंतस्यगिरे
रावर्त्तनेभ्रमणं ॥ अंगकं रूय नमेने ॥ आसुरेणअसुराकारेणाविशत ॥ आत्मानिदेवरेतमध्येगोत्रेणदीरूपेणनेत्रेणबोधरूपेणपरेणद
रेण लोभितनकाणं चक्रे समूहोयस्मिन् ॥ दशास्यमुखानिचश्वासा श्वकोद्रस्य फणाहस्तं अपरिमिताः कठोराहूरगादयः तेभ्योनिर्गता 34

विलोक्य विघ्नेशा विधिं तदेश्वरो दूरं तवाय्यो वितथाभिसंधिः ॥ कृत्वा वपुः का कपमद्भुतं महत् जविपयतोयं गिरिमुद्दधार ॥ ९ ॥ तमुत्थितं वी
क्ष्य कुलाचलं पुनः समुत्थिताः निर्मथितुं सुरासुराः ॥ स्थाप्य पृष्ठे न सलत्वयोज्ज नवृत्ता दिगम्बीपद्मवपरो मकान ॥ १० ॥ सुरासुरैर्दैर्भुज
वीर्यवदपि तं पर्यभ्रमं तं गिरिमंगपृष्ठतः ॥ विघ्नराजावर्त्तनमादिकच्छपेन नेन कंरूयनमन्यमेय ॥ ११ ॥ तथासुराणां विषादासुरेणरूपेण
तेषां बलवीर्यमीरयन् ॥ उद्दीपयन् देवगणांश्च विघ्नराडेवेन नागेन्द्रमबोधरूपः ॥ १२ ॥ उपर्यगेंद्रगिरिराडिवान्यश्चाक्रम्य हस्तेन सह
स्रबाहुः ॥ तस्थौ दिवि वह्निमेवं ससुखेषरभिश्च वह्निः सुमनोभिरवृष्टः ॥ १३ ॥ अपर्यधश्चात्मानि नेत्रगोत्रयोः परेण तेषां विशता समेधिताः
ममंथुरब्धिं तरसा महोत्कटामकाजिणलोभितनक्रचक्रं ॥ १४ ॥ अंशदसाहस्वककठोरदृग्मुखश्वासाग्निधूमाद तवचसो सुराः ॥ पौलोमा
कालेयबलील्वलादयो दवाग्निदग्धा सरलाइवाभवन् ॥ १५ ॥ देवांश्च तच्छ्वासशिखाद्दतञ्चान धूम्रांबरस्तेग्वरकं चुकाननात ॥ समम्य
वर्षन्मघवद्दशाघनावबुः समुद्रोर्मिमुपगूढवायवः ॥ १६ ॥

भ्रमणे नधूमात्मामाद् तांव्यचेयिषांते ॥ शरलाद्रुमविशेषाः देवांस्तु भगवद्दशाघनाः समभ्यवर्षन् ॥ समुद्रोर्मिभिरूपगूढावायवश्चशीत
ला वांतिस्म ॥ कथंभूतान् तस्याहं ईश्वरस्य श्वासशिखाद्दिग्धाहिता अनायेषां धूम्राणं अंबराणि येषां ॥ ८ ॥ ॥

भा॰अ॰ परंचअवरंचयेआम्नायेनोजीवास्तेषामाश्रयस्तवात्माहंकारः॥ त्रयीमयात्मन्वेदत्रयमूर्त्ते॥ पंचोपनिषदः तत्पुरुषाघोरसद्योजातवामदे
२८ वेशानुरूपाःमंत्रायैर्मुखैरष्टोत्तरत्रिंशन्मंत्राणांवर्गः॥ तेषामेवमंत्राणांपदच्छेदेनाष्टोत्तरत्रिंशत्कलात्मकामंत्राइत्यर्थः॥ अवस्थितिः उपरताव
स्था॥ अधर्मस्योर्मिषुदंभलोभादिषुयेरूर्मिभिर्विसर्गः प्रतिसर्गः संहारः यद्वायैःसत्वादिभिर्विविधःसर्गः॥ तानिनेत्रत्रयं॥ छंदोवेदछंदो
मयोऋषिर्वेदः॥ सर्वतवेक्षा ईक्षणंसांख्यात्मनुरितिपाठेमनुर्वेदः॥ तमेवाह॥ हेगिरित्रतेपरंज्योतिरखिलानांलोकपालादीनांगम्यंनभवती।

नाभिर्नभस्तेश्वसनंनभस्वान्सूर्यस्तुचचक्षूंषिजलंस्मरेतः॥ परावरात्माश्रयणंतवात्मासोमोमनोद्यौर्भगवन्शिरस्ते॥२८॥ कुक्षिः
समुद्रागिरयोस्थिसंघारोमाणिसर्वौषधिवीरुधस्ते॥ छंदांसिसाक्षात्तवसप्तधातवस्त्रयीमयात्मन्हृदयंसर्वधर्मः॥२९॥ मुखानिपंचो
१ निषदस्तवेशयैस्त्रिंशदष्टोत्तरमंत्रवर्गः॥ यत्तच्छिवाख्यंपरमार्थतत्वंदेवस्वयंज्योतिरवस्थितिस्ते॥३०॥ छायात्वधर्मोर्मिषुयै
र्विसर्गोनेत्रत्रयंसत्वरजस्तमांसि॥ सांख्यात्मनःशास्त्रकृतस्तवेक्षाछंदोमयोदेवऋषिःपुराणः॥३१॥ नतेगिरित्राखिललोकपा
लविरिंचवैकुंठसुरेंद्रगम्यं॥ ज्योतिःपरंयत्ररजस्तमश्चसत्वंनयद्ब्रह्मनिरस्तभेदं॥३२॥ कामाध्वरत्रिपुरकालगराद्यनेकभूत
द्रुहःक्षपयतःस्तुतयेन [illegible] तत्ते॥ यस्त्वंतकालइदमात्मकृतंस्वनेत्रवह्निस्फुलिंगशिखयाभसितंनवेद॥३३॥

कुतः यत्ररजआदिनास्तिकिंतज्ज्योतिः यन्निरस्तभेदंब्रह्म॥ कामश्चअध्वरश्चत्रयः त्रिपुरादयश्चयेअनेकभूतद्रुहस्तान्क्षपयतःसंहरतस्तेतत्क
र्मस्तुतयेनभवति॥ अत्यल्पमेतदित्यर्थः॥ गरभक्षणस्याप्यवरूपंनाविलेनासिद्धवन्निर्दिशति॥ स्तुतयेनभवतीत्यत्रहेतुः॥ यस्तुभवान्स्वनेत्रव २८
ह्निविस्फुलिंगस्यशिखयाइदंजगत्भासितंभस्मसात्कृतंतंनवेदनालोचयत्यपि॥छ॥

निर्गुणं सगुणं चैव विधिवं हरिपराक्रमैः । स्तुवंतस्तु प्रजेशानां नानामन्यंतांतरं तयोः ।। २ ।। नन्वेवंभूतो विष्णुरिति प्रसिद्धं तत्राहुः गुणमय्येति । अस्य
जगतो यदा सर्गादीन् धत्से तदा हे भूमन्न स्वदृक् स्वतःसिद्धज्ञानस्त्वं ब्रह्मादिसंज्ञां धत्से ।। तत्र हेतुः त्वं ब्रह्मेति । सदसतो भावान् देवतिर्यगादिरूपान्
भावयतीति तथा ।। सृज्यं तु त्वद्व्यतिरिक्तं नास्तीत्याहुः ।। आत्मैव त्वं नानाशक्तिभिस्तद्रूपेणाभातः । यस्मादीश्वरः स्वतःसिद्धज्ञानत्वमुपपादयं
तो जगदात्मनाभानं चकारस्माहुः [redacted] त्वं शब्दस्य वेदस्य योनिः अतः स्वतःसिद्धज्ञानः त्वं जगदादिर्महत्तत्त्वं त्वं आत्मा च अहंकारः कथंभूतः 36

प्रजापतय ऊचुः ।। देवदेव महादेव भूतात्मन् भूतभावन ।। त्राहि नः शरणापन्नान् त्रैलोक्यदहनाद्विषात् ।। २३ ।। त्वमेकः सर्वजग
त ईश्वरो बंधमोक्षयोः ।। तं त्वामर्चंति कुशलाः प्रपन्नार्तिहरं गुरुं ।। २४ ।। गुणमय्या स्वशक्त्यास्य सर्गस्थित्यप्ययान्विभो ।। धत्से यदा स्व
दृक् भूमन् ब्रह्मविष्णुशिवाभिधां ।। २५ ।। त्वं ब्रह्म परमं गुह्यं सदसद्भावभावनः ।। नानाशक्तिभिराभातस्त्वमात्मा जगदीश्वरः ।। २६ ।।
त्वं शब्दयोनिर्जगदादिरात्मा प्राणेंद्रियद्रव्यगुणः स्वभावः ।। कालः क्रतुः सत्यमृतं च धर्मः त्वय्यक्षरं यत्त्रिवृदामनंति ।। २७ ।। अग्निर्मुखं
तेऽखिलदेवतात्मा क्षितिं विदुर्लोकभवांघ्रिपंकजं ।। कालं गतिं तेऽखिलदेवतात्मनो दिशश्च कर्णौ रसनं जलेशं ।। २८ ।।

प्राणेंद्रियद्रव्याणां कारणभूताः गुणा यस्य राजसादिः त्रिविध इत्यर्थः ।। स्वभावादयश्च त्वमेव च क्रतुः संकल्पः सत्यमृतं चेति योऽयं धर्मः सत्त्वं मह
दादिरूपत्वे हेतुः । त्रिवृत् त्रिगुणात्मकं यदक्षरं प्रधानं त्वयि तदाश्रयं तदामनंति ।। यद्वा एवंभूते त्वयि त्रिवृदक्षरं प्रणवं प्रकाशकमाहुरित्यर्थः ।।
अखिलदेवतात्मा । अग्निः सर्वा देवता इति श्रुतेः । सोऽग्निस्ते मुखं हे लोकभव द्वितीयांते षु विदुरित्यस्य संबंधः ।। छ ।। ।।

भा॰ अ॰

१९

रूपयतः रूपां कुर्वतः पुंसः॥ मेमन्ते स्वस्ति शोभनास्मन्नासुखेन जीवितमस्त्विलर्थः॥ जग्धुं अत्तुं॥ करतलीकृत्य करतलपरिमितमात्रं कृत्वा॥ जल कल्मषो जलदोषो विषं॥ यस्मात् गले नीलं चकार साधोः रूपालोः॥ प्रस्कन्नं गलितं॥ अपरे ये विषजाः तेपि जगृहुः अनेन विषस्य तीव्रतोक्ता॥ कृपणुसे सहम्ः

पुंसः रूपयतो भद्रे सर्वात्मा प्रीयते हरिः॥ प्रीते हरौ भगवति प्रीयेहं स चराचरः॥४०॥ तस्मादिदं गरं भुंजे प्रजानां स्वस्तिरस्तु मे॥ एवमामंत्र्य भगवान् भवानीं विश्वभावनः॥४१॥ तद्विषं जग्धुमारेभे प्रभावज्ञान्वमोदत॥ ततः करतलीकृत्य व्यापि हालाहलं विषं॥४२॥ अभक्षयन्महादेवः रूपया भूतभावनः॥ तस्यापि दर्शयामास स्ववीर्यं जलकल्मषः॥४३॥ यच्चकार गले नीलं तच्च साधोर्विभूषणं॥ तप्यंते लोकतापेन साधवः प्रायशो जनाः॥४४॥ परमाराधनं तद्धि पुरुषस्याखिलात्मनः॥ निशाम्य कर्म तच्छंभोर्देवदेवस्य मीढुषः॥४५॥ प्रजा दाक्षायणी ब्रह्मा वैकुंठश्च शशंसिरे॥ प्रस्कन्नं पिबतः पाणेर्यत्किंचिज्जगृहुः स्म तत्॥ वृश्चिकाहिविषौषध्यो दंदशूकाश्च ये परे॥४६॥ इति श्रीभागवते महापुराणे अष्टमस्कंधे अमृतमथने सप्तमोध्यायः॥७॥ श्रीशुक उवाच॥ पीते गरे वृषांकेण प्रीतास्तेमरदानवाः॥ ममंथुस्तरसा सिंधुं हविर्धानी ततोभवत्॥१॥ तामग्निहोत्रीमृषयो जगृहुर्ब्रह्मवादिनः॥ यज्ञस्य देवयानस्य मेध्याय हविषे नृप॥२॥ तत उच्चैःश्रवा नाम हयोभूच्चंद्रपांडुरः॥ तस्मिन् बलिः स्पृहां चक्रे नेंद्र ईश्वरशिक्षया॥३॥ तत ऐरावतो नाम वारणेंद्रो विनिर्गतः॥ दंतैश्चतुर्भिः श्वेताद्रेर्हरन् भगवतो महिं॥ ततोभवत्पारिजातः सुरलोकविभूषणः॥ पूरयत्यर्थिनो योर्थैः शश्वद्भुवि यथा भवान्॥४॥

अष्टमे मथ्यमाने क्षीरोदे स्याविर्भावः तेऽसुरैः धन्वंतरेर्हृतेमेमो दिन्युद्भवर्ष्यति॥ १ हविर्धानी सुरभिः देवयानस्य ब्रह्मलोकमार्गप्रापकस्य यज्ञस्य संबंधिनो हविषे॥ ईश्वरशिक्षया प्रागेव कृतया॥ भगवतोयः श्वेताद्रिः कैलासः तस्य महिमानंदं तैः शिखरतुल्यैर्हरन् चंद्रवत्पांडुरः इत्यनुषंगः॥ ३

तदेवं न तं परानुग्रहव्ययं तां ये निंदंति ते ति मूर्खा इत्याह ॥ यत्त्विति ॥ ये तु उमया सह चरंतं तपसाभितप्तं तं कामिनं कत्थंते प्रलपंति । तथा श्मशाने चरंतं तं क्रू-
रं उग्रं क्रूरं परुषं च हिंस्रं कत्थंते कथंभूतं आत्मारामाश्च ते गुरवश्च तैर्हृदि चिंतितमंघ्रिद्वंद्वं यस्य । तथाभूतमपि तपसा-
भितप्तमपि ते नूनं तव ऊतिं अविदन्निति कुत्सितलीलां नैव विदुरित्यर्थः ॥ अत एव हातलज्जाः त्यक्तत्रपाः ; कथमात्मारामैः सेवितचरणयुगस्य कामि-
त्वसंभवः ॥ कथं वा तपसाभितप्तस्य तस्योग्रत्वं परुषत्वं वा संभवतीत्यविचार्यैव प्रलपंतीत्यर्थः ॥ आस्तां तावन्निंदकानां वार्ता ब्रह्मादयोपि तवत

यत्त्वात्मरामगुरुभिर्हृदि चिंतितांघ्रिद्वंद्वं चरंतमुमया तपसाभितप्तं ॥ कत्थंत उग्रपरुषं निरतं श्मशाने ते नूनमूतिमविदंस्तव हातल-
ज्जाः ॥ ३३ ॥ तत्तस्य ते सदसतोः परतः परस्य नांग स्वरूपगमने प्रभवंति भूम्नः ॥ ब्रह्मादयः किमुत संस्तवने वयं तु तत्सर्गसर्गविष-
या अपि शक्तिमात्रं ॥ ३४ ॥ एतत्परं प्रपश्यामो न परं ते महेश्वर ॥ मृडनाय हि लोकस्य व्यक्तिस्तेऽव्यक्तकर्मणः ॥ ३५ ॥ श्रीशुक उवा-
च ॥ तद्वीक्ष्य व्यसनं तासां कृपया भृशपीडितः ॥ सर्वभूतसुहृद्देव इदमाह सतीं प्रियां ॥ ३६ ॥ अहो बत भवान्येतत्प्रजानां पश्य वैशसं
क्षीरोदमथनोद्भूतात्कालकूटादुपस्थितं ॥ ३७ ॥ तासां प्राणपरीप्सूनां विधेयमभयं हि मे ॥ एतावान्हि प्रभोरर्थो यद्दीनपरिपाल-
नं ॥ ३८ ॥ प्राणैः स्वैः प्राणिनः पांति साधवः क्षणभंगुरैः ॥ बद्धवैरेषु भूतेषु मोहितेष्वात्ममायया ॥ ३९ ॥

त्वं न जानंतीत्याह ॥ तत्तस्मात्तव स्वरूपस्यागमने ब्रह्मादयोपि न समर्थाः संस्तवने तु कुतः शक्ताः स्युः तत्र वयं कथं प्रभवाम ॥ यतस्तेषां सर्गेऽत्र त्वं तावगोचीनाः हृ-
तथापि त्वं प्रियं वदे तु शक्त्यनं एतदात्मशक्तिपरिमितम इत्यर्थः ॥ तदेवाह ॥ एतत्परमिति ॥ न परं रूपं तथापि लब्धदृष्टीनां देवरूतार्थो वयमित्याह ॥ मृडनायेति
मत्त्वाप्यवमविचार्य विषपाने प्रवृत्तं मां कथं चिदियं प्रिया वारयेदिति प्रियां कथातामनुज्ञापयन्नाह ॥ अहो बतेति ॥ त्रिभिः वैशसं दुःखं प्राणपरीप्सूनां प्रा-
णरक्षणेप्सूनां मे मया प्रभोः समर्थस्य अर्थः कार्यं ॥ किं च बद्धवैरेषु भूतेषु परस्परं जिघांसत्सु ॥ ७ ॥

38

भा० अ०
२०

पदं आश्रयं ध्रुवं नित्यं अव्यभिचारि लोभिताः संतो गुणा यस्मिन तत् ॥ नान्वविंदत तत्र क्वचित् कस्यचिद्दोषस्य सद्भावात् ॥ तदेवाह नूनमिति त्रिभिः ॥ मन्यु
निर्जयो नास्ति दुर्वाससः अत्र्यादिषु ॥ गुरुशुक्रादिषु संगविवर्जितं ज्ञानं नास्ति महत्त्वेऽपि लक्ष्म्यादौ ● न काम निर्जयः ॥ परतोव्यपाश्रयः परापेक्षः
इंद्रादिः स किमीश्वरः ॥ न भूतसौहृदं परशुरामादिषु ॥ न मुक्तिकारणं त्यागः शिबिप्रभृतिषु ॥ पुंसः कार्तवीर्यादेर्वीर्यमस्ति ॥ अजवेग निकृतं
कालवेगे न परिहृतं तु न भवति ॥ गुणसंगविवर्जितः सनकादिः द्वितीयो मम वरो नहि । समाधिनिष्ठत्वात् ॥ चिरायुष्यपि मार्कंडेयादौ शीलमंग

भूषणानि विचित्राणि विश्वकर्मा प्रजापतिः । हारं सरस्वती पद्ममजो नागाश्च कुंडले ॥ १४ ॥ ततः कृतस्वस्त्ययनोत्पलस्रजं नदद्द्विरेफां परिगृह्य
पाणिना ॥ चचार वक्त्रं सुकपोलकुंडलं सव्रीडहासं दधती सुशोभनं ॥ १५ ॥ स्तनद्वयं चातिकृशोदरी समं निरंतरं चंदनकुंकुमोक्षितं ॥ त
तस्ततो नूपुरवल्गु सिंजितैर्विसर्पती हेमलतेव सा बभौ ॥ १६ ॥ विलोकयंती निरवद्यमात्मनः पदं ध्रुवं चाव्यभिचारिसद्गुणं ॥ गंधर्वयक्ष
सुरसिद्धचारणत्रैविष्टपेयादिषु नान्वविंदत ॥ १७ ॥ नूनं तपो यस्य न मन्युनिर्जयो ज्ञानं क्वचित्तच्च न संगवर्जितं ॥ कश्चिन्महां
स्तस्य न काम निर्जयः स ईश्वरः किं परतो व्यपाश्रयः ॥ १८ ॥ धर्मः क्वचित्तत्र न भूतसौहृदं त्यागः क्वचित्तत्र न मुक्तिकारणं ॥ वीर्यं न पुंसो
स्त्यजवेगनिःकृतं नहि द्वितीयो गुणसंगवर्जितः ॥ १९ ॥ क्वचिच्चिरायुर्नहि शीलमंगलं क्वचित्तदप्यस्ति न वेद्यमायुषः ॥ यत्रोभयं कुत्र
च सोप्यमंगलः सुमंगलः कश्च न कांक्षते हि मां ॥ २० ॥

लं नास्ति इंद्रियदमनशीलत्वात् । क्वचित्तदप्यस्ति हिरण्यकशिपुप्रभृतौ आयुषस्तु स्थैर्यं न वेद्यं दुर्ज्ञानं ॥ भगवद्द्वेषेणाकस्मादेव मृत्युसंभवात् ॥ यत्र कु २०
त्रचश्रीरुद्रे मार्कंडेयादिवत् इंद्रियदमनाद्यभावाच्छीलं मंगलं चायुर्निश्चलं च ते तु भयमस्ति न चान्यत्सूर्वोत्कृष्टः कश्चिद्दोषः तथापि सोप्यमंगलः स्म
शानवासाद्यमंगलचेष्टितः श्रीमुकुंदस्तु लोकत्वादकश्चनेति कश्चित्सुमंगलः निरवद्यश्चास्तु मां नहि कांक्षते आत्मारामत्वात् ॥ २० ॥

३९

वल्गु निर्गताः दिग्भिः ॥ स्वर्गिणां रतिकर्त्र्यः ॥ सुदामा पर्वतः तस्यैकस्यां दिशि जाता सौदामिनी स्फटिकादिमय गिरिशृंगे अधिकं विस्फुरंती विद्युदिव कांत्या दिशो रंजयंती श्रीः संपत्साक्षान्मूर्तिधारिणी सती सैव भगवत्परा रमा आविरभूदित्यर्थः ॥ तस्याः रूपादिमहिम्ना आक्षिप्तं चेतो येषां ॥ भगवद्वक्षःस्थितया श्रिया ^देवानां
विलोकितानां यथा पूर्वं सर्वसंपत्प्राप्तिर्मसुराणां व्रतविपर्ययं वक्ष्यमभिषेकादिकोत्सवपूर्वकं ब्रह्मादिपरिकरेण भगवत्प्राप्तिप्रकारमाह ॥ तस्या आसनमित्यादिना ॥ अथासौ हारुणीत ततः आक्रनेनयंयेन ॥ आभिषेचनिकाः अभिषेकोचिताः पंचपवित्राणि पंचगव्यानि ॥ मधुमाधवौ चैत्रवैशाखौ मकरंदस्त 40

ततश्चाप्सरसो जाता निष्ककंठ्यः सुवाससः ॥ रमण्यः स्वर्गिणां वल्गुगतिलीलावलोकनैः ॥ ६ ॥ ततश्चाविरभूत्साक्षाच्छ्रीरमा भगवत्परा ॥ रंजयंती दिशः कांत्या विद्युत्सौदामिनी यथा ॥ ७ ॥ तस्यां चक्रुः स्पृहां सर्वे ससुरासुरमानवाः ॥ रूपौदार्यवयोवर्णमहिमाक्षिप्तचेतसः ॥ ८ ॥ तस्या आसनमानिन्ये महेंद्रो महदद्भुतं ॥ मूर्तिमत्यः सरिच्छ्रेष्ठा हेमकुंभैर्जलं शुचि ॥ ९ ॥ आभिषेचनिका भूमिराहरत्सकलौषधीः ॥ गावः पंचपवित्राणि वसंतो मधुमाधवौ ॥ १० ॥ ऋषयः कल्पयांचक्रुरभिषेकं यथाविधि ॥ जगुर्भद्राणि गंधर्वा नट्यश्च ननृतुर्जगुः ॥ ११ ॥ मेघा मृदंगपणवमुरजानकगोमुखान् ॥ व्यनादयन् शंखवेणुवीणास्तुमुलनिःस्वनान् ॥ १२ ॥ ततोऽभिषिषिचुर्देवीं श्रियं पद्मकरां सतीं ॥ दिगिभाः पूर्णकलशैः सूक्तवाक्यैर्द्विजेरितैः ॥ १३ ॥ समुद्रः पीतकौशेयवाससी समुपाहरत् ॥ वरुणः स्रजं वैजयंतीं मधुना मत्तषट्पदां ॥ १४ ॥

नर्तक्यो

पुष्पादि फलं तदपि कंद इत्यर्थः ॥ मधुमासे भवं माध्वीति वा ॥ अभिषेकं अभिषेकोचितं विधिं ॥ नाद्यः नटानां स्त्रियः ॥ शंखवेणुवीणाश्च व्यनादयन् तुमुलो निःस्वनो येषां तान् मृदंगादीन् ॥ ७ ॥ ॥

भा॰ अ॰
२१

वारुणी वरुणदेवतां यदन्वंतमयासुरा ॥ दीर्घपीवरदोर्दंडो यस्य कंबुग्रीवः शंखवन्निभिरेखात्रिरेखासुवृत्ता ग्रीवा यस्य स्निग्धः कुंचितः केशानां

श्रिया विलोकिता देवाः सप्रजापतयः प्रजाः ॥ शीलादिगुणसंपन्ना लेभिरे निर्वृतिं परां ॥ २६ ॥ निःसत्वा लोलुपा राजन् निरुद्योगा गतत्रपाः
यदा चोपेक्षिता लक्ष्म्या बभूवुर्दैत्यदानवाः ॥ २७ ॥ अथासीद्वारुणी देवी कन्या कमललोचना ॥ असुरा जगृहुस्तां वै हरेरनुमतेन ते ॥ २८ ॥ ५॥
अथोदधेर्मथ्यमानात्काश्यपैरमृतार्थिभिः ॥ उदतिष्ठन्महाराज पुरुषः परमाद्भुतः ॥ २९ ॥ दीर्घपीवरदोर्दंडः कंबुग्रीवोऽरुणेक्षणः ॥
श्यामलस्तरुणः स्रग्वी सर्वाभरणभूषितः ॥ ३० ॥ पीतवासा महोरस्कः सुमृष्टमणिकुंडलः ॥ नीलकुंचितकेशांतः सुभगः सिंहविक्र-
मः ॥ ३१ ॥ अमृतापूर्णकलशं बिभ्रद्वलयभूषितः ॥ स वै भगवतः साक्षाद्विष्णोरंशांशसंभवः ॥ ३२ ॥ धन्वंतरिरिति ख्यात आयुर्वेददृ-
गिज्यभाक् ॥ तमालोक्यासुराः सर्वे कलशं चामृताभृतं ॥ लिप्संतः सर्ववस्तूनि कलशं तरसाहरन् ॥ ३३ ॥ नीयमानेऽसुरैस्तस्मिन्कल-
शेऽमृतभाजने ॥ विषण्णमनसो देवा हरिं शरणमाययुः ॥ ३४ ॥ इति तद्दैन्यमालोक्य भगवान्भृत्यकामकृत् ॥ मा खिद्यत मिथोऽर्थं वः सा-
धयिष्ये स्वमायया ॥ ३५ ॥ मिथः कलिरभूत्तेषां तदर्थे तर्षचेतसां ॥ अहं पूर्वमहं पूर्वं न त्वं न त्वमिति प्रभो ॥ ३६ ॥ ॥ ॥ ॥ ॥

२२

तोऽपि यस्य ॥ इज्यभाक् यज्ञभागभोक्ता ॥ अमृतेन आभृतं परिपूर्णं ॥ मिथः दैत्यानां परस्परं कलहोत्पादनेन योगमायया वोऽर्थं साधयिष्यामि
अतो मा खिद्यत त्यक्तशोकाः ॥ तदेवाह मिथ इति ॥ तर्षः कामः तद्युक्तानि चेतांसि येषां इत्येवं प्रबलानां कलिरभूत् ॥ ७ ॥

निजैकाश्रयसद्गुणाश्रयम्

एवंविधश्च परमानिरपेक्षमपि मुकुन्दमेव वरं वव्रे तत्किं अव्यभिचारिभिः सद्भिर्धर्मैर्हीना न हि विमृग्यते । निजैकाश्रयतया नैरपेक्ष्येण वरं सर्वोत्तमं ॥
तत्र हेतुः ॥ अगुणाश्रयं प्रकृतिगुणातीतं ॥ पानं तरे व्ययमेवार्थः ॥ अत एव स्वस्य ईप्सितं किंच सर्वैर्गुणैर्गरिमादिभिरपेक्षितं तं ॥ अयं भावः
यद्यपि स्वयमात्मारामत्वेनान्यनिरपेक्षः तथाप्याश्रितं अणिमादिसिद्धिं यथा नोपेक्षते तावतैव च तत्सेवया हं कृतार्थास्मि किमन्यैः आकृ
तेरिति तमवृतवतीति ॥ तदेवाह ॥ तस्यांसदेशे कमनीयां नवकंजमालां निधाय तदनु सदं प्रतीक्षमाणा तस्मीं तस्य निकटे तस्थौ ॥ कथंभूतां मा

एवंविधश्च पश्यन्भिचारिसद्गुणैर्वरं निजैकाश्रितया गुणाश्रयं ॥ वव्रे वरं सर्वगुणैरपेक्षितं रमा मुकुन्दं निरपेक्षमीप्सितं ॥ २१ ॥ तस्यांसदेश
उशतीं नवकंजमालां माद्यन्मधुव्रतवरूथगिरोपघुष्टां ॥ तस्थौ निधाय निकटे तदुरः स्वधाम सव्रीडहासविकसन्नयनेन याता ॥ २२ ॥
तस्याः श्रियस्त्रिजगतो जनको जनन्या वक्षो निवासमकरोत्परमं विभूतेः ॥ श्रीः स्वाः प्रजाः सकरुणेन निरीक्षणेन यत्र स्थितैधयत सा
धिपतींस्त्रिलोकान् ॥ २३ ॥ शंखतूर्यमृदंगानां वादित्राणां पृथुः स्वनः ॥ देवानुगानां सस्त्रीणां नृत्यतां गायतामभूत् ॥ ब्रह्मरुद्रांगि
रोमुख्याः सर्वे विश्वसृजो विभुं ॥ ईडिरेऽवितथैर्मंत्रैः तल्लिंगैः पुष्पवर्षिणः ॥ २४ ॥

लां माद्यंतो ये मधुव्रतास्तेषां वरूथस्य गिरा उपघुष्टां नादितां ॥ कथंभूता श्रीः सव्रीडहासेन विकसद्भ्यां नयनाभ्यां तेन तस्य उरः स्वधाममयाता सती वक्षः
प्रतीक्षमाणा तस्था इत्यर्थः ॥ भगवानपि त्रिलोक्या अभिवृद्धये स्ववक्षस्तस्याः स्थानं ददौ इत्याह ॥ तस्या इति विशिष्टा भूतयो विभवा यस्याः त
स्याः स्त्रिजगतो जनन्याः श्रियः परमं सुस्थिरं ऐश्वर्यं तत्रावर्धयत ॥ तल्लिंगैः विष्णुप्रतिपादकैः अवितथैर्यथार्थैः ॥ ७ ॥ ॥ ॥ ॥

भा॰अ॰ नरमेधो दितैर्दैत्यैरर्पिते मृतभाजने ।। तुइं चनेन टंवे भ्यो मतं दत्तं तयेर्य्यते ।। १ ।। अहो रूपं सौंदर्य्यं धाम द्युतिः इति वदंतः कात्वमित्यादि पप्रच्छुः ।। मथ्नंतीव क्षोभ-
२२ यंतीव ।। कस्यासीत्यस्य उक्तमुक्तमस्माभिः यतस्त्वं न केनचित्स्पृष्टपूर्वेत्याहुः ।। नेतित्वां अमरादिभिः स्पृष्टपूर्वं नजानीम इति न अपितु जानीम एव ।। अ-

श्रीशुक उवाच ।। तेन्योन्यतोऽसुराः पात्रं हरंतस्त्यक्तसौहृदाः ।। क्षिपंतो दस्युधर्माण आयांतीं ददृशुः स्त्रियं ।। १ ।। अहो रूपमहो धाम अहो अस्य-
ा नवं वयः ।। इति ते तामभिद्रुत्य पप्रच्छुर्जातहृच्छयाः ।। २ ।। का त्वं कंजपलाशाक्षि कुतो वा किं चिकीर्षसि ।। कस्यासि वद वामोरु मथ्नंतीव मनांसि 43
नः ।। ३ ।। न वयं त्वामरैर्दैत्यैः सिद्धगंधर्वचारणैः ।। नास्पृष्टपूर्वां जानीमो लोकेशैश्च कुतो नृभिः ।। ४ ।। नूनं त्वं विधिना सुभ्रु प्रेषितासि शरीरि-
णां ।। सर्वेंद्रियमनःप्रीतिं विधातुं सघृणेन किं ।। ५ ।। सा त्वं नः स्पर्द्धमानानामेकवस्तुनि मानिनि ।। ज्ञातीनां बद्धवैराणां शं विधत्स्व सुमध्यमे
।। ६ ।। वयं कश्यपदायादा भ्रातरः कृतपौरुषाः ।। विभजस्व यथान्यायं नैव भेदो यथा भवेत ।। ७ ।। इत्युपामंत्रितो दैत्यैर्मायायोषिद्वपुर्हरिः
प्रहस्य रुचिरापांगैर्निरीक्षन्निदमब्रवीत ।। ८ ।। श्रीभगवानुवाच ।। कथं कश्यपदायादाः पुंश्चल्यां मयि संगताः ।। विश्वासं पंडितो जातु का-
मिनीषु न याति हि ।। ९ ।। शालावृकाणां स्त्रीणां च स्वैरिणीनां सुरद्विषः ।। सख्यान्याहुरनित्यानि नूत्नं नूत्नं विचिन्वतां ।। १० ।। श्रीशुक उवाच
इति ते क्ष्वेलितैस्तस्या आश्वस्तमनसोऽसुराः ।। जहसुर्भावगंभीरं ददुश्चामृतभाजनं ।। ११ ।।

22

स्त्रामिदं त्वद्दर्शनं तीव्रस्वरोगो वसं पादितमित्याहुः ।। नूनमिति सर्वेंद्रियाणां च मनसश्च प्रीतिं विधातुं सघृणेन किं प्रेषितासि ।। किं वा यद्दृष्टये वागतासि नैवं
नूनं प्रेषितेत्यर्थः ।। भेदो विपक्षो यथा न भवेत् तथा ।। संगताः अनुरक्ताः ।। हे सुरद्विषः ।। भावेन केनाप्यभिप्रायेण गंभीरं यथा भवत्येवं जहसुः ।। ८ ।। ।।

दुर्बलानां वाकोप्राप्यकारमाह देवाः स्वमिति द्वाभ्यां ॥ देवाः तुल्येनायासेन हेतवः साधकाः तुल्यश्चायासो हेतुश्च येषामिति वा ॥ सत्रयागे यथा सर्वेषां समं फलं
तद्वत् ॥ तथा च स्मृतिः ॥ ऋत्विक्कामाः सत्रमासीरन्निति ये यजमानास्ते ऋत्विज इति च ॥ तद्रूपं वर्णयति पंचभिः ॥ प्रेक्षणीयमुत्पलमिव श्यामं सर्वेष्व
वयवेषु सुंदरं समानयोः कर्णयोराभरणे यस्मिन् सुकपोलं च तदुन्नसं च नासिका चाननं यस्मिन् नवयौवने निर्वृत्तयोः प्रकटयोः स्तनयोर्भारे
ण कृशमुदरं यस्मिन् ॥ सुष्ठु ग्रीवा यस्मिन् कंठे आभरणं यस्मिन् तत्च ॥ शोभनया ग्रीवया येन तत्कंठाभरणं यस्मिन् इति वा सुभुजयोरंगदाभ्यां भूषितं वि ५५

देवाः स्वं भागमर्हन्तीति ये तुल्यायासहेतवः ॥ सत्रयाग इवैतस्मिन्नेष धर्मः सनातनः ॥ ३७ ॥ इति स्वान्प्रत्यषेधन्वै दैतेया जातमत्सराः ॥ दुर्ब
लाः प्रबलान्राजन् गृहीतकलशान्मुहुः ॥ ३८ ॥ एतस्मिन्नंतरे विष्णुः सर्वोपायविदीश्वरः ॥ योषिद्रूपमनिर्देश्यं दधार परमाद्भुतं ॥ ३९ ॥ प्रे
क्षणीयोत्पलश्यामं सर्वावयवसुंदरं ॥ समानकर्णाभरणं सुकपोलोन्नसाननं ॥ ४० ॥ नवयौवननिर्वृत्तस्तनभारकृशोदरं ॥ मुखामोदानुरक्ता
लिझंकारोद्विग्नलोचनं ॥ ४१ ॥ बिभ्रत्सुकेशभारेण मालामुत्फुल्लमल्लिकां ॥ सुग्रीवकंठाभरणं सुभुजांगदभूषितं ॥ ४२ ॥ विरजांबरसंवी
तनितंबद्वीपशोभया ॥ कांच्या प्रविलसद्वल्गुचलच्चरणनूपुरं ॥ ४३ ॥ सव्रीडस्मितविक्षिप्तभ्रूविलासावलोकनैः ॥ दैत्ययूथपचेतस्सु का
ममुद्दीपयन्मुहुः ॥ ४४ ॥ इति श्रीभागवते महापुराणे ८ मस्कंधे भगवन्मायोपलंभनं नाम ८ मोऽध्यायः ॥ ८ ॥

विरजांबरेण संवीतो नितंब एव द्वीपः विशालत्वात् तत्र शोभा यस्याः तया कांच्या प्रकर्षेण विलसंत्या वल्गु यथा भवत्येवं चलतोश्चरणयोर्नूपुरे यस्मिन् स
व्रीडेन स्मितेन सह विक्षिप्ता कंपिता या भ्रूः तस्या विलासेन सह यान्यवलोकितानि तैर्दैत्ययूथपानां चेतस्सु कामं मुहुरुद्दीपयन् ॥ इति अष्टमे
अष्टमोध्यायः ॥ ८ ॥

भा॰ अ॰ एवं तावन्मोहयित्वा यत्कृतवान्तदाह त्रिभिः॥ असुराणां सुधादानं सर्पाणां क्षीरदानमिव दुर्नयं अन्याय्यं मत्वा तां सुधां तेभ्यो न व्यभजत् अयं भावः
२२ दैत्यैर्मदीयं साध्वसाधु वा सर्वमनुमतमेव अतो मद्दत्तान्देवानेव सुधां पाययिष्यामि॥ किंच तैर्यथान्यायं विभजस्वेत्युक्तं॥ न चैतेभ्यो जात्यैव क्रू
रेभ्यो दानं न्याय्यं अतस्तेभ्यः सुधां न दद्यामिति॥ पंक्तीः पृथक्कृतिविविक्ताः कल्पयित्वा विधाय तासु पंक्तिषु स्वेषु तत्स्थानीयेषु॥ तांश्चासुरानपि

असुराणां सुधादानं सर्पाणामिव दुर्नयं॥ मत्वा जातिनृशंसानां न तां व्यभजदच्युतः॥१९॥ कल्पयित्वा पृथक्पंक्तीरुभयेषां जगत्पतिः
तांश्चोपवेशयामास स्वेषु स्वेषु च पंक्तिषु॥२०॥ दैत्यान्गृहीतकलशो वंचयन्नुपसंचरैः॥ दूरस्थान्पाययामासजरामृत्युहरां सुधां॥२१॥ ते
पालयंतः समयमसुराः स्वकृतं नृप॥ तूष्णीमासन्कृतस्नेहाः स्त्रीविवादजुगुप्सया॥२२॥ तस्यां कृतातिप्रणयाः प्रणयापायकातराः
बहुमानेन चाबद्धा नोचुः किंचन विप्रियं॥२३॥ देवलिंगप्रतिच्छन्नः स्वर्भानुर्देवसंसदि॥ प्रविष्टः सोममपिबच्चंद्रार्काभ्यां च सूचितः
२४॥ चक्रेण क्षुरधारेण जहारपिबतः शिरः॥ हरिस्तस्य कबंधस्तु सुधयाप्लावितोपतत्॥२५॥ शिरस्त्वमरतां नीतमजो ग्रहमचीक्लृ
पत्॥ यस्तु पर्वणि चंद्रार्कावभिधावति वैरधीः॥२६॥ पीतप्रायेमृते देवैर्भगवान् लोकभावनः॥ पश्यतामसुरेंद्राणां स्वं रूपं जगृहे हरिः

प्रतारणार्थं स्वेष्वेवोपवेशयामास॥ उपसंचरैर्बहुमानप्रियवाक्यादिना तानभिक्रम्यातिक्रम्य गमनैः दूरस्थानपि देवान्॥ तया कृतस्नेहा येषु स्त्रियां स २२
ह विवादस्य जुगुप्सया॥ कृतोतिप्रणयः स्नेहो यैः। प्रणयापाये न कातरा भीताः॥ एते तावत्कृपणाः पूर्वं किंचिदपि वक्तुं तु धीराः प्रणयप्रतारिता घनित्या
दिबहुमानेन च आबद्धाः नियंत्रिताः समयपालनादिभिः बहुभिरेतैः कारणैरप्रियं किंचिदपि नोचुः किंतु तूष्णीमासन्॥ देववपुः को चंद्रार्कयोर्मध्ये प्रवि
ष्टः सोमममृतमपिबत्॥ हरिस्तस्य शिरो जहार अप्लावितः अप्रसंस्पृष्टः॥ ग्रहं सर्पादिवद्ग्रहत्वाधिकारिणं॥ ७॥

45

ईषत्स्मितेन शोभा यस्याः तया ॥ मया कृतं साधु वा असाधु वा यद्यभ्युपेतं अंगीकृतं तर्हि विभजे ॥ असुरपुंगवा दैत्यश्रेष्ठाः ॥ प्रमाणमियत्तामजानंतः ॥ यथोप
जो जोषं यथाप्रीति ॥ अहतस्य लक्षणं ॥ अहतं यंत्रनिर्मुक्तं वासः प्रोक्तं स्वयंभुवा । प्रशस्तं तन्मांगलिकेषु तावन्मात्रेण सर्वदा ॥ प्रागग्रेषु कुशाग्रेषु उपविविशुः ॥
धूपेनामोदितायां सुरभीकृतायां शालायां ॥ हे नरेंद्र ॥ सा कलशपाणिराविवेश ॥ कथंभूता मणिबंधात् कनिष्ठं करस्य करभो बहिः ॥ करभसदृशौ सु
वृत्तौ ऊरू यस्याः सा उशत् कमनीयं दुकूलं यस्मिन् तेन श्रोणीतटेन विशालया श्रोण्या अलसा मंदा गतिर्यस्याः सा पाठांतरे करभसदृशयोरूर्वोः ल 46

ततो गृहीत्वामृतभाजनं हरिर्बभाष ईषत्स्मितशोभया गिरा ॥ यद्यभ्युपेतं क्व च साध्वसाधु वा कृतं मया वो विभजे सुधामिमां ॥ २२ ॥ इत्यभिव्याहृतं त
स्या आकर्ण्यासुरपुंगवाः ॥ अप्रमाणविदस्तस्यास्तत्तथेत्यन्वमंसत ॥ २३ ॥ अथोपोष्य कृतस्नाना हुत्वा च हविषानलं ॥ दत्वा गोविप्रभूतेभ्यः
कृतस्वस्त्ययना द्विजैः ॥ २४ ॥ यथोपजोषं वासांसि परिधायाहतानि ते ॥ कुशेषु प्राविशन् सर्वे प्रागग्रेष्वभिभूषिताः ॥ २५ ॥ प्राङ्मुखेषूपविष्टे
षु सुरेषु दितिजेषु च ॥ धूपामोदितशालायां जुष्टायां माल्यदीपकैः ॥ २६ ॥ तस्यां नरेंद्र करभोरुरुशद्दुकूलश्रोणीतटालसगतिर्मदविह्वलाक्षी ।
सा कूजती कनकनूपुरशिंजितेन कुंभस्तनी कलशपाणिरथाविवेश ॥ २७ ॥ तां श्रीसखीं कनककुंडलचारुकर्णनासाकपोलवदनां परदेवता
ख्यां ॥ संवीक्ष्य संमुमुहुः सस्मितवीक्षणेन देवासुरा विगलितस्तनपट्टिकांतां ॥ २८ ॥

तस्याः
सद्दुकूलं यस्याः सा चासौ श्रोणीतटे न अलसा गतिश्च यस्याः सा ॥ मदेन विह्वले अक्षिणी यस्याः सा ॥ तां ॥ श्रियः सखीं संवीक्ष्य देवासुराः संमुमुहुः ॥ कथंभूतां कन
कमये कुंडले यस्याः सा चासौ चारवः कर्णादयो यस्याः सा च विगलितो विस्रस्तः स्तनपट्टिकाया अंतो यस्याः तां ॥ ७ ॥

भा०अ० २७ रणः संग्रामः उदन्वतः समुद्रस्य रोधसि तीरे अभवत् ॥ अन्योन्यं समासाद्याभिजघ्नुः ॥ विचित्रध्वजपटादिभिश्च वीराणां मालाभिश्च देवदानवध्वजिन्यो वीराणां ५९

साधयित्वामृतं राजन् पाययित्वा स्वकान्सुरान् ॥ पश्यतां सर्वभूतानां ययौ गरुडवाहनः ॥ सपत्नानां परामृद्धिं दृष्ट्वा ते दितिनंदनाः ॥ अमृ
ष्यमाणा उत्पेतुर्देवान्प्रत्युद्यतायुधाः ॥ ततः सुरगणाः सर्वे सुधया पीतयैधिताः ॥ प्रतिसंयुयुधुः शस्त्रैर्नारायणपदाश्रयाः ॥ तत्र ५७
देवासुरो नाम रणः परमदारुणः ॥ रोधस्युदन्वतो राजन् तुमुलो लोमहर्षणः ॥ तत्रान्योन्यं सपत्नास्ते संरब्धमनसो रणे ॥ स
मासाद्यासिभिर्बाणैर्निजघ्नुर्विविधायुधैः ॥ शंखतूर्यमृदंगानां भेरीडमरिणां तथा ॥ हस्त्यश्वरथपत्तीनां नदतां निस्वनोऽभवत् ॥
रथिनो रथिभिस्तत्र पत्तिभिः सह पत्तयः ॥ हया हयैरिभाश्चेभैः समसज्जंत संयुगे ॥ उष्ट्रैः केचिदिभैः केचिदपरे युयुधुः खरैः ॥
केचिद्गौरमृगैरृक्षैर्द्वीपिभिर्हरिभिर्भटाः ॥ गृध्रैः कंकैर्बकैरन्ये श्येनभासैस्तिमिंगिलैः ॥ शरभैर्महिषैः खड्गैर्गोवृषैर्गवयारु
णैः ॥ शिवाभिराखुभिः केचित्कृकलासैः शशैर्नरैः ॥ बस्तैरेके कृष्णसारैः हंसैरन्ये च सूकरैः ॥ अन्ये जलस्थलखगैः सत्वैर्वि
कृतविग्रहैः ॥ सेनयोरुभयो राजन् विविशुस्तेऽग्रतोऽग्रतः ॥ चित्रध्वजपटै राजन्नातपत्रैः सितामलैः ॥ महाधनैर्वज्रदंडैर्व्यजनैर्ब
र्हिचामरैः ॥ वातोद्धूतोत्तरोष्णीषैरर्चिर्भिर्वर्मभूषणैः ॥ स्फुरद्भिर्विशदैः शस्त्रैः सुतरां सूर्यरश्मिभिः ॥ देवदानववीराणां ध्व
जिन्यौ पांडुनंदन ॥ रेजतुर्वीरमालाभिर्यादसामिव सागरौ ॥ ७ ॥ १५ ॥
२७

यादसां मालाभिः सागराविव रेजतुरिति त्रयाणामन्वयः ॥ यादोभिर्यथा तिवा ॥ सितैरमलैरातपत्रैश्च वा[?]श्च चामरैर्व्यजनैः वातेनोद्धूतैरुत्त
रीयैः उष्णीषैश्च ॥ सूर्यरश्मिभिः सुतरां स्फुरद्भिः ॥ ७ ॥

तदिभक्तानामेवोद्यमः फलवान् नान्येषामित्येवमाख्यानतात्पर्यमाह ॥ एवमिति ॥ समादेशाद्योयेषां देशे तु मंदरादिः अर्थसमुद्देशे हि तं वीरुध्यादिः वि
विधः कल्पः फलं केषांचिन्नातं केषांचिन्नेति वैचित्र्यं येषां ते फलवैषम्यवतो बभूवुरित्यर्थः । तदेवाह । तत्रैतेषु पादपंकजाश्रयणाद्देवा अमृतं
फलमापुः स एव सेव्य इत्यर्थः ॥ यत्तद्दो नित्यसंबंधात् ॥ एतदेवोपपादयति । यदीति असुराणां वसुधनं प्राणादिभिर्देहात्मजादिषु नृभिर्युज्य 48
ते च युज्यते देहाद्यर्थं यत्क्रियत इत्यर्थः ॥ तदसत्व्यर्थं भवति, कुतः पृथक्त्वात् ॥ भेदाश्रयत्वात् । शाखानिर्वृत्तं च नवत् । तैरेव प्राणादिभिः ईश्वरो

एवं सुरासुरगणाः समदेशकालहेत्वर्थकर्ममतयोपि फले विकल्पाः ॥ तत्रामृतं सुरगणाः फलमंजसापुर्यत्पादपंकजरजःश्रयणान्न दैत्याः ॥
यद्युज्यतेऽसुवसुकर्ममनोवचोभिर्देहात्मजादिषु नृभिस्तदसत्पृथक्त्वात् तैरेव सद्भवति यत्क्रियतेऽपृथक्त्वात् सर्वस्य तद्भवति मूलनिषेच
नं यत् ॥ ॥ इति श्रीभागवते महापुराणेऽष्टमस्कंधे नवमोऽध्यायः ॥९॥ श्रीशुक उवाच ॥ इति दानवदैतेया नाविंदन्नमृतं नृप
युक्ताः कर्मणि यत्ताश्च वासुदेवपरा १

देहादेर्यत्क्रियते तत्तु असत् असत्फलं भवति । कुतः अपृथक्त्वात् ईश्वरस्य सर्वत्रानुगतत्वात् ॥ तत्र दृष्टांतः ॥ यत्तरोर्मूलनिषेचनं तद्यथा सर्वस्य स्कंधशा
खादेरपि भवतीति यद्वा अपृथक्त्वोपपंचमयोः ॥ पृथक्त्वं पर्यालोच्य भेददृष्ट्या देहाद्युद्देशेन यत्क्रियते तदसत् ॥ अपृथक्त्वं पर्यालोच्य अभेददृष्ट्या तैरेव तेषै
क्यक्रियते तत्सद्भवतीति श्लोकसमानं ॥ इति अष्टमे नवमः ॥ दशमे मत्सराद्दैत्यैरारब्धे तुमुले सुरैः दैत्यमायाविध्वंसे विष्णुदेवेषु आविर्भूतो हरिः ॥१॥ त
देवममृतावाप्तिर्न भक्तानामितीरितं ॥ भक्तामत्सरतः प्राणहानिः पुनरुदीर्यते ॥२॥ ॥

मा॰ श्र॰ सूर्यादिवएकएवशातेनबलिसुतैः॥ बाणोज्येष्ठोयेषांते॥ निशुंभशुंभाभ्यांदेवी॥ आरोहंतीत्यारोहाः तैः सहिताः अन्येचवाहाः पूर्वंतुकेवलंगजादयउ
२५ क्ताः॥ कथंभूताः निकृत्तावाह्वादयोयेषांछिन्नानिध्वजादीनियेषांतेषांदेवादीनांपादाघातैरथांगैश्चूर्णिताहतायोधनाङ्गणाभूमेरुत्थितोरेणुर्दि

अपराजितेननमुचिः रक्षितोवृषपर्वणा॥ सूर्योबलिसुतैर्देवोबाणज्येष्ठैःशतेनच॥ २९॥ शक्रेणचत[illegible]आसेनः पुलोम्नायुयुधेनिलः॥ नि 19
शुंभशुंभयोर्देवीभद्रकाल्यंतरक्षिता॥ ३०॥ वृषाकपिस्तुजंभेनमहिषेणविभावसुः॥ इल्वलःसहवातापिर्ब्रह्मपुत्रैररिंदम॥ ३१॥ काम
देवेनदुर्मर्षउत्कलोमातृभिःसह॥ बृहस्पतिस्तूशनसानरकेनशनैश्चरः॥ ३२॥ मरुतोनिवातकवचैःकालेयैर्वसवोमराः॥ विश्वेदे
वास्तुपौलोमैरुद्राःक्रोधवशैःसह॥ ३३॥ तएवमाजावसुराःसुरेंद्राद्वंद्वेनसंहत्यचयुध्यमानाः॥ अन्योन्यमासाद्यनिजघ्नुरोजसाजि
गीषवस्तीक्ष्णशरासितोमरैः॥ ३४॥ भुशुंडिभिश्चक्रगदर्ष्टिपट्टिशैःशक्त्युल्मुकैःप्रासपरश्वधैरपि॥ निस्त्रिंशभल्लैःपरिघैःसमु
द्गरैःसभिंडिपालैश्चशिरांसिचिच्छिदुः॥ ३५॥ गजास्तुरंगाःसरथाःपदातयःसारोहवाहाविविधाविखंडिताः॥ निःकृत्तबाहूरुशिरोध
रांघ्रयःछिन्नध्वजेष्वासतनुत्रभूषणाः॥ ३६॥ तेषांपदाघातरथांगचूर्णितादायोधनादुल्बणउत्थितस्तदा॥ रेणुर्दिशःखंद्युमणिंचछा
दयन्न्यवर्ततासृक्स्रुतिभिःपरिप्लुतात्॥ ३७॥ २५

शः॥ खंद्युमणिंचसूर्यंछादयंस्तदेवप्रादेर्न्यवर्ततकथंभूतात्असृक्स्रुतिभिः रक्तप्रवाहैः परिप्लुतात्सिक्तात्॥ यद्वापरिप्लवनाद्धेतोः न्यवर्ततमा
वेक्षः रक्तप्रवाहाणांतत्पर्यंतमुद्गलनादित्यर्थः॥ प्रथमांतपाठेरेणोर्विशेषणं॥ छ॥

असुराणां या चमूः तस्याः पतिः सर्वलोक्यां नैःसमास्थितः ॥ उदये उदयगिरिशिखरे स्थितः चंद्र इव विरेजे इति त्रयाणामन्वयः ॥ श्वेतं तिवश्वेवणा नियमितं

वैरोचनो बलिः संख्ये सोऽसुरगणानां चमूपतिः ॥ यानं वैहायसं नाम कामगं मयनिर्मितं ॥ १६ ॥ सर्वसांग्रामिकोपेतं सर्वाश्चर्यमयं प्रभो ॥ अप्रतर्क्यम् निर्देश्यं दृश्यमानमदर्शनं ॥ १७ ॥ आस्थितस्तद्विमानाग्र्यं सर्वानीकाधिपैर्वृतः ॥ बालव्यजनछत्राद्यै रेजे चंद्र इवोदये ॥ १८ ॥ तस्यासन्सर्वतो यानै र्यूथानां पतयोऽसुराः ॥ नमुचिः शंबरो बाणो विप्रचित्तिरयोमुखः ॥ १९ ॥ द्विमूर्धा कालनाभोऽथ प्रहेतिर्हेतिरिल्वलः ॥ शकुनिर्भूतसंतापो वज्रदंष्ट्रो विरोचनः ॥ २० ॥ हयग्रीवः शंकुशिराः कपिलो मेघदुंदुभिः ॥ तारकश्चक्रदृक् शुंभो निशुंभो जंभ उत्कलः ॥ २१ ॥ अरिष्टोऽरिष्टनेमिश्च मयश्च त्रिपुराधिपः ॥ अन्ये पौलोमकालेया निवातकवचादयः ॥ २२ ॥ अलब्धभागाः सोमस्य केवलं क्लेशभागिनः ॥ सर्व एते रणमुखे बहुशो निर्जितामराः ॥ २३ ॥ सिंहनादं विमुंचंतः शंखान्दध्मुर्महास्वरान् ॥ दृष्ट्वा सपत्नानुत्सिक्तान् बलभित्कुपितो भृशं ॥ ऐरावतं दिक्करिणमारूढो वियति स्थितः ॥ २४ ॥ यथा स्रवत्प्रस्रवणमुदयाद्रिमहर्पतिः ॥ तस्यासन्सर्वतो देवा नानावाहध्वजायुधाः ॥ लोकपालाः सहगणैर्वाय्वग्निवरुणादयः ॥ २५ ॥ तेऽन्योन्यमभिसंसृत्य क्षिपंतो मर्मभिर्मिथः ॥ आह्वयंतो विशंतोऽग्रे युयुधुः द्वंद्वयोधिनः ॥ २६ ॥ युयोध बलिरिंद्रेण तारकेन गुहोऽस्यत ॥ वरुणो हेतिनायुध्यन्मित्रो राजन्प्रहेतिना ॥ २७ ॥ यमस्तु कालनाभेन विश्वकर्मा मयेन वै ॥ शंबरो युयुधे त्वष्ट्रा सवित्रा तु विरोचनः ॥ २८ ॥

पद्य वाक्ये:

तिमदधारा स्रवत्प्रपं नानावाहनादीनि येषां ते देवा असुराश्चापि युयुधुः ॥ द्वंद्वान्येवाद्युयोधेति स्वप्रतिः अस्पत अस्पत् अयुध्यते स्वर्धः ॥ ७ ॥

भा·अ· उद्भूतैस्तरंगे रावर्तैश्च भीषणैः ॥ एवमन्यैश्च दैतेयैः सृज्यमानासु ॥ यत्र यत्र तत्र तत्र सोऽर्थितः सन् ॥ अष्टौ आयुधयुक्तावाहवोयस्य । श्रीश्च कौस्तुभश्च
२६ अनर्घ्यकिरीटं च कुंडले च उल्लसंति श्री कौस्तुभादीन्यस्मिन ॥ असुराणां क्रूरं कर्म मंत्रादि प्रयोगः तस्मात् ज्ञाताः महि नाम हिमालये स्मृतिरेव मह

ततः समुद्र उद्वेलः सर्वतः प्रत्यदृश्यत ॥ प्रचंडवातैरुद्धूततरंगावर्तभीषणैः ॥ एवं दैत्यैर्महामायैरलक्ष्यगतिभीषणैः ॥ सृज्यमानासु मायासु ५।
विषेदुः सुरसैनिकाः ॥ न तत्प्रतिविधिं यत्र विदुरिंद्रादयो नृप ॥ ध्यातः प्रादुरभूत्तत्र भगवान्विश्वभावनः ॥ ततः सुपर्णांसकृतांघ्रिप
ल्लवः पिशंगवासा नवकंजलोचनः ॥ अदृश्यताष्टायुधबाहुरुल्लसच्छ्रीकौस्तुभानर्घ्यकिरीटकुंडलः ॥ तस्मिन्प्रविष्टेऽसुरकूट
कर्मजा माया विनेशुर्महिना महीयसः ॥ स्वप्नो यथा हि प्रतिबोध आगते हरिस्मृतिः सर्वविपद्विमोक्षणं ॥ दृष्ट्वा मृधे गरुडवाहमिभा
[illegible] रिवाह आविध्य शूलमहिनोदथ कालनेमिः ॥ तल्लीलया गरुडमूर्ध्नि पतद्गृहीत्वा तेनाहनन्नृप सवाहमरिं त्र्यधीशः ॥ माली सुमाल्यति
बलौ युधि पेततुर्यच्चक्रेण कृत्तशिरसावथ माल्यवांस्तं ॥ आहत्य तिग्मगदयाहनदंडजेंद्रं तावच्छिरोऽच्छिनदरेर्नदतोरिणाद्यः ॥ इति श्रीभाग
वते महापुराणे ऽष्टमस्कंधे दशमोऽध्यायः ॥१०॥

वीसां विपरां विमोक्षणस्मात्किमुत हरेः प्रवेश इत्यर्थः ॥ इभारिर्वाहः सिंहवाहः । अहिनोत् चिक्षेप । लीलयैव तद्गृ● त्वा अहनत् । तस्य च चक्रेण कृत्तशिरसोः पेत २६
तुः तं तथाभूतमपि आहत्य संघ घ अंडजं इंगरुडं [?] अहनत । तं दंतं ग दामुष्टि न्ये इत्यर्थः ॥ आद्योहरिः ॥ इति श्री अष्टमे दशमोऽध्यायः ॥१०॥

शिरोभिर्महाभुजैश्च करभसदृशोरुभिश्च सा रणभूः प्रकर्षेणास्तृता सती विभो ॥ कथंभूतैः शिरोभिः उद्धृतानि उत्पतितानि किरीटानि कुंडलानि च येभ्यः तैः ॥ संरंभयुक्ताः दष्टा ओष्ठा येषु तैः ॥ परिदष्टाः दष्टच्छदा ओष्ठा येषु तैः ॥ पतितानि यानि स्वशिरांसि तत्र ऐतैरक्षिभिः तैः पश्यंत इत्यर्थः ॥ उद्यतान्यायुधानि येः

शिरोभिरुद्धृतकिरीटकुंडलैः संरंभदष्टैः परिदष्टदच्छदैः ॥ महाभुजैः साभरणैः सहायुधैः समास्तृता भूः करभोरुभिर्विभो ॥ कबंधास्तत्र चोत्थितुः पतितैश्च शिरोऽक्षिभिः ॥ उद्यतायुधयो[illegible]डे रथावंतौ महामृधे ॥ बलिर्महेंद्रं दशभिस्त्रिभिरैरावतं शरैः ॥ चतुर्भिश्चतुरो वाहानेकेन रोरुमार्दयत् ॥ स तानापततः शक्रस्त्वारात् शीघ्रविक्रमः ॥ चिच्छेद निशितैर्भल्लैः संग्रामान्तः सन्निव ॥ तस्य कर्म तमवेक्ष्य दुर्मर्षः शक्तिमाददे ॥ तां ज्वलंतीं महोल्काभां हस्तस्यामछिनद्धरिः ॥ ततः शूलं ततः प्रासं ततस्तोमरमुष्टयः ॥ यद्यदस्त्रं समादधात्सर्वं तदच्छिनद्विभुः ॥ ससर्जाथासुरीं मायां तदा नंगतोऽसुरः ॥ ततः प्रादुरभूच्छैलः सुरानीकोपरि प्रभो ॥ ततो निपेतुस्तरवो दह्यमाना दवाग्निना ॥ शिलाः सटंकशिखराश्चूर्णयंत्यो द्विषद्बलं ॥ महोरगाः समुत्पेतुर्दंदशूकाः सवृश्चिकाः ॥ सिंहव्याघ्रवराहाश्च मर्दयंतो महागजान् ॥ यातुधान्यश्च शतशः शूलहस्ता विवाससः ॥ भिंधि भिंधीति वादिन्यस्तत्पार्षदगणान्विभो ॥ ततो महाघनाव्योम्नि गंभीरपरुषस्वनाः ॥ अंगारान्मुमुचुर्वातैराहतास्तनयित्नवः ॥ सृष्टो दैत्येन सुमहान् वह्निः श्वसनसारथिः ॥ सांवर्तक इवात्युग्रो विबुधध्वजिनीमधाक्षू ॥ ७ ॥

तैर्दैर्घं दृष्टैर्युक्ताः ॥ वाहान्नैरावतपादरक्षकान् ॥ आरोदं गमयंतारं ॥ आर्द्दयत् विव्याध ॥ दुर्मर्षः असहमानो बलिः ॥ सटंकैस्तीक्ष्णाग्रैः ॥ शिखरैः सहितास्तनयित्नवश्च अंगारान्मुमुचुरित्यनुषंगः ॥ अधाक्षू आर्षः अधाक्षीदित्यर्थः ॥ ७ ॥

भा०अ० २७

वीनोबलिः

विभ्रमिंद्रंतोऽमंकुशः तेनाहतइव,,सया नः विमानसाद्भितः || नमुचिर्वलः पाकश्चेति जय आजग्मुः जयाऽरंपृथग्वि क्रमता नाद || हरी

श्रीशुकउवाच || इत्याक्षिप्य विभुं वीरो नाराचैर्वीरमर्दनः || आकर्णपूर्णैरहनदाक्षेपैराहतं पुनः || १० || एवं निराकृतो देवो वैरिणा तथ्यवादिना ||
नामृष्यत्तदधिक्षेपं तोत्राहत इव द्विपः || ११ || प्राहरत्कुलिशं तस्मा अमोघं परमर्दनः || सयानो न्यपतद्भूमौ छिन्नपक्ष इवाचलः || १२ || सखायं पति
तं दृष्ट्वा जंभो वलिसखः सुहृत् || अभ्ययात्सौहृदं सख्युर्हतस्यापि समाचरन् || स सिंहवाह आसाद्य गदामुद्यम्य रंहसा || जत्रावताडयच्छक्रं ग
जं च सुमहाबलः || गदाप्रहारव्यथितो भृशं विह्वलितो गजः || जानुभ्यां धरणीं स्पृष्ट्वा कश्मलं परमं ययौ || ततो रथो मातलिना हरिभिर्दशशते
र्वृतः || आनीतो द्विपमुत्सृज्य रथमारुरुहे विभुः || तस्य तत्पूजयन् कर्म जंभो दानवसत्तमः || शूलेन ज्वलता तं तु स्मयमानो हनन्मृधे || १६ ||
सेहे रुजं सुदुर्मर्षं सत्वमालंब्य मातलिः || इंद्रो जंभस्य संक्रुद्धो वज्रेणापाहरच्छिरः || जंभं श्रुत्वा हतं तस्य ज्ञातयो नारदादृषेः || नमुचिश्च वलः पा
कस्तत्रापेतुस्त्वरान्विताः || वचोभिः परुषैरिंद्रं मर्दयंतोऽस्य मर्मसु || शरैरवाकिरन्मेघा धाराभिरिव पर्वतं || हरीन्दशशतान्याजौ हर्यश्वस्य व
लः शरैः || तावद्भिरर्दयामास युगपल्लघुहस्तवान् || शताभ्यां मातलिं पाको रथं सावयवं पृथक् || सकृत्संधानमोक्षेण तदद्भुतमभूद्रणे || २० ||
नमुचिः पंचदशभिः स्वर्णपुंखैर्महेषुभिः || आहत्य व्यनदत्संख्ये सतोय इव तोयदः || सर्वतः शरकूटेन शक्रं सरथसारथिं || शादयामासुरसुराः प्राव
ट्सूर्यमिवांबुदाः || २२ ||

नितिभिः || हर्यश्वस्येंद्रस्य || तावद्भिः दशभिः शतैः || आहत्य इंद्रं विध्वा,,प्रावट् कालीनं सूर्यं || ७ || श्री || श्री || श्री || रामाय नमः

२७

53

एकादशे तु देवेषु दैत्यघातिषु नारदः । देवान्निवारयन् कुक्षौ मृतान् दैत्यान् जीवयत् ॥ १ ॥ उदयच्छत् उन्नमितवान् निबद्धान्यक्षीणि येषां तान् बालान् जित्वा नटः कप
टदृष्टिर्यथा तेषां धनं हरति तथा हे मूढ मायेशान् अस्मान् जेतुमिच्छसि ॥ मत्स्वभावं स्पष्टयति तदाह ॥ आरुरुक्षंति आरोढुमिच्छंति ये च उत्सिसृप्संति ऊर्ध्वं यियि

श्रीशुक उवाच ॥ अथासुराः प्रत्युपलब्धचेतसः परस्य पुंसः परयानुकंपया ॥ जघ्नुर्भृशं शक्रसमीरणादयस्तांस्तान् रणे यैरभिसंहताः पुरा १
वैरोचनाय संरब्धो भगवान् पाकशासनः ॥ उदयच्छद्यदा वज्रं प्रजा हा हेति चुक्रुशुः ॥ २ ॥ वज्रपाणिस्तमाहेदं तिरस्कृत्य पुरःस्थितं ॥ म
नस्विनं सुसंपन्नं विचरंतं महामृधे ॥ ३ ॥ नटवन्मूढ मायाभिर्मायेशान्नो जिगीषसि ॥ जित्वा बालान्निबद्धाक्षान्नटो हरति तद्धनं ॥ ४ ॥
आरुरुक्षंति मायाभिरुत्सिसृप्संति ये दिवं ॥ तान्दस्यून्विधुनोम्यज्ञान्पूर्वस्माच्च पदादधः ॥ ५ ॥ सोऽहं दुर्मायिनस्तेऽद्य वज्रेण शतप
र्वणा ॥ शिरो हरिष्ये मंदात्मन् घटस्व ज्ञातिभिः सह ॥ ६ ॥ बलिरुवाच ॥ संग्रामे वर्तमानानां कालचोदितकर्मणां ॥ कीर्तिर्जयोऽजयो मृत्युः
सर्वेषां स्युरनुक्रमात् ॥ ७ ॥ तदिदं कालरशनं जगत् पश्यंति सूरयः ॥ न हृष्यंति न शोचंति तत्र यूयमपंडिताः ॥ ८ ॥ न वयं मन्यमानानामात्मा
नं तत्र साधनं ॥ गिरो वः साधुशोच्यानां गृह्णीमो मर्मताडनाः ॥ ९ ॥

तुमिच्छंति मोक्षमिच्छंतीत्यर्थः ॥ अधो विधुनोमि पातयामि ॥ कालरशनं कालयंत्रितं अतो न हृष्यंति ॥ तत्र एवं विवेके यूयमपंडिताः अनिपुणाः तत्र कीर्ति
जयादेः आत्मानं साधनं मन्यमानानां वो गिरो न गृह्णीमः मर्मसु ताडनं याभिस्ताः ॥ ७ ॥

54

आर्द्रशुष्काभ्यां मृत्युर्नेति मयास्मै कृतमेवाद ॥ न शुष्केण न चार्द्रेणेति फेनेन तथा वस्तुतिः अपांफेनेन नमुचेः शिरश्छेत्स्यदिति ॥ अनुचरैः

इति शक्रं विषीदंतमाह वागशरीरिणी ॥ नायं शुष्कैरथो नार्द्रैर्वधमर्हति दानवः ॥ मयास्मै यद्वरो दत्तो मृत्युर्नैवार्द्रशुष्कयोः ॥ अतोन्यश्चिंत
नीयस्ते उपायो मघवन् रिपोः ॥ तां दैवीं गिरमाकर्ण्य मघवान् सुसमाहितः ॥ ध्यायन् फेनमथापश्यदुपायमुभयात्मकं ॥ न शुष्केन
न चार्द्रेण जहार नमुचेः शिरः ॥ तं तुष्टुवुर्मुनिगणा माल्यैश्चावाकिरन् विभुं ॥ गंधर्वमुख्यौ जगतुर्विश्वावसुपरावसू ॥ दिवि दुंदुभयो
नेदुर्नर्तक्यो ननृतुर्मुदा ॥ अन्येप्येवं प्रतिद्वंद्वान् वाय्वग्निवरुणादयः ॥ सूदयामासुरसुरान् मृगान् केशरिणो यथा ॥ ब्रह्मणा प्रेषि
तो देवान् देवर्षिर्नारदो नृप ॥ वारयामास विबुधान् दृष्ट्वा दानवसंक्षयं ॥ श्रीनारद उवाच ॥ भवद्भिरमृतं प्राप्तं नारायणपरैर्यतोः भुजाश्रयै
श्रिया समेधिताः सर्वे उपारमत विग्रहात् ॥ श्रीशुक उवाच ॥ संयम्य मन्युसंरंभं मानयंतो मुनेर्वचः ॥ उपगीयमानानुचरैर्ययुः स
र्वे त्रिविष्टपं ॥ येवशिष्टा रणे तस्मिन् नारदानुमतेन ते ॥ बलिं विपन्नमादाय अस्तं गिरिमुपागमन् ॥ तत्राविनष्टावयवान् विद्यमान
शिरोधरान् ॥ उशना जीवयामास संजीविन्या स्वविद्यया ॥ बलिश्चोशनसा स्पृष्टः प्रत्यापन्नेंद्रियस्मृतिः ॥ पराजितोपि नाखिद्यत् लो
कतत्वविचक्षणः ॥ ४७ ॥ इति श्रीभागवते महापुराणे ८म स्कंधे एकादशोध्यायः ॥ ११ ॥

उपगीयमान इत्यर्धः ॥ उपगीयमानैरनुचरैः सहेति वा ॥ अविनष्टा अवयवा येषां विद्यमानाः शिरोधरा येषां तान् ॥ प्रत्यापन्नानि पुनः प्राप्तानींद्रियाणि स्मृ
तिश्च येन सः ॥ इत्यष्टमे एकादशः ॥ ११ ॥

वणिक्पथाः वणिजः भिन्ना नौर्यथा तेभिन्ननावः इत्यर्थः ॥ तुराषाडिंद्रः अश्वादिस्यन्दितो विनिर्गतः ॥ अयानोः सारथिः ॥ शोकामर्षाभ्यां युक्तस्या

अलक्ष्यं तत्समतीव विक्लवाश्चिचुक्रुशुर्देवगणाः सहानुगाः ॥ अनायकाः शत्रुबले निनिर्जिता वणिक्पथा भिन्ननवो यथार्णवे ॥ ततस्तु
राषाड्भुवद्भपंजरात् विनिर्गतः साश्वरथध्वजो ग्रणीः ॥ विभो दिशः खं पृथिवीं च रोचयन्स्वतेजसा सूर्य इव क्षपात्यये ॥ निरीक्ष्य पृतनां दे
वः परैरभ्यर्दितां रणे ॥ उदयच्छद्रिपुं हंतुं वज्रं वज्रधरो रुषा ॥ स तेनैवाष्टधारेण शिरसी बलपाकयोः ॥ ज्ञातीनां पश्यतां राजन् जहार
जनयन् भयं ॥ नमुचिस्तद्वधं दृष्ट्वा शोकामर्षरुषान्वितः ॥ जिघांसुरिंद्रं नृपते चकार परमोद्यमं ॥ अश्मसारमयं शूलं घंटावद्धेमभूषणं
प्रगृह्याभ्यद्रवत्क्रुद्धो हतोसीति वितर्जयन् ॥ प्राहिणोद्देवराजाय निनदन्मृगराडिव ॥ तदापतद्गगनतले महाजवं विचिच्छिदे हरिरिषु
भिः सहस्रधा ॥ तमाहनत्तृपकुलिशेन कंधरे रुषान्वितस्त्रिदशपतिः शिरो हरन् ॥ न तस्य हि त्वचमपि वज्र ऊर्जितो विभेद यः सुरपतिनो
ज्झेरितः ॥ तदद्भुतं परमति वीर्यवृत्रभिच्छिरस्कृतो नमुचिशिरोधरत्वचा ॥ तस्मादिंद्रो बिभेच्छत्रोर्वज्रः प्रतिहतो यतः ॥ किमिदं दैवयोगेन भूतं
लोकविमोहनं ॥ येनाहं पूर्वमद्रीणां पक्षच्छेदः प्रजात्यये ॥ कृतो निविशतां भारैः पतत्रैः पततां भुवि ॥ तपः सारमयं त्वाष्ट्रं वृत्रो येन विपाटि
तः ॥ अन्ये चापि बलोपेताः सर्वास्त्रैरक्षतत्वचः ॥ सोयं प्रतिहतो वज्रो मया मुक्तोसुरेल्पके ॥ नाहं तदाददे दंडं ब्रह्मतेजोप्यकार[illegible]णम् ॥ छ ॥

रुषा क्रोधेनान्वितः ॥ घंटावत् घंटाभिर्युक्तं ॥ अतिवीर्यं वृत्रमभिनत् हंति ॥ तथा पतत्रैः पक्षैः ॥ सारमयं वीर्याधिक्यं त्वाष्ट्रं तप एवं वृत्रं येन वज्रेण
मया विपाटितः ॥ दंडं लकुटतुल्यं ब्रह्मतेजः दधीचेः सामर्थ्यं ॥ छ ॥

भा॰ अ॰

तवैवंभूतत्वे मुमुक्षूणामाचारः प्रमाणमित्याह ॥ तवैवेति उभयतः इहामुत्र च संगं त्यक्त्वा ॥ ननु ब्रह्मैव चेदहं तर्हि संगोदासीनस्य मम चरणांभोजोपासनया
किं तेषां तत्राह ॥ त्वमिति ब्रह्मत्वेपि त्वं नात्यंतमुदासीनः किंतु विश्वस्य प्रपंचस्योदयादौ हेतुः तदुपाधीनामात्मनां जीवानामीश्वरश्च तत्र फलदाता
तर्हि किं राजादिवत्सापेक्षतया सेवकेभ्यः फलं ददासि नहि २ अनपेक्ष एव त्वं ॥ तर्हि किमीश्वरत्वेन तत्राह ॥ ते रागभिः तत्र फलदानार्थमपेक्ष्यत
इति तदपेक्षः तस्य भावस्तदपेक्षता तया ॥ अनपेक्षत्वमेव दर्शयितुं तदाद्यं ब्रह्मत्वं विशिनष्टि ॥ पूर्णं अमृतं च सुखस्वरूपं विषयसुखवैलक्षण्यपार्थमाह
अविकारं नित्यं आनंदमात्रं च केवलानंदं अतः विशोकं तत्कुतः विगुणं ॥ किंच अनन्यत् नविद्यते अन्यद्यस्मात् ब्रह्मव्यतिरिक्तभावादपि निरपेक्षत्व

तवैव चरणांभोजं श्रेयस्कामा निराशिषः ॥ विसृज्योभयतः संगं मुनयः समुपासते ॥ ६ ॥ त्वं ब्रह्म पूर्णममृतं विगुणं विशोकमानंदमात्रमविका
रमनन्यदन्यत् ॥ विश्वस्य हेतुरुदयस्थितिसंयमानामात्मेश्वरश्च तदपेक्षतयानपेक्षः ॥ ७ ॥ एकस्त्वमेव सदसद्द्वयमद्वयं च स्वर्णं कृताकृ
तमिवेह न वस्तुभेदः ॥ अज्ञानतस्त्वयि जनैर्विहितो विकल्पो यस्माद्गुणव्यतिकरो निरुपाधिकस्य ॥ ८ ॥

२९

मित्यर्थः तर्हि सर्वात्मकत्वे तद्विकारश्च संगो दुर्वारस्तत्राह अन्यत् सर्वतो व्यतिरिक्तं च कारणत्वात् ॥ नह्येवंभूतसुखात्मकब्रह्मस्वरूपस्य तवान्यापेक्षास्ति
अतः केवलं भक्तानुग्रहार्थमेव तवैश्वर्यं निःस्वार्थमित्यर्थः ॥ अनन्यत्वमन्यत्वं चैकस्य कुतः ॥ इत्याशंक्य दृष्टांतेनोपपादयति ॥ सदसत्कार्यकारणरूपं द्व
यं अद्वयं च परमकारणं त्वमेवैकः कृतं कुंडलादिरूपं द्वयं अकृतं च केवलमद्वयं स्वर्णं यथैकमेव तद्वदेवेह त्वयीति वस्तुतो भेदो नास्ति ॥ कथं तर्हि भेदप्र
तीतिस्तत्राह ॥ अज्ञानत इति कुतः यस्मान्निरुपाधिकस्यैव तवायं गुणव्यतिकरो भेदो न स्वतः ॥ ९ ॥

वादशोमोदिनीत्यर्थकिमलोकनोत्सुकं ॥ भवंतंमोहयामासहरिः पुनरसांत्वयत ॥ १ ॥ अमु च नसुरान्विष्णुर्मायया नतदद्भुतं ॥ इतिवक्तुं महादेवमोहो
यमुपवर्ण्यते ॥ २ ॥ हरिः सोममपाययदितीदं निशम्यसत्यत्वात्तेतत्तद्रूपं दृष्ट्वा यया विष्णुनारेण त्वयः ॥ सोमयोमयासद त्वयिकिंचिन्नचाश्चर्यं
वयंत्वाश्चर्यमानसाः ॥ इतिवक्तुमहादेवस्तुष्टाकृतिमहर्षिभिः ॥ त्वयिमहामाया विनिपरमेश्वरे नहि किल किंचिद्घटितमिति ॥ वयंतुपरमकौतुहले
नद्रष्टुमागता इति वक्तुधात्संबोधयन् स्तौति ॥ हे देवदेव कुतो हं देवानां देव इत्यत आह हे जगद्व्यापिन तत्कुतः हे जगन्मय ॥ तर्हि किं यथा नै न

श्रीबादरायणिरुवाच ॥ वृषध्वजो निशम्येदं योषिद्रूपेण दानवान् ॥ मोहयित्वा सुरगणान् हरिः सोममपाययत ॥ १ ॥ वृषमारुह्य गिरि
शः सर्वभूतगणैर्वृतः ॥ सह देव्या ययौ द्रष्टुं यत्रास्ते मधुसूदनः ॥ २ ॥ सभाजितो भगवता सादरं सोमया भवः ॥ सूपविष्ट उवाचेदं प्रतिपूज्य स्म
यन् हरिं ॥ ३ ॥ श्रीमहादेव उवाच ॥ देवदेव जगद्व्यापिन् जगदीश जगन्मय ॥ सर्वेषामपि भावानां त्वमात्मा हेतुरीश्वरः ॥ ४ ॥ आद्यंता
चि= वस्य यन्मध्यमिदमन्यदहं बहिः ॥ यतोऽव्ययस्य नैतानि तत्सत्यं ब्रह्म चिद्भवान् ॥ ५ ॥

हे जगदीश ॥ तच्च कुतस्तत्राह सर्वेषामपि त्वं हेतुः अतः ईश्वरः आत्मत्वाच्च न जडं प्रधानं त्वमित्यर्थः ॥ न तु जगन्मयत्वोक्त्या जगत इव त्वत्पादिनासत्यत्वे
न चेज्जाड्ये न च ममापि किं ते यात्वं त्रूषे नहि न हत्याह ॥ आद्यंतौ मध्यं च अस्य जगतो यतो ब्रह्मणो भवंति ॥ अस्य चाव्ययस्य एतानि आद्यंतमध्यानि न
संति ॥ यच्च ब्रह्म इदं कारास्पदं देहरूपं अहंकारास्पदं द्रष्टृ बहिर्भोग्यं अन्यत तभोरूपं च तत्सत्यं चिद्रूपं ब्रह्मैव भवान् ॥ अतो न तव विकारादिशंकेत्यर्थः ॥

भा०अ० सुरकार्याणि योषिद्वेषेण भविष्यंतीति पश्यता ॥ अयं भावः अवश्यं तान्वंचयित्वा देवेभ्योमृतं देयं ॥ न चैवं वैषम्यं रूपांतरेण कर्तुमुचितं
२० अतो वंचनमोहनादिसारं कामिनीरूपं मया धृतमिति ॥ तत्तद्रूपं दर्शयिष्यामि संकल्पप्रभवः कामः तस्योदयो यस्मात्" ॥ विचित्राणि पुष्पाणि अरुणाः
पल्लवाश्च येषां ते द्रुमा यस्मिन् ॥ लसत् दुकूलेन पर्यस्ते परिदृते नितंबे मेखला यस्याः तां" ॥ उत्पतत्पतत्कंदुकलीलावशेन यत् आवर्त्तनोद्वर्त्त 59

श्री शुक उवाच ॥ एवमभ्यर्थितो विष्णुर्भगवान् शूलपाणिना ॥ प्रहस्य भावगंभीरं गिरिशं प्रत्यभाषत ॥ श्री भगवानुवाच ॥ कौतूहलाय
दैत्यानां योषिद्वेषो मया कृतः ॥ पश्यता सुरकार्याणि गते पीयूषभाजने ॥ १३ ॥ तत्तेहं दर्शयिष्यामि दिदृक्षोः सुरसत्तम ॥ कामिनां बहु मंतव्यं
संकल्पप्रभवोदयं ॥ १४ ॥ श्री शुक उवाच ॥ इति ब्रुवाणो भगवांस्तत्रैवांतरधीयत ॥ सर्वतश्चारयंश्चक्षुर्भव आस्ते सहोमया ॥ १५ ॥ ततो ददर्शो
पवने वरस्त्रियं विचित्रपुष्पारुणपल्लवद्रुमे ॥ विक्रीडतीं कंदुकलीलया लसद्दुकूलपर्यस्तनितंबमेखलां ॥ आवर्त्तनोद्वर्त्तनकंपितस्त
नप्रकृष्टहारोरुभरैः पदे पदे ॥ प्रभज्यमानामिव मध्यतश्चलत्पदप्रवालं नयतीं ततस्ततः ॥ १६ ॥ दिक्षु भ्रमत्कंदुकचापलैर्भृशं प्रोद्वि
ग्नतारायतलोललोचनां ॥ स्वकर्णविभ्राजितकुंडलोल्लसत्कपोलनीलालकमंडिताननां ॥ १७ ॥

३०

नेन मनोन्मथने ताभ्यां कंपितयोः स्तनयोः प्रकृष्टहाराणां चोरुभारैः प्रतिपदं मध्ये प्रभज्यमानामिव ॥ चलत्पदमेव प्रवालवत्कोमलं ततस्ततो नयंतीं" ॥ दि
क्षु भ्रमत्कंदुकचापलैर्भृशं चलैः प्रोद्विग्नतारे आयते लोले चंचले लोचने यस्याः ॥ स्वकर्णयोर्विभ्राजिते कुंडले ताभ्यामुल्लसंतौ कपोलौ ताभ्यां
च नीलालकैश्च मंडितमाननं यस्याः ॥ ॥ ८ ॥

अतएव त्वां वृथा वर्णयंति । तत्वतस्तु केपि न जानंतीत्याह ॥ त्वां ब्रह्म वेदंति नो, वदंति मन्यंते त्वामेव कर्ममीमांसका मन्यंते प्रकृतिपुरुषयोः परं पुमांसं
सांख्याः ॥ विमलोत्कर्षिणी ज्ञाना क्रियायोगा प्रह्वी सत्या ईशाना अनुग्रहा चेत्येवं नवशक्तियुतं परं पांचरात्राः महापुरुषं पातंजलाः ॥ परायु
र्ब्रह्मा ॥ सत्वसर्गाः सत्वगुणेन सृष्टाः । अपि येन त्वया विरचितं विश्वमपि खलु तत्वतो न जानंति किं पुनस्त्वां हे ईश । अपवर्ग रजसं तामसं च वृत्तं त्वत्ति 60

त्वां ब्रह्म केचिदवयंत्युत धर्ममेके एके परं सदसतोः पुरुषं परेशं ॥ अन्ये वदंति नवशक्तियुतं परं त्वां केचिन्महापुरुषमव्ययमात्मतंत्रं ॥ ८
नाहं परायुरृषयो न मरीचिमुख्या जानंति यद्विरचितं खलु सत्वसर्गाः ॥ यन्मायया मुषितचेतस ईश दैत्यमर्त्यादयः किमुत शश्वदभद्र
वृत्ताः ॥ ९ ॥ स त्वं समीहितमदः स्थितिजन्मनाशं भूतेहितं च जगतो भवबंधमोक्षौ ॥ वायुर्यथा विशति खं च चराचराख्यं सर्वं तदात्मक
तयावगमोऽवरुंत्से ॥ १० ॥ अवतारा मयादृष्टा रममाणस्य ते गुणैः ॥ सोऽहं तद्द्रष्टुमिच्छामि यत्ते योषिद्वपुर्धृतं ॥ ११ ॥ येन संमोहिता दै
त्याः पायिताश्चामृतं सुराः ॥ तद्दिदृक्षव आयाताः परं कौतूहलं हि नः ॥ १२ ॥

सैर्येषां ते न जानंतीति किमु तव रूपं ॥ त्वं तु सर्वज्ञ आसीत्याह । स त्वं सर्वं अवरुंत्से व्याप्नोषि जानासि किं तत्सर्वं समीहितं स्वकृतं अदः स्थितिजन्म
नाशं अमुष्य जगतो जन्मादि भूतानामीहितं च जगतो भवबंधमोक्षं च ॥ व्याप्तौ दृष्टांतः ॥ चराचराख्यं देहजातं खं च यथा वायुराविशति तथा क
थमवरुंत्से तदात्मकतया तस्य सर्वस्यात्मतयेत्यर्थः । आत्मत्वे हेतुः अवगमः ज्ञानरूप इति ॥ एवं स्तुत्वा प्रस्तुतं विज्ञापयति अवतारा इति द्वाभ्यां ॥ ६ ॥

भा॰अ॰ एवं तामनुधावन् हरः सरित्सरःसु शैलादिषु च संनिहितो बभूव ॥ तद्भक्तजडीकरणं स्वां निष्ठां प्रकृतिं ॥ कालेन स
२१

तस्यासौ पदवीं रुद्रो विष्णोरद्भुतकर्मणः प्रत्यपद्यत कामेन वैरिणेव विनिर्जितः ॥ २८ ॥ तस्यानुधावतो रेतश्चस्कंदामोघरेतसः ॥ शुष्मिणो यू-
थपस्येव वासितामनुधावतः ॥ २९ ॥ यत्र यत्रापतन्मह्यां रेतस्तस्य महात्मनः ॥ तानि रूप्यस्य हेम्नश्च क्षेत्राण्यासन्महीपते ॥ ३० ॥ सरित्सरःसु
शैलेषु वनेषूपवनेषु च ॥ यत्र क्व चासन्नृषयस्तत्र संनिहितो हरः ॥ ३१ ॥ स्कन्ने रेतसि सोपश्यदात्मानं देवमायया ॥ जडीकृतं नृपश्रे-
ष्ठ संन्यवर्त्तत कश्मलात् ॥ ३२ ॥ अथावगतमाहात्म्य आत्मनो जगदात्मनः ॥ अपरिज्ञेयवीर्यस्य न मेने तदु हाद्भुतं ॥ ३३ ॥ तमविक्लवम
व्रीडमालक्ष्य मधुसूदनः ॥ उवाच परमप्रीतो बिभ्रत्स्वां पौरुषीं तनुं ॥ ३४ ॥ श्रीभगवानुवाच ॥ दिष्ट्या त्वं विबुधश्रेष्ठ स्वां निष्ठामात्मना स्थि-
तः यन्मे स्त्रीरूपया स्वैरं मोहितोप्यंग मायया ॥ ३५ ॥ को नु मेतितरेन्मायां विषक्तस्त्वदृते पुमान् ॥ तांस्तान्विसृजतीं भावान्दुस्तरामकृतात्मभिः ॥
सेयं गुणमयी माया न त्वामभिभविष्यति ॥ मया समेता कालेन कालरूपेण भागशः ॥ ३७ ॥ श्रीशुक उवाच ॥ एवं भगवता राजन् श्रीवत्सांकेन
सत्कृतः आमंत्र्य तं परिक्रम्य सगणः स्वालयं ययौ ॥ ३८ ॥ आत्मांशभूतां तां मायां भवानीं भगवान्भवः ॥ शंसतामृषिमुख्यानां प्रीत्याचष्टा-
थ भारत ॥ ३९ ॥ अयि व्यपश्यस्त्वमजस्य मायां परस्य पुंसः परदेवतायाः ॥ अहं कलानामृषभो विमुह्ये ययावशोन्ये किमुतास्वतंत्राः ॥ ४० ॥
यं मामपृच्छस्त्वमुपेत्य योगात्समासहस्रांत उपारतं वै ॥ स एव साक्षात्पुरुषः पुराणो न यत्र कालो विशते न वेदः ॥ ४१ ॥ ३१

छा॰ निमित्तेन मया कालरूपेण ॥ भागशो रजआद्यंशेन समेता मदधीना सती ॥ ७ ॥ श्री ॥ श्रीरामाय नमः ॥

61

संनह्यतीं बध्नंतीं जगद्विमोहयंतीं तां वीक्ष्य देवः श्रीरुद्रः आत्मानमंतिके स्थितामुमां स्वगणांश्च न वेद कथंभूतः एवंभूतया कंदुकलीलया ईष
द्व्रीडितया अस्फुटं स्मितं तेन सह विसृष्टो यः कटाक्षः तेन मुष्टो वंचितः ॥ अत एव स्वस्वयं यतः स्त्रियाः प्रेक्षणं तया च प्रतिसमीक्षणं ताभ्यां विह्वलः ॥

श्लथद्दुकूलं कबरीं च विच्युतां संनह्यतीं वामकरेण वल्गुना ॥ विनिघ्नतीमन्यकरेण कंदुकं विमोहयंतीं जगदात्ममायया ॥ १८ ॥ तां
वीक्ष्य देव इति कंदुकलीलयेषद्व्रीडास्फुटस्मितविसृष्टकटाक्षमुष्टः ॥ स्त्रीप्रेक्षणप्रतिसमीक्षणविह्वलात्मा नात्मानमंतिक उमां
स्वगणांश्च वेद ॥ १९ ॥ तस्याः करग्रात्स तु कंदुको यदा गतो विदूरं तमनुव्रजत्स्त्रियाः ॥ वासः ससूत्रं लघु मारुतोऽहरद्भवस्य देव
स्य किलानुपश्यतः ॥ २० ॥ एवं तां रुचिरापांगीं दर्शनीयां मनोरमां ॥ दृष्ट्वा तस्यां मनश्चक्रे विषज्जंत्यां भवः किल ॥ २१ ॥ तयापहृतवि
ज्ञानस्तत्कृतस्मरविह्वलः ॥ भवान्या अपि पश्यंत्या गतह्रीस्तत्पदं ययौ ॥ २२ ॥ सा तमायांतमालोक्य विवस्त्रा व्रीडिता भृशं ॥ निली
यमाना वृक्षेषु हसंती नान्वतिष्ठत ॥ २३ ॥ तामन्वगच्छद्भगवान्भवः प्रमुषितेंद्रियः ॥ कामस्य च वशं नीतः करेणुमिव यूथपः ॥ २४
सोऽनुव्रज्यातिवेगेन गृहीत्वानिच्छतीं स्त्रियं ॥ केशबंध उपानीय बाहुभ्यां परिषस्वजे ॥ २५ ॥ सोपगूढा भगवता करिणा करिणी यथा ॥ इ
तस्ततः प्रसर्पंती विप्रकीर्णशिरोरुहा ॥ आत्मानं मोचयित्वांग सुरर्षभभुजांतरात् ॥ प्राद्रवत्सा पृथुश्रोणी माया देवविनिर्मिता ॥ २७ ॥

आलानमोचयस्य ॥ तं कंदुकमनुव्रजंत्याः स्त्रियाः ॥ लघु सूक्ष्मं वासः ससूत्रं कांचीसहितं ॥ तत्पदं तस्याः समीपं ययौ ॥ विषज्जंत्यां कुंचितकटाक्षैरात्मा
नं निरीक्षमाणायां ॥ अंग हे राजन् ॥ ७ ॥

भा॰ अ॰ अष्टमं मनुं वक्तुं कथामाह विवस्वत इति त्रिभिः ॥ एके वडवां तृतीयामाहुः मम तु संज्ञैव वडवेति मतं तच्च षष्ठस्कंधे, सैव भूत्वाथ दत्तवा नासत्यौ सु
३२ पुत्रौ भुवीति ॥ यमश्च यमी च यमुना श्राद्धदेवश्चेति त्रयः सुताः सावर्णिः पुत्रः ॥ पदत्रयं याचमानाय इमां सर्वां महीमष्टमे मन्वंतरे दत्वा अष्टमे मन्वंतरे

विवस्वतश्च द्वे जाये विश्वकर्मसुते उभे ॥ संज्ञा छाया च राजेंद्र ये प्रागभिहिते तव ॥ ७ ॥ तृतीयां वडवामेके तासां संज्ञासुतास्त्रयः ॥ यमो यमी
श्राद्धदेवः छायायाश्च सुतान् शृणु ॥ ८ ॥ सावर्णिस्तपती कन्या भार्या संवरणस्य या ॥ शनैश्चरस्तृतीयो भूदश्विनौ वडवात्मजौ ॥ ९ ॥ अ
ष्टमे अंतर आयाते सावर्णिर्भविता मनुः ॥ निर्मोकविरजस्काद्याः सावर्णितनया नृप ॥ १० ॥ तत्र देवाः सुतपसो विरजा अमृतप्रभाः ॥ तेषां वि
रोचनसुतो बलिरिंद्रो भविष्यति ॥ ११ ॥ दत्वेमां याचमानाय विष्णवे यः पदत्रयं ॥ राद्धमिंद्रपदं हित्वा ततः सिद्धिमवाप्स्यति ॥ १२ ॥ योसौ भगव
ता बद्धः प्रीतेन सुतले पुनः ॥ निवेशितोधिके स्वर्गादधुनास्ते स्वराडिव ॥ १३ ॥ गालवो दीप्तिमान् रामो द्रोणपुत्रः कृपस्तथा ॥ ऋष्यशृंगः पि
तास्माकं भगवान् बादरायणः ॥ १४ ॥ इमे सप्तर्षयस्तत्र भविष्यंति स्वयोगतः ॥ इदानीमासते राजन् स्वे स्व आश्रममंडले ॥ १५ ॥ देवगुह्यात्
सरस्वत्यां सार्वभौम इति प्रभुः ॥ स्थानं पुरंदराद्धृत्वा बलये दास्यतीश्वरः ॥ १६ ॥ नवमो दक्षसावर्णिर्मनुर्वरुणसंभवः ॥ भूतकेतुर्दीप्तिकेत्वा
द्यास्तत्सुता नृप ॥ १७ ॥ पारामरीचिगर्भाद्या देवा इंद्रोद्भुतः स्मृतः ॥ द्युतिमत्प्रमुखास्तत्र भविष्यंत्यृषयस्ततः ॥ १८ ॥ ६९
पारा

विष्णोः प्रसादादेव राद्धं लब्धमिंद्रपदं हित्वेत्यर्थः ॥ रामः परशुरामः ॥ द्रोणपुत्रोऽश्वत्थामा ॥ इदानीं तु स्वयोगेनाश्रमे आसते ॥ अद्भुतः इंद्रः ॥ ७ ॥ ८ ॥ ३२

अष्टाध्यायार्थं निगमनं इतीति ॥ एतत्कीर्तनादेः फलमाह एतदिति ॥ भगवता कृतं भक्तरूपकल्पातं स्मरन्नमस्करोति ॥ असतामविषयं भावोभजनं तेनगम्यमंघ्रिं
प्रपन्नान् ॥ सिंधुमथ्यं सिंधोर्मथनेजातममृतं ॥ यश्चापाययत् अभोजयत ॥ अष्टमे स्कंधे त्रयोविंशोध्यायः ॥ त्रयोविंशेतु वर्ण्यंते सप्तमादीन्यनुक्रमात् मन्वं 64

श्री शुक देव वाच ॥ इति तेमिहितस्तात विक्रमः शार्ङ्गधन्वनः ॥ सिंधोर्निर्मथने येन धृतः पृष्ठे महाचलः ॥ ४१ ॥ एतन्मुकुंदयशसो यतो नुष्टिएवेतो
नरिष्यते जातु समुद्यमः क्वचित् ॥ यदुत्तमश्लोकगुणानुवर्णनं समस्तसंसारपरिश्रमापहं ॥ ४२ ॥ असदविषयमंघ्रिं भावगम्यं प्रपन्नान्
मृतममरवर्यान्नाशयत् सिंधुमथ्यं ॥ कपटयुवतिवेषो मोहयन्यः सुरारीन्स्तमहमुपसृतानां कामपूरं नतोस्मि ॥ ४३ ॥ इति श्री भा
गवते महापुराणे अष्टम स्कंधे शंकरमायामोहनं नाम द्वादशोध्यायः ॥ श्री शुक देव वाच ॥ मनुर्विवस्वतः पुत्रः श्राद्धदेव इति श्रुतः ॥ स
प्तमोवर्तमानो यस्तदपत्यानि मे शृणु ॥ १ ॥ इक्ष्वाकुर्नभगश्चैव धृष्टः शर्यातिरेव च ॥ नरिष्यंतोथ नाभागः सप्तमो दिष्ट उच्यते ॥ २ ॥ करूष
श्च पृषध्रश्च दशमो वसुमान्स्मृतः ॥ मनोर्वैवस्वतस्यैते दशपुत्राः परंतप ॥ ३ ॥ आदित्या वसवो रुद्रा विश्वेदेवा मरुद्गणाः ॥ अश्विनावृ
भवो राजन्निंद्रस्तेषां पुरंदरः ॥ ४ ॥ कश्यपोत्रिर्वसिष्ठश्च विश्वामित्रोथ गौतमः ॥ जमदग्निर्भरद्वाज इति सप्तर्षयः स्मृताः ॥ ५ ॥ अत्रापि भग
वज्जन्म कश्यपाददितेरभूत् ॥ आदित्यानामवरजो विष्णुर्वामनरूपधृक् ॥ ६ ॥ संक्षेपतो मयोक्तानि सप्तमन्वंतराणि ते ॥ भविष्याण्यथ व
क्ष्यामि विष्णोः शक्त्यान्वितानि च ॥ ७ ॥

तराणि सर्वाणि च यद्विधानि पृथक्पृथक् ॥ १ ॥ सप्तमादिमन्वंतराण्याह ॥ मनुरित्यादि नाध्यायसमाप्तिः ॥ आदित्यादयो देवा इत्यन्वयः ॥ भगवतो जन्म
अवतारस्तमेवाह ॥ आदित्यानां विवस्वानर्यमा पूषा त्वाष्ट्रा नामध्ये अवरं जन्म यस्य सः ॥ शक्त्या अवतारेणान्वितानि ॥ ७ ॥

भा॰अ॰
३२

क्रियातंतून् कर्मसंततीः वितायिता विस्तारयिष्यति युगसाहस्रेण पर्ययः परिवर्तो यस्य। युगसहस्रप्रमाणं इत्यर्थः॥ इत्यष्टमे त्रयोदशः॥ चतुर्दशे तु सर्वेषां मन्वादीनां यथायथं पृथक्कर्माणि वर्ण्यंते भगवत्प्रवर्तितानां॥ १॥ पुरुषेणेश्वरेण प्रत्यवतारैः स्मार्यंते नियुज्यंते येन तत्र यतो देवा यज्ञभुजः इति॥ ऋष्यादीनां

पवित्राश्चाक्षुषा देवाः शुचिरिंद्रो भविष्यति॥ अग्निर्बाहुः शुचिः शुद्धो मागधाद्यास्तपस्विनः॥ ३३॥ सत्रायणस्य तनयो बृहद्भानुस्तदा हरिः॥ विनतायां महाराज क्रियातंतून्विताधिता॥ ३४॥ राजन्चतुर्दशैतानि त्रिकालानुगतानि ते॥ प्रोक्तान्येभिर्मितः कल्पो युगसाहस्रपर्ययः॥ ३५॥ इति श्रीभागवते महापुराणे अष्टमस्कंधे मन्वंतरानुवर्णनं त्रयोदशोऽध्यायः॥ श्रीराजोवाच॥ मन्वंतरेषु भगवन्यथा मन्वादयस्त्विमे॥ यस्मिन्कर्मणि ये येन नियुक्तास्तद्वदस्व मे॥ १॥ ऋषिरुवाच॥ मनवो मनुपुत्राश्च मुनयश्च महीपते॥ इंद्राः सुरगणाश्चैव सर्वे पुरुषशासनाः॥ २॥ यज्ञादयो याः कथिताः पौरुष्यस्तनवो नृप॥ मन्वादयो जगद्यात्रां नयंत्याभिः प्रचोदिताः॥ ३॥ चतुर्युगांते कालेन ग्रस्ताञ्छ्रुतिगणान्यथा॥ तपसा ऋषयोऽपश्यन्यतो धर्मः सनातनः॥ ४॥ ततो धर्मं चतुष्पादं मनवो हरिणोदिताः॥ युक्ताः संचारयंत्यद्धा स्वे स्वे काले महीं नृपाः॥ पालयंति प्रजापाला यावदंतं विभागशः॥ यज्ञभागभुजो देवा ये च तत्रानुकीर्तिताः॥ इंद्रो भगवता दत्तां त्रिलोकश्रियमूर्जितां॥ भुंजानः पाति लोकांस्त्रीन्कामं लोके प्रवर्षति॥ ७॥ ॥

कर्माण्याह। चतुर्युगांत इति चतुर्भिः। यतः येभ्यः श्रुतिगणेभ्यः॥ उदिताः उक्ताः। युक्ताः संयताः संतो महीं धर्मं संचारयंति महीं धर्मं प्रवर्तयंतीत्यर्थः॥ प्रजापाला मनुपुत्राः तं धर्मं पालयंति। यावदंतं यावन्मन्वंतरावसानं विभागशः पुत्रपौत्रादिक्रमेण॥ ये चान्ये ताः पृथिव्यादयो यज्ञकर्मणि भोक्तृत्वेना न्वितैश्च सह॥ ७॥ ३२

ना:

65

हविष्मत्प्रमुखा इत्युक्ता नामैव केषांचित्कालमान्याद ॥ हविष्मानिति ॥ विषूच्यां जातः सन् ॥ एकादशम इत्यादि राघ्वः ॥ तस्य मनोरंतरं साधयिष्यति ॥

आयुष्मतो तु धारायामृषभो भगवत्कला ॥ भविता येन संराद्धां त्रिलोकीं भोक्ष्यतेऽद्भुतः ॥१८॥ दशमो ब्रह्मसावर्णिरुपश्लोकसुतो महान् ॥ त
त्सुता भूरिषेणाद्या हविष्मत्प्रमुखा द्विजाः ॥१९॥ तत्रापि जन्म भविता हरेर्विश्वसृजां गृहे ॥ अप्सरोसिरीति विख्याता तोये नाप्यायते वै जगत् ॥२०॥
हविष्मान्सुकृतः सत्यो जयो मूर्तिस्तदा द्विजाः ॥ सुवासन विरुद्धाद्या देवाः शंभुः सुरेश्वरः ॥२१॥ विष्वक्सेनो विषूच्यां तु शंभोः सख्यं करिष्यति
जातः स्वांशेन भगवान्गृहे विश्वसृजो विभुः ॥२२॥ मनुर्वै धर्मसावर्णिरेकादशम आत्मवान् ॥ अनागतास्तत्सुताश्च सत्यधर्मादयो दश ॥२३॥
विहंगमाः कामगमा निर्वाणरुचयः सुराः ॥ इंद्रश्च वैधृतिस्तेषामृषयश्चारुणादयः ॥२४॥ आर्यकस्य सुतस्तत्र धर्मसेतुरिति स्मृतः ॥ वैधृ
तायां हरेरंशस्त्रिलोकीं धारयिष्यति ॥२५॥ भविता रुद्रसावर्णी राजन्द्वादशमो मनुः ॥ देववानुपदेशश्च देवश्रेष्ठादयः सुताः ॥२६॥ ऋत
धामा च तत्रेंद्रो देवाश्च हरितादयः ॥ ऋषयश्च तपोमूर्तिस्तपस्व्याग्नीध्रकादयः ॥२७॥ स्वधामाख्यो हरेरंशः साधयिष्यति तन्मनोः ॥ अंतरं सत्य
सहसः सूनृतायाः सुतो विभुः ॥२८॥ मनुस्त्रयोदशो भाव्यो देवसावर्णिरात्मवान् ॥ चित्रसेनविचित्राद्या देवसावर्णिदेहजाः ॥२९॥ देवाः सुकर्म
सुत्रामसंज्ञा इंद्रो दिवस्पतिः ॥ निर्मोकतत्त्वदर्शाद्या भविष्यंत्यृषयस्तदा ॥३०॥ देवहोत्रस्य तनय उपहर्ता दिवस्पतेः ॥ योगेश्वरो हरेरंशो ह्य
त्यांसंभविष्यति ॥३१॥ मनुर्वा इंद्रसावर्णिश्चतुर्दशम एष्यति ॥ उरुगंभीरबुद्ध्याद्या इंद्रसावर्णिवीर्यजाः ॥३२॥

सत्यसहः सूनृतायाश्च सुतः सन् ॥ दिवस्पतेरिंद्रस्योपहर्त्ता संपादकः संभविष्यति ॥ ७ ॥ ॥ श्रीगोपीनाथाय नमः ॥ श्रीकृष्णाय नमः

तत्र तावद्बलेस्त्रिलोकीमपहर्तुं या आदिहेतुं कृतवानिति वक्तुं ब्राह्मणाराधनफले नवलेरकां ३ एवं स्वर्गविजयक्रममाह ॥ पराजितश्रीरित्यादिना यावदध्या
यसमाप्तेः ॥ युद्धे पराजितश्रीर्येन इन्द्रेण असुभिश्च त्याजितः सन् भृगून् भृगोर्वंश्यान् शुक्रादीन् महात्मा उदाराचित्तः । आत्मानं निवेदनेनार्पणेन ॥
त्रिणाकं स्वर्गं जेतुमिच्छंतं ॥ विश्वजिता यागेनायाजयन् ॥ महाभिषेकेण ऐंद्रेण ॥ वह्नेर्वक्ष्यमाणप्रसिद्धेन ॥ हर्यश्वस्येंद्रस्य ये तु रगास्तेषां निववर्णी

श्रीशुक उवाच ॥ पराजितश्रीरसुभिश्च हापितो हींद्रेण राजन् भृगुभिः सञ्जीवितः ॥ सर्वात्मना तानभजद्भृगून्बलिः शिष्यो महात्मार्थनि
वेदनेन ॥२॥ तं ब्राह्मणा भृगवः प्रीयमाणा अयाजयन् विश्वजिता त्रिणाकं ॥ जिगीषमाणं विधिनाभिषिच्य महाभिषेकेण महानुभावाः
॥३॥ ततो रथः कांचनपट्टनद्धो हयाश्च हर्यश्वतुरंगवर्णाः ॥ ध्वजश्च सिंहेन विराजमानो हुताशनादास हविर्भिरिष्टात् ॥४॥ धनुश्च दिव्यं
पुरटोपनद्धं तूणावरिक्तौ कवचं च दिव्यं ॥ पितामहस्तस्य ददौ च मालामम्लानपुष्पां जलजं च शुक्रः ॥५॥ एवं स विप्रार्जितयोधनार्थस्तैः क
ल्पितस्वस्त्ययनोऽथ विप्रान् ॥ प्रदक्षिणीकृत्य कृतप्रणामः प्रह्लादमामंत्र्य नमश्चकार ॥६॥ अथारुह्य रथं दिव्यं भृगुदत्तं महारथः ॥ सुस्रग्धरो
ऽथ संनह्य धन्वी खड्गी धृतेषुधिः ॥७॥ हेमांगदलसद्बाहुः स्फुरन्मकरकुंडलः ॥ रराज रथमारूढो धिष्ण्यस्थ इव हव्यवाट् ॥८॥ ॥ ॥

हरितो [illegible] येषां ॥ पुरटं सुवर्णं ॥ तूणौ विबुधौ अरिक्तौ ॥ अक्षयशरौ ॥ पितामहः प्रह्लादः ॥ जलजं शंखं ॥ विप्रैरर्जितः संपादितो योधनार्थो युद्धोपकरणो यस्य ॥ तैरे
तैरेव कल्पितं स्वस्त्ययनं मंगलवाचनादि यस्य ॥ आमंत्र्य आपृष्ट्वा ॥ अथारुह्य रराजेति द्वयोरन्वयः ॥ सुस्रग्धरः शोभनमालाधरः ॥ हेमांगदाभ्यां लसंतौ बा
हू यस्य धिष्ण्यस्थः वेदिस्थः प्रज्वलितः कुंडस्थः आहवनीय इति वा ॥८॥

प्रसंगरूपांतरैरपिजगद्यात्रासंप्रवर्त्तनमाह। ज्ञानमिति द्वाभ्यां। सिद्धाः सनकादयः ऋषयो याज्ञवल्क्यादयः। योगेशा दत्तात्रेयादयः तद्रूपः सन्। ज्ञानं कर्म च यो
गं च ब्रूते॥ प्रजेशा मरीच्यादयस्तेन रूपेण सर्गं करोतीति शेषः॥ स्वराड्वपुः राजमूर्त्तिः॥ सर्वेषामभावाय भवति। पृथग्विधा गुणाः शान्तोत्साहादयो यस्य॥ ना
मरूपात्मिकया मायया मोहितात्मभिरेभिर्जनैः नानादर्शनैः। शास्त्रैः स्तूयमानोऽपि निरूप्यमाणोऽपि नैव दृश्यत इत्यर्थः॥ प्रासंगिकं निरूप्य प्रस्तुतमेवोपसं 68

ज्ञानं चानुयुगं ब्रूते हरिः सिद्धस्वरूपधृक्॥ ऋषिरूपधरः कर्म योगं योगेशरूपधृक्॥८॥ सर्गं प्रजेशरूपेण दस्यून्हन्यात्स्वराड्वपुः
कालरूपेण सर्वेषामभावाय पृथग्गुणः॥९॥ स्तूयमानो जनैरेभिर्मायया नामरूपया॥ विमोहितात्मभिर्नानादर्शनैर्न च दृश्यते॥१०॥
एतत्कल्पविकल्पस्य प्रमाणं परिकीर्त्तितं॥ यत्र मन्वंतराण्याहुश्चतुर्दश पुराविदः॥११॥ इति श्रीभागवते महापुराणे अष्टमस्कंधे
मन्वंतरानुवर्णने चतुर्दशोऽध्यायः॥ ॥श्रीराजोवाच॥ बलेः पदत्रयं भूमेः कस्माद्धरिरयाचत॥ भूतेश्वरः कृपणवल्लब्धार्थोऽपि
बबंध तं १ एतद्वेदितुमिच्छामो महत्कौतूहलं हि नः॥ यज्ञेश्वरस्य पूर्णस्य बंधनं चाप्यनागसः॥२॥ ॥

हरति॥ एतत्कल्पविकल्पस्य। अवांतरकल्पस्य॥ इत्यष्टमे चतुर्दशः॥ ॥ बलिं पंचदशे विश्वजिता (अश्वमेधेन) चार्यैः स्व[illegible]जयत॥ ततो सोऽस्वर्गमजयद्भयाद्देवा निलिल्यु
रे॥१॥ अत्रेर्यते नवाध्याय्यां वामनचेष्टितं। निग्रहश्छलतो यत्र बलेर्भूयाननुग्रहः॥२॥ ईश्वरः स्वयं कृपणवत्कस्माद्धेतोरयाचत लब्धार्थो भूत्वापि तं
कस्माद्धेतोर्बबंध॥१॥

भा॰ टी॰ ३५ नित्यं वयस्तारुण्येन पंचवर्षो कुमार्यः यासां ताः रूपवत्कार्यः स्वलंकृताः स्त्रियः यत्र यस्यां भ्राजंते ॥ सुरस्त्रीणां केशेभ्यो विभ्रष्टानां नवसौगंधिकस्रजामामोदं ॥
भगवद्देभ्यो निर्गच्छता धूमेन ॥ सुरस्त्रियः अप्सरसः ॥ मुक्तामयैर्वितानैर्मणिहेममयैः केतुभिश्च ध्वजैः, नानापताकायुक्ताभिर्वलभीभिश्च विमानानां पुरोभ्यां (69)

यत्र नित्यवयोरूपाः श्यामा विरजवाससः ॥ भ्राजंते रूपवत्कार्यः अर्चिर्भिरिव वह्नयः ॥ १६ ॥ सुरस्त्रीकेशविभ्रष्टनवसौगंधिकस्रजं ॥ यत्रामोद
मुपादाय मार्ग आवाति मारुतः ॥ १७ ॥ हेमजालाक्षनिर्गच्छद्धूमेनागुरुगंधिना पांडुरेण प्रतिच्छन्नमार्गे यांति सुरस्त्रियः ॥ १८ ॥ मुक्तावितानैर्म
णिहेमकेतुभिर्नानापताकावलिभिः समावृतां ॥ शिखंडिपारावतभृंगनादितां वैमानिकस्त्रीकलगीतमंगलां ॥ मृदंगशंखानकदुंदुभि
स्वनैः सतालवीणामुरजर्ष्टिवेणुभिः ॥ नृत्यैः सवाद्यैरुपदेवगीतकैर्मनोरमां स्वप्रभया जितप्रभां ॥ २० ॥ यां न व्रजंत्यधर्मिष्ठाः खलाभूत
द्रुहः शठाः ॥ मानिनः कामिनो लुब्धा एभिर्हीना व्रजंति यत् ॥ २१ ॥ तां देवधानीं स वरूथिनीपतिर्बहिः समंतात् रुरुधे पृतन्यया ॥ आचार्यद
त्तं जलजं महास्वनं दध्मौ प्रयुंजन् भयमिंद्रयोषितां ॥ २२ ॥ मघवांस्तमभिप्रेत्य बलेः परममुद्यमं ॥ सर्वदेवगणोपेतो गुरुमेतदुवाच ह ॥ २३ ॥

भवेः आवृतां व्याप्तां वैमानिकस्त्रीणां कलगीतैर्मंगलं उपदेवानां गंधर्वादीनां गीतकैर्मनोरमां ॥ जिता प्रभा सा हाद्दी स्वाधिष्ठात्री देवता यया तां ॥ अ ३५
न्यैरजितप्रभामिति वा ॥ पाठांतरे जितार्यरुचः सूर्यादयो यया । यत्र्यां ॥ पृतन्यया सेनया ॥ छ ॥

तुल्यमैश्वर्यंबलंचश्रीश्चयेषांतेदैत्यपूर्वपैर्दैतोयपाविंतिद्वयोरन्वयः परिधीनदिष्टाः॥ अंशंगीतिसमन्वितां॥ पिंग्रामपसुरवंतथाविधांपुरीं अकस्मादेव
परित्यज्येंद्रदयः पलायिता इति वैराग्यपर्व॥ मिंद्रपुरीमनुवर्णयतिरम्याभितिस्त्रिर्द्धरेकादशभिः॥ उपवनानिफलपुष्पाणिनिकरानिवा॥ उद्याना
निपुष्पप्रधानानिह्रस्वानिवा तैरम्यां॥ कूजंतिविहंगमिथुनानियेषुगायंतोमत्तामधुव्रतायेषु॥ प्रवालादीनांकुरुभीरोयास्तुताः शाखायेषांतेचअम 70
रुमायेषुतैः॥ यत्रयासुसुरसेविताः प्रमदाः क्रीडंतिताः हंसादिकुलैराकुलाः व्याप्ताः नलिन्यः सरांसियत्रयेषुसंति तैरुपवनैरम्याभितिपूर्ववेति

तुल्यैश्वर्यकन्नश्राभिः स्वपूर्वैर्दैत्यपूर्वपैः॥ पिबद्भिरिवखंदंप्रिर्दद्भिः परिधीमिव॥९॥ वृतोकिंकरांनमकृतीमासुरींध्वजिनींविभुः॥ य
याविंद्रपुरींभूयांकंपयन्निवरोदसी॥१०॥ रम्यामुपवनोद्यानैः श्रीमद्भिर्नंदनादिभिः॥ कूजद्विहंगमिथुनैर्गायन्मत्तमधुव्रतैः॥११॥ प्रवा
लफलपुष्पोरुभारशाखामरद्रुमैः॥ हंससारसचक्राह्वकारंडवकुलाकुलाः॥१२॥ नलिन्योयत्रक्रीडंतिप्रमदाःसुरसेविताः॥ आका
शगंगयादेव्यावृतांपरिधिभूतया॥१३॥ प्राकारेणाग्निवर्णेनसाट्टालेनोन्नतेनच॥ रुक्मपट्टकपाटैश्चद्वारैःस्फटिकगोपुरैः॥ जुष्टांवि
भक्तप्रपथांविश्वकर्मविनिर्मितां॥ सभाचत्वररथ्याढ्यांविमानैर्न्यर्बुदैर्युतां॥ शृंगाटकैर्मणिमयैर्वज्रविद्रुमवेदिभिः॥१५॥ ॥ ॥

वान्वयः॥ किंचपरिखाभूतया आकाशगंगयावृतां॥ प्राकारेणासोवृतिंनचावृतां॥ अट्टालाः प्राकारोपरिरचितानिउन्नतानियुद्धस्थानानि तत्सहितेन रुक्मप
ट्टानिकपाटानियेषुतैर्द्वारैरवांतरैः स्फटिकमयैर्गोपुरैश्चपुरद्वारैः जुष्टां॥ विभक्ताः प्रपथाराजमार्गायस्यां॥ सभाउपवेशस्थानानि॥ चत्वराणिअंगनानि
रथ्याउपमार्गास्तैराढ्यांसंपन्नां॥ न्यर्बुदंदशकोटयः तैर्गणनीयैरनंतैर्विमानैर्युतां॥ वज्रविद्रुममय्योवेद्योयेषुतैः शृंगाटकैश्चतुष्पथैर्युतां॥ छ॥

भा॰अ॰ षोडशे पुत्रनाशेन शोचंत्यास्त्वदितेः पतिः प्रार्थितः कश्यपः प्राह पयोव्रतमुदीर्यते ॥१॥ इदानीं श्रीवामनावतारप्रसंगमाह ॥ एवमित्यादिना याव-
३६ त्समाप्तिः ॥ नष्टेषु अदृष्टेषु सत्सु ॥ सः कश्यपः पत्नीमिदमाह । दीनवदनां तथापि कमलस्य वक्तुधा विकल्पयन्नपृच्छति । अथ भद्रमिति सप्तभिः । क्षेम-
डे मृत्योः छंदमिच्छामनुवर्त्तंत इति तथा मृत्युवशवर्त्तिनो जनस्येत्यर्थः ॥ हे गृहमेधिनि अपि वा किं वा गृहेषु धर्मादेः किंचिदकुशलमिति काकाप

श्रीशुक उवाच ॥ एवं पुत्रेषु नष्टेषु देवमातादितिस्तदा ॥ हृते त्रिविष्टपे दैत्यैः पर्यतप्यदनाथवत् ॥१॥ एकदा कश्यपस्तस्या आश्रमं भग-
वानगात् । निरुत्सवं निरानंदं समाधेर्विरतश्चिरात् ॥२॥ स पत्नीं दीनवदनां कृतासनपरिग्रहः ॥ सभाजितो यथान्यायमिदमाह कुरूद्व-
ह ॥३॥ अप्यभद्रं न विप्राणां भद्रे लोकेऽधुनागतं ॥ न धर्मस्य न लोकस्य मृत्योः छंदानुवर्त्तिनः ॥४॥ अपि वाकुशलं किंचिद्गृहेषु गृहमेधि-
नि ॥ धर्मस्यार्थस्य कामस्य यत्र योगो ह्ययोगिनां ॥५॥ अपि वातिथयोऽभ्येत्य कुटुंबासक्तया त्वया ॥ गृहादपूजिता याताः प्रत्युत्थानेन वा क्व-
चित् ॥६॥ गृहेषु येष्वतिथयो नार्चिताः सलिलैरपि ॥ यदि निर्यांति ते नूनं फेरुराजगृहोपमाः ॥७॥ अप्यग्नयस्तु वेलायां न हुता हविषा सति ॥
त्वयोद्विग्नधिया भद्रे प्रोषिते मयि कर्हिचित् ॥८॥ यत्पूजया कामदुघान्याति लोकान्गृहान्वितः ॥ ब्राह्मणोऽग्निश्च वै विष्णोः सर्वदेवात्मनो मु-
खं ॥९॥ अपि सर्वे कुशलिनस्तव पुत्रा मनस्विनि ॥ लक्षयेऽस्वस्थमात्मानं भवत्या लक्षणैरहं ॥१०॥

अः । यत्र येषु गृहेषु अयोगिनामपि योगस्य धर्मादि नायोगफलं भवति ॥ किंच । त्वया अपूजिता एव अभ्येत्य गृहात् याताः ॥ नार्चिता अनर्चिताः संतो यदि ३६
निर्गच्छंति (तैःगृहाः) फेरुराजः सृगालराजा तदीयविवरतुल्याः ॥ वेलायां होमकाले कर्हिचिन्न हुताः ॥ किं भवत्या आत्मानं मनः अस्वस्थमप्रकृतिस्थं लक्षयामि मुख-
म्लान्यादिभिः लक्षयामि ॥७॥

केनहेतुनाएवं तेजसा ऊर्जितआसीत॥ प्रतिव्योढुं अपाकर्तुं॥ यतः कारणादेतस्य ओजआदियतः ओजादेः॥ एतस्यसमुद्यमः॥ उपभृतं संचितं तत्रोचितं मंत्रमाह॥
तस्माद्यूयं त्रिविष्टपमुत्सृज्य निलयमदर्शनं यात यतः कालात॥ केनास्य विपर्ययः स्यादितितत्कालं प्रतीक्षमाणा इति॥ विप्राणां बलेन उदर्कः उत्तरोत्तरमधिकं फलं यस्य

भगवन्नुद्यमो भूयान् बलेर्नः पूर्ववैरिणः॥ अविषह्यमिमं मन्ये केनासीत्तेजसोर्जितः॥२४॥ नैनं कश्चित्कुतो वापि प्रतिव्योढुमधीश्वरः॥ पिबन्निव मुखे
नेदं लिहन्निव दिशो दश॥२५॥ दहन्निव दिशो दृग्भिः संवर्त्ताग्निरिवोत्थितः॥ ब्रूहि कारणमेतस्य दुर्द्धर्षत्वस्य मद्रिपोः॥२६॥ ओजः सहो बलं तेजो यत
एतत्समुद्यमः॥ श्रीगुरुरुवाच॥ जानामि मघवन् शत्रोरुन्नतेरस्य कारणं॥ शिष्यायोपभृतं तेजो भृगुभिर्ब्रह्मवादिभिः॥२७॥ भवद्विधो भ
वान्वापि वर्जयित्वेश्वरं हरिं॥ नास्य शक्तः पुरः स्थातुं कृतान्तस्य यथा जनाः॥२८॥ तस्मान्निलयमुत्सृज्य यूयं सर्वे त्रिविष्टपं॥ यात कालं प्रतीक्षं
तो यतः शत्रोर्विपर्ययः॥२९॥ एष विप्रबलोदर्कः संप्रत्यूर्जितविक्रमः॥ तेषामेवापमानेन सानुबन्धो विनंक्ष्यति॥३०॥ एवं सुमंत्रितार्थास्ते गु
रुणार्थानुदर्शिना॥ हित्वा त्रिविष्टपं जग्मुर्गीर्वाणाः कामरूपिणः॥३१॥ देवेष्वथ निलीनेषु बलिर्वैरोचनः पुरीं॥ देवधानीमधिष्ठाय वशं नि
न्ये जगत्त्रयं॥३२॥ तं विश्वजयिनं शिष्यं भृगवः शिष्यवत्सलाः॥ शतेन हयमेधानामनुव्रतमयाजयन्॥३३॥ ततस्तदनुभावेन भुवनत्रयवि
श्रुतां॥ कीर्त्तिं दिक्षु वितन्वानः स रेज उडुराडिव॥३४॥ बुभुजे च श्रियं स्वृद्धां द्विजदेवोपलंभितां॥ कृतकृत्यमिवात्मानं मन्यमानो महामनाः॥३५॥
इति श्रीभागवते महापुराणे ऽष्टमस्कंधे पंचदशोध्यायः॥१५॥

सः
स्यः सुमंत्रितः अर्थः कार्यं येषां ते निलयं जग्मुः एवं शतमनिं जयदं स्थिरां कर्तुमश्वमेधैरयाजयन्॥ अनुव्रतं अनुवर्त्तिनं द्विजदेवैर्ब्राह्मणैरुपलंभितां प्रापितां
इत्यष्टमे पंचदशः॥१५॥

भा॰ग्र॰ यथा च मे मनोरथं विदध्यात् यथा च मे आशु तुष्यति तथा तत्सेवाप्रकारमादिश ॥ भगवान् पृष्टः पद्मजो मे यद्व्रतमाह ॥ एतन्मे वक्ष्यामीत्यन्वयः ॥ अमले
३२ शुक्ले तत्रादौ पूर्वेद्युः कृत्यमाह ॥ सिनीवाल्यामित्यादिना ब्रह्मचार्यथ तत्राद्यामितंते नयंथेन ॥ यदि लभ्येत तर्हि क्रोडविदीर्णया वराहोत्खातया वन्य ७३
आलिप्य तत्र मंत्रः त्वं देवीति हे देवि त्वं रसायाः उद्धृतासि ॥ निर्वर्तितः आत्मनियमो नित्यनैमित्तिको येन ॥ तत्रावाहनादौ नव मंत्रानाह ॥ नमस्

अदितिरुवाच ॥ केनाहं विधिना ब्रह्मन् उपस्थास्ये जगत्पतिं ॥ यथा मे सत्यसंकल्पो विदध्यात्स मनोरथं ॥ २२ ॥ आदिश त्वं द्विजश्रे
ष्ठ विधिं तदुपधावनं ॥ आशु तुष्यति मे देवः सीदंत्याः सह पुत्रकैः ॥ २३ ॥ श्रीकश्यप उवाच ॥ एतन्मे भगवान्पृष्टः प्रजाकामस्य
पद्मजः ॥ यदाह ते प्रवक्ष्यामि व्रतं केशवतोषणं ॥ २४ ॥ फाल्गुनस्यामले पक्षे द्वादशाहं पयोव्रतः ॥ अर्चयेदरविंदाक्षं भक्त्या परम
यान्वितः ॥ २५ ॥ शिनीवाल्यां मृदालिप्य स्नायात् क्रोडविदीर्णया ॥ यदि लभ्येत वै स्रोतस्येतं मंत्रमुदीरयेत् ॥ २६ ॥ त्वं देव्यादिवराहे
ण रसायाः स्थानमिच्छता ॥ उद्धृतासि नमस्तुभ्यं पाप्मानं मे प्रणाशय ॥ २७ ॥ निर्वर्तितात्मनियमो देवमर्चेत्समाहितः ॥ अर्चायां
स्थंडिले सूर्ये जले वह्नौ गुरावपि ॥ २८ ॥ नमस्तुभ्यं भगवते पुरुषाय महीयसे ॥ सर्वभूतनिवासाय वासुदेवाय साक्षिणे ॥ २९ ॥
नमोऽव्यक्ताय सूक्ष्माय प्रधानपुरुषाय च ॥ चतुर्विंशद्गुणज्ञाय गुणसंख्यानहेतवे ॥ ३० ॥

३७

नमस्तुभ्यमिति पादार्घ्यादौ विशेषतस्तु द्वादशाक्षरं वक्ष्यति ॥ चतुर्विंशतिर्गुणास्तत्त्वानि जानातीति तथा ॥ तस्मै गुणसंख्यानहेतवे सांख्यप्रवर्त्त
काय ॥ ७ ॥

अत्रास्य कारणमस्तीति वक्तुं नृपत्नम भद्रादिकं नास्तीत्याह भद्रमिति द्वाभ्यां ॥ हे गृहमेधिन् त्रिवर्गस्य परं क्षेत्रं उद्भवस्थानं त्रिवर्गोपि यथावद्वर्तत इत्यर्थः ॥
भगवतस्तवानुध्यानं यन्मया क्रियते तस्मात् । अग्नयोतिथय इत्यादि सर्वं न रिष्यति न क्षीयते ॥ प्रस्तुतं विज्ञापयितुमाह को न्विति ॥ संपाद्यं क-

अदितिरुवाच ॥ भद्रं द्विजगवां ब्रह्मन्धर्मस्यास्य जनस्य च । त्रिवर्गस्य परं क्षेत्रं गृहमेधिन्गृहा इमे ॥ १२ ॥ अग्नयोतिथयो भृत्या भिक्ष-
वो ये च लिप्सवः ॥ सर्वं भगवतो ब्रह्मन्ननुध्यानान्न रिष्यति ॥ १३ ॥ को नु मे भगवन्कामो न संपद्येत मानसः । यस्या भवान्प्रजाध्यक्ष
एवं धर्मान्प्रभाषते ॥ १४ ॥ तवैव मारीच मनःशरीरजाः प्रजा इमाः सत्वरजस्तमोजुषः । समो भवांस्तास्वसुरादिषु प्रभो तथापि भक्तं
भजते महेश्वरः ॥ १५ ॥ तस्मादीश भजंत्या मे श्रेयश्चिंतय सुव्रत । हृतश्रियो हृतस्थानान्सपत्नैः पाहि नः प्रभो ॥ १६ ॥ परैर्विवासिता सा-
हं मग्ना व्यसनसागरे । ऐश्वर्यं श्रीर्यशः स्थानं हृतानि प्रबलैर्मम ॥ १७ ॥ यथा तानि पुनः साधो प्रपद्येरन्ममात्मजाः । तथा विधेहि कल्याणं धि-
या कल्याणकृत्तम ॥ १८ ॥ श्रीशुक उवाच ॥ एवमभ्यर्थितोदित्या कस्तामाह स्मयन्निव । अहो मायाबलं विष्णोः स्नेहबद्धमिदं जगत् ॥ १९ ॥ क्व देहो
भौतिकोनात्मा क्व चात्मा प्रकृतेः परः । कस्य के पतिपुत्राद्या मोह एव हि कारणं ॥ २० ॥ उपतिष्ठस्व पुरुषं भगवंतं जनार्दनं । सर्वभूतगुहावासं
वासुदेवं जगद्गुरुं ॥ २१ ॥ स विधास्यति ते कामान्हरिर्दीनानुकंपितः । अमोघा भगवद्भक्तिर्नेतरेति मतिर्मम ॥ २२ ॥

ममाह ॥ तवैवेति चतुर्भिः ॥ सपत्नैर्दैत्यैर्हृता श्रीर्येषां हृतं स्थानं येषामिति पुत्रानभिप्रेत्यैकवचनं ॥ कश्यपः प्रथमं तावत्पुत्रस्नेहं त्याजयितुं विस्मयव्या-
जेन तत्त्वमुपदिशति ॥ अहो इति सार्धेन ॥ अत्रापरितुष्यंतीं प्रत्याह ॥ उपतिष्ठस्वेति द्वाभ्यां ॥ नन्वेवंभूतकामप्राप्तिहेतुर्देवतांतरसेवा प्रसिद्धा तत्राह
अमोघेति ॥ ७ ॥

पयसि स्थं तं पक्वं पायसं मूलविद्यया ददद्या हरेरेव ॥ पूर्वोक्ताभिरथैताभिस्त्वस्तुतिभिः ॥ तस्य शेषं निर्माल्यं द्वौ अवशेषो येषां तान् असंभवे द्वावपि भोजयेदिति
स्थं तं पयसि नैवेद्यं शाल्यन्नं विभवे सति ॥ ससर्पिः सगुडं दत्वा जुहुयान्मूलविद्यया ॥ ४१ ॥ निवेदितं तद्भक्ताय दद्याद्भुंजीत वा स्वयं दत्वाचमनमर्
र्घ्यं चाताम्बूलं च निवेदयेत् ॥ ४२ ॥ जपेदष्टोत्तरशतं स्तुवीत स्तुतिभिः प्रभुं ॥ कृत्वा प्रदक्षिणां भूमो प्रणमेद्दण्डवन्मुदा ॥ ४३ ॥ कृत्वा शिरसि तच्छे
षं देवमुद्वासयेत्ततः ॥ द्व्यवरान् भोजयेद्विप्रान् पायसेन यथोचितं ॥ ४४ ॥ भुंजीत तैरनुज्ञातः शेषं सेष्टः समाहितः ॥ ब्रह्मचार्यथ तद्रात्र्यां श्वो
भूते प्रथमेऽहनि ॥ ४५ ॥ स्नातः शुचिर्यथोक्तेन विधिना सुसमाहितः ॥ पयसा स्नापयित्वा चैयावद्व्रतसमापनं ॥ ४६ ॥ पयोभक्षो व्रतमि
दं चरेद्विष्ण्वर्चनादृतः ॥ पूर्ववज्जुहुयादग्निं ब्राह्मणांश्चापि भोजयेत् ॥ ४७ ॥ एवं त्वहरहः कुर्याद्द्वादशाहं पयोव्रतं ॥ हरेराराधनं होमम
र्हणं द्विजतर्पणं ॥ ४८ ॥ प्रतिपद्दिनमारभ्य यावच्छुक्लत्रयोदशी ॥ ब्रह्मचर्यमधःस्वप्नं स्नानं त्रिषवणं चरेत् ॥ ४९ ॥ वर्जयेदसदालापं
भोगानुच्चावचांस्तथा ॥ अहिंस्रः सर्वभूतानां वासुदेवपरायणः ॥ ५० ॥ त्रयोदश्यामथो विष्णोः स्नपनं पंचकैर्विभोः ॥ कारयेच्छास्त्रदृष्टेन वि
धिना विधिकोविदैः ॥ ५१ ॥ पूजां च महतीं कुर्याद्वित्तशाठ्यविवर्जितः ॥ चरुं निरूप्य पयसि शिपिविष्टाय विष्णवे ॥ ५२ ॥ सूक्तेन तेन पुरुषं य
जेत सुसमाहितः ॥ नैवेद्यं चापिगुणवद्दद्यात्पुरुषतुष्टिदं ॥ ५३ ॥ आचार्यं ज्ञानसंपन्नं वस्त्राभरणधेनुभिः ॥ तोषयेदृत्विजश्चैव तद्विद्ध्याराध
नं हरेः ॥ ५४ ॥ भोजयेत्तान् गुणवता सदन्नेन शुचिस्मिते ॥ अन्यांश्च ब्राह्मणान् शक्त्या ये च तत्र समागताः ॥ ५५ ॥ ३८

र्थः ॥ सम्मानितैस्तैरनुज्ञातः सन् ॥ सेष्टः बंधुभिः सहितः ॥ तस्यां रात्र्यां ब्रह्मचारी सन् ॥ श्वोभूते प्रभाते सति ॥ पयसा एव भक्तं आहारो यस्य ॥ अ
धः स्वप्नं शयानं पंचकैः पंचामृतैः ॥ ७ ॥

मार्गे मुकुंदवदा
लीनइतिपाठः॥

76

एवं स्नात्वा न्यतो नत्वा गु णावतारा नष्ट णमति त्रिभिः॥ मंत्रादौ मंत्रो ऋषिदृष्टरूपेण विश्लोः प्रणमो नम इति॥ द्वि शीर्ष्णेयस्यत्रयः पादायस्य तंतवे फलविस्तार
काय॥ त्रय्यां विद्याया मात्मायस्यैतित्रिधा वेद मूर्तय स्यार्धोऽक्ष ऋः॥ तथा च मंत्रः॥ चत्वारि शृंगा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य त्रिधा बद्धो वृषभो रो
रवीति महो देवो मर्त्यानाविवेशेति॥ मार्गे मुकुंदवदालीनः सोयं जगती यथा यथं॥ विश्वस्तुयदृरूपेणात्तयते नेन तत्वतः॥ तथा च यास्कः॥ चत्वा
रि शृंगेति वेदा एवोक्ता स्त्रयो स्यपादा इति सवनानि त्रीणि द्वे शीर्षे प्रायणीयोदयनीये सप्तहस्तासः सप्तछंदांसि त्रिधा बद्धः त्रेधा बद्धो मंत्रब्राह्मणकल्पैः

नमो द्विशीर्ष्णे त्रिपदे चतुःशृंगाय तंतवे॥ सप्तहस्ताय यज्ञाय त्रयी विद्यात्मने नमः॥ ३१॥ नमः शिवाय रुद्राय नमः शक्तिधराय च॥ सर्वविद्याधिप
तये भूतानां पतये नमः॥ ३३॥ नमो हिरण्यगर्भाय प्राणाय जगदात्मने॥ योगैश्वर्यशरीराय नमस्ते योगहेतवे॥ ३४॥ नमस्त आदिदेवाय साक्षि
भूताय ते नमः॥ नारायणाय ऋषये नराय हरये नमः॥ ३५॥ नमो मरकतश्याम वपुषे धिगतश्रिये॥ केशवाय नमस्तुभ्यं नमस्ते पीतवाससे॥
३६॥ त्वं सर्ववरदः पुंसां वरेण्यवरदर्षभ॥ अतस्ते श्रेयसे धीराः पादरेणुमुपासते॥ ३७॥ अन्ववर्तंत यं देवाः श्रीश्च तत्पादपद्मयोः॥ स्पृहयं
त इवामोदं भगवान्मे प्रसीदतां॥ ३८॥ एतैर्मंत्रैर्हृषीकेशमावाहनपुरस्कृतं॥ अर्चयेच्छ्रद्धया युक्तः पाद्योपस्पर्शनादिभिः॥ ३९॥ अर्चित्वा गंध
माल्याद्यैः पयसा स्नापयेद्विभुं॥ वस्त्रोपवीताभरणपाद्योपस्पर्शनैस्ततः॥ ४०॥ गंधधूपादिभिश्चार्चेद्द्वादशाक्षरविद्यया॥ ६॥ श्रीराम राम॥

वृषभो रोरवीति रोरवणं सवन क्रमेण ऋः धियैर्लुभिः साममियैर्दृ नमः धियः शंसंति यत्तुभिर्ययजंति सामभिः स्तुवंतीति॥ प्राणाय सूत्रात्मने॥ योगैश्वर्य
शरीरं यस्य अधिगता प्राप्ता श्रीर्येन तस्मै॥ तत्पादपद्मयोरामोदं स्पृहयंत इव देवाः श्रीश्च यमन्ववर्तंत स मे प्रसीदतु॥ आवाहनेन पुरस्कृतं सन्मानितं॥ ६॥

तृ०ए भा०अ० ३९ तुष्टावापि वतीवोद्धी तमागेति च कियामेरात् ॥ स्वपक्षपरस्य द्विरुक्तिर दोषः ॥ अयत्नेतो विनिर्जितदैत्यान्त्यूर्जितानपि ...कान् नरदितुमीशस्त्वमितस्तोद
दिति स्त्रियिः ॥ यज्ञेशत्वादिदशभिः संबोधनैः स्तोतुं शक्यं । किमपि न स्फूर्तीति वदंती प्रार्थयते ॥ शं नः कृधि कुरु ॥ यतो दीनानां नाथोसि त्वं तीर्थश्रवः की
र्तिर्यस्य ॥ श्रवणमेव मंगलं यस्य तन्नामधेयं यस्य ॥ आपन्नानां शरणंगतानां लोकानां वृजिनोपशमनाय उदयो यस्य ॥ भूम्ने महते नमः । महत्त्वे हे
तवः ॥ विश्वाय विश्वस्य भवनस्थितिसंयमनार्थं स्वैरं गृहीताः पुरुशक्तेर्मायायागुणा येन तस्मै ॥ तथापि स्वस्थाय अप्रच्युतस्वरूपाय ॥ कुतः शश्व

त्यामाशनैर्गदया गिरा हरिं तुष्टाव सा देव्यदितिः कुरूद्वह ॥ उद्वीक्षती सा पिबतीव चक्षुषा रमापतिं यज्ञपतिं जगत्पतिं ॥ ६ ॥ अदितिरुवाच ॥
यज्ञेश यज्ञपुरुषाच्युत तीर्थपाद तीर्थश्रवः श्रवणमंगलनामधेय ॥ आपन्नलोकवृजिनोपशमोदयाद्य शं नः कृधीश भगवन्नसि दीननाथः ॥
७ ॥ विश्वाय विश्वभवनस्थितिसंयमाय स्वैरं गृहीतपुरुशक्तिगुणाय भूम्ने ॥ स्वस्थाय शश्वदुपबृंहितपूर्णबोधव्यापादितात्मतमसे हरये नम
स्ते ॥ ८ ॥ आयुः परं वपुरभीष्टमतुल्यलक्ष्मीर्द्योर्भूरसाः सकलयोगगुणास्त्रिवर्गः ॥ ज्ञानं च केवलमनंत भवंति तुष्टात्त्वत्तो नृणां किमु सपत्नजया
दिराशीः ॥ ९ ॥ श्रीशुक उवाच ॥ अदित्यैवं स्तुतो राजन् भगवान् पुष्करेक्षणः ॥ क्षेत्रज्ञः सर्वभूतानामिति होवाच भारत ॥ १० ॥

दुपबृंहितः नित्योर्जितो यः पूर्णो बोधस्तेन व्यापादितं निरस्तं आत्मनि तमो मायालक्षणं येन तस्मै ॥ अस्मदीयमनोरथपूरणमीषत्करमेव त ३९
वत्ति कैमुत्यन्यायेनाह ॥ आयुः परं ब्रह्मायुः पुनरपि द्यौश्च भूश्च रसातलं च द्यौर्भूरसाः ॥ द्यौरिति पृथक् पाठे भूश्च रसाश्च विलस्वर्गा इति विग्रहः
रसेति पाठे त्रीणि पदानि ॥ सकला योगगुणा अणिमादयः ॥ क्षेत्रज्ञः अंतर्यामी ॥ ७ ॥

मयाचतेसमुदाहृतं ॥ सर्वयज्ञाख्योयंयज्ञःसर्वव्रतमितिस्मृतमेतद्व्रतं ॥ अश्वमेधेऽष्टाः ॥ ततःसप्तदशेऽहोदिताकृतेतस्मिन्व्रतेहरिः ॥ तत्कामपूर

दक्षिणांगुरवेदद्यादृत्विग्भ्यश्चयथार्हतः ॥ अन्नाद्येनाश्वपाकांश्चप्रीणयेत्समुपागतान् ५३ भुक्तवत्सुचसर्वेषुदीनांधकृपणेषुच ॥ विष्णोस्त
त्प्रीणनंविद्यान्भुंजीतसहबंधुभिः ॥ ५४ नृत्यवादित्रगीतैश्चस्तुतिभिःस्वस्तिवाचकैः ॥ कारयेत्तत्कथाभिश्चपूजांभगवतोन्वहं ॥ ५५ एतत्पयोव्र
तंनामपुरुषाराधनंपरं ॥ पितामहेनाभिहितंमयातेसमुदाहृतं ॥ ५६ त्वंचानेनमहाभागेसम्यक्चीर्णेनकेशवं ॥ आत्मनाशुद्धभावेननिय
तात्माभजाव्ययं ॥ ५७ अयंवैसर्वयज्ञाख्यःसर्वव्रतमितिस्मृतं ॥ तपःसारमिदंभद्रेदानंचेश्वरतर्पणं ॥ ५८ तएवनियमाःसाक्षात्तएवचय
मोत्तमाः ॥ तपोदानंव्रतंयज्ञोयेनतुष्यत्यधोक्षजः ॥ ५९ ॥ तस्मादेतद्व्रतंभद्रेप्रयताश्रद्धयाचर ॥ भगवान्परितुष्टस्तेवरानाशुविधास्यति ॥ ६०
इतिश्रीभागवतेमहापुराणेअष्टमस्कंधेषोडशोध्यायः ॥ श्रीशुकउवाच ॥ इत्युक्तासादितीराजन्स्वभर्त्राकश्यपेनवै ॥ अन्वतिष्ठद्व्रतमिदं
द्वादशाहमतंद्रिता ॥ १ चिंतयंत्येकयाबुद्ध्यामहापुरुषमीश्वरं ॥ प्रगृह्येंद्रियदुष्टाश्वान्मनसाबुद्धिसारथिः ॥ २ मनश्चैकाग्रयाबुद्ध्याभगव
त्यखिलात्मनि ॥ वासुदेवेसमाधायचचारहपयोव्रतं ॥ ३ तस्याःप्रादुरभूत्तातभगवानादिपूरुषः ॥ पीतवासाश्चतुर्बाहुःशंखचक्रगदाधरः ४
तंनेत्रगोचरंवीक्ष्यसहसोत्थायसादरं ॥ ननामभुविकायेनदंडवत्प्रीतिविह्वला ॥ ५ सोत्थायबद्धांजलिरीडितुंस्थितानोत्सेहआनंदजलाकु
लेक्षणा ॥ बभूवतूष्णींपुलकाकुलाकृतिस्तद्दर्शनात्युत्सवगात्रवेपथुः ॥ ६ ॥

एणयासैतत्पुत्रोमदितार्यते ॥ १ ॥ प्रीतिविह्वलत्वाद्देवस्याबद्धांजलिःसतीस्थिताकेवलंईडितुंपुनर्नोत्सेहेनशशाक ॥ अपितुतूष्णींबभूव कथंभूता आनं
दजलेनआकुलेईक्षणेयस्याः पुलकैराकुलाआकृतिर्देहोयस्याः ॥ तस्यदर्शनेनयोत्युत्सवस्तेनगात्रेवेपथुःकंपोयस्याः ॥ ७ ॥

भा॰ अ॰ ४० प्रभोर्हरेरात्मनि जन्म लब्ध्वा || अवितथमीक्षणं दृष्टिर्यस्य सः || अनिलो यथा सर्वत्र समाविष्टो दारुण्येवानुद्भूतमग्निमाधत्ते एवं स्वयं पुत्र
पुत्रमोपि तेजः फलरूपं वीर्यमाधत्तेत्यर्थः || अधिष्ठितं अधिष्ठाय स्थितं || समीडे तुष्टावेत्यर्थः || अदितेरेव पूर्वस्मिन् जन्मनि पृश्निरिति ना
म तस्या गर्भाय || वेदा गर्भे यस्य यद्वा वेदानां गर्भाय वेदेषु प्रकाशमानायेत्यर्थः || त्रयो लोका नाभौ यस्य सः त्रिनाभः तस्मै त्रयाणां लोकानां पृष्ठे
उपरि स्थिताय शिपिविष्टाय शिपयो जीवाः तेष्वंतर्यामितया प्रविष्टाय || यज्ञो वै विष्णुः पशवः शिपिर्यज्ञ एव पशुषु प्रतितिष्ठतीति श्रुतेः || यद्वा

श्रीशुक उवाच || एतावदुक्त्वा भगवांस्तत्रैवांतरधीयत || अदितिर्दुर्लभं लब्ध्वा हरेर्जन्मात्मनि प्रभोः || १९ || उपधावत्पतिं भक्त्या परया कृत
कृत्यवत् || स वै समाधियोगेन कश्यपस्तदबुध्यत || २० || प्रविष्टमात्मनि हरेरंशं ह्यवितथेक्षणः || सोऽदित्यां वीर्यमाधत्त तपसा चिरसंभृतं
|| २१ || समाहितमना राजन् दारुण्यग्निं यथानिलः || अदितेर्धिष्ठितं गर्भं भगवंतं सनातनं || २२ || हिरण्यगर्भो विज्ञाय समीडे गुह्यनामभिः ||
ब्रह्मोवाच || जयोरुगाय भगवन्नुरुक्रम नमोस्तु ते || नमो ब्रह्मण्यदेवाय त्रिगुणाय नमो नमः || २४ || नमस्ते पृश्निगर्भाय वेदगर्भाय वेधसे ||
त्रिणाभाय त्रिपृष्ठाय शिपिविष्टाय विष्णवे || २५ || त्वमादिरंतो भुवनस्य मध्यमनंतशक्तिं पुरुषं यमाहुः || कालो भवानाक्षिपतीश विश्वं
स्रोतो यथांतः पतितं गभीरं || २६ || त्वं वै प्रजानां स्थिरजंगमानां प्रजापतीनामसि संभविष्णुः || दिवौकसां देव दिवश्च्युतानां परायणं
णं नौरिव मज्जतोऽप्सु || २७ || इति श्रीभागवते महापुराणे अष्टमस्कंधे वामनावतारे सप्तदशोध्यायः || १७ || || राम || ४०

शिपयो रश्मयस्तैर्वेष्टितायेत्यर्थः || तथापि विष्णवे व्यापिने || अंतःपतितं तृणादि यथा गंभीरं स्रोत आक्षिपते आकर्षति तथा कालात्मा
भवान् विश्वमाक्षिपति || संभविष्णुः उत्पादनशीलोसि || अयं भावः || न ह्येवं तस्य तव जन्मादिसंभवः किंतु देवानां प्रजापतीनां पर
माश्रयत्वेन तत्कार्य साधनायावतारोयं || अतस्त्वं स्वर्गच्युतान्पुनः स्वर्गे स्थापयेति || इत्यष्टमे सप्तदशोध्यायः || १७ || || ||
ते

सपत्नैर्हृताः श्रियो येषां स्वधामतश्च्यावितानां च पुत्राणां संबंधि यत् तद्भवत्या चिरमाकांक्षितं मया विज्ञातं ॥ कांक्षितमेवाह ॥ तान् विनिर्जित्य प्रतिलब्धजयश्रीभिः पुत्रैः ॥ सह उपासितुं एकत्र स्थातुमिच्छसि ॥ प्रत्याहृतयशःश्रियः आत्मजान् ॥ अपारणीयाः अनतिक्रमणीयाः, यद्यस्मात् अनुकूलईश्वरः कालो येषां ते विप्रैः गुप्ता रक्षिताः ॥ अनुकूलैरीश्वरैः समर्थैः विप्रैः गुप्ता इति वा ॥ मम मया चिन्त्य एव तत्र हेतुः संतोषितस्य त्वदिष्ट

श्रीभगवानुवाच देवमातर्भवत्या मे विज्ञातं चिरकांक्षितं ॥ यत्सपत्नैर्हृतश्रीणां च्यावितानां स्वधामतः ॥ १० ॥ तान्विनिर्जित्य समरे दुर्मदानसुरर्षभान् ॥ प्रतिलब्धजयश्रीभिः पुत्रैरिच्छस्युपासितुं ॥ ११ ॥ इंद्रज्येष्ठैः स्वतनयैर्हतानां युधि विद्विषां ॥ स्त्रियो रुदंतीरासाद्य द्रष्टुमिच्छसि दुःखिताः ॥ १२ ॥ आत्मजान्सुसमृद्धांस्त्वं प्रत्याहृतयशःश्रियः ॥ नाकपृष्ठमधिष्ठाय क्रीडतो द्रष्टुमिच्छसि ॥ १३ ॥ प्रायोधुना तेसुरयूथनाथा अपारणीया इति देवि मे मतिः ॥ यत्तेनुकूलेश्वरविप्रगुप्ता न विक्रमस्तत्र सुखं ददाति ॥ १४ ॥ तथाप्युपायो मम देवि चिंत्यः संतोषितस्य व्रतचर्यया ते ॥ ममार्चनं नार्हति गंतुमन्यथा श्रद्धानुरूपं फलहेतुकत्वात् ॥ १५ ॥ त्वयार्चितश्चाहमपत्यगुप्तये पयोव्रतेनानुगुणं समीडितः ॥ स्वांशेन पुत्रत्वमुपेत्य ते सुतान्गोप्तास्मि मारीचतपस्यधिष्ठितः ॥ १६ ॥ उपधाव पतिं भद्रे प्रजापतिमकल्मषं ॥ मां च भावयती पत्यावेवंरूपमवस्थितं ॥ १७ ॥ नैतत्परस्मा आख्येयं पृष्टयापि कथंचन ॥ सर्वं संपद्यते देवि देवगुह्यं सुसंवृतं ॥ १८ ॥

श्रद्धानुरूपं श्रद्धानुसारेण फलहेतुत्वात् ॥ मारीचस्य तपसि अधिष्ठाय स्थितः सन् गोप्ताऽस्मि पालयिष्यामि ॥ अतः पतिमुपाधाव भजस्व ॥ देवानां गुह्यं रहस्यं ॥ सर्वं सुसंवृतं गुप्तं सत् संपद्यते सिध्यति ॥ ७ ॥

विशेषं तस्माद्यस्यां द्वादश्यां हरेर्जन्म तां तस्यां नाम प्रोक्तां विदुः ॥ तदा च मध्यंदिनगतः सविता आतिष्ठन् सा च द्वादशी विजया नाम प्रोक्तेत्यर्थः ॥ शंखवाद
याये ते पणवानका यां चित्रवादित्रतूर्याणां निर्घोषोऽभवत् ॥ देवा मानवा इत्यादीनां कुसुमैः समवाकिरन्निति तृतीयेनान्वयः ॥ विस्मयांतरमाह ॥ य
त्तद्वपुर्हरिरधारयत् तत्र कथितवान् तेनैव वपुषा मातापित्रोः संपश्यतोः वामनो वटुर्बभूव ॥ दिव्यगतिरद्भुतचेष्टितः स्वयं कथंभूतः अव्यक्तः

द्वादश्यां सवितातिष्ठन् मध्यंदिनगतो नृप ॥ विजया नाम सा प्रोक्ता यस्यां जन्म विदुर्हरेः ॥ ३१ ॥ शंखदुंदुभयो नेदुर्मृदंगपणवानकाः ॥ चित्रवा
दित्रतूर्याणां निर्घोषस्तुमुलोऽभवत् ॥ ३२ ॥ प्रीताश्चाप्सरसोऽनृत्यन् गंधर्वप्रवरा जगुः ॥ तुष्टुवुर्मुनयो देवा मानवाः पितरोऽग्नयः ॥ ३३ ॥ सिद्धविद्या
धरगणाः सकिंपुरुषकिंनराः ॥ चारणा यक्षरक्षांसि सुपर्णा भुजगोत्तमाः ॥ ३४ ॥ गायंतोऽतिप्रशंसंतो नृत्यंतो विबुधानुगाः ॥ अदित्या
आश्रमपदं कुसुमैः समवाकिरन् ॥ ३५ ॥ दृष्ट्वादितिस्तं निजगर्भसंभवं परं पुमांसं मुदमाप विस्मिता ॥ गृहीतदेहं निजयोगमायया प्रजा
पतिश्चाह जयेति विस्मितः ॥ ३६ ॥ यत्तद्वपुर्भाति विभूषणायुधैरव्यक्तचिद्व्यक्तमधारयद्धरिः ॥ बभूव तेनैव स वामनो वटुः संपश्यतोर्दि
व्यगतिर्यथा नटः ॥ ३७ ॥ तं वटुं वामनं दृष्ट्वा मोदमाना महर्षयः ॥ कर्माणि कारयामासुः पुरस्कृत्य प्रजापतिं ॥ ३८ ॥ तस्योपनीयमानस्य सावि
त्रीं सविताब्रवीत् ॥ बृहस्पतिर्ब्रह्मसूत्रं मेखलां कश्यपोऽददात् ॥ ३९ ॥ ददौ कृष्णाजिनं भूमिर्दंडं सोमो वनस्पतिः ॥ कौपीनाच्छादनं माता द्यौश्छ
त्रं जगतः पतेः ॥ ४० ॥ कमंडलुं वेदगर्भः कुशान् सप्तर्षयो ददुः ॥ अक्षमालां महाराज सरस्वत्यव्ययात्मनः ॥ ४१ ॥ तस्मा इत्युपनीताय यक्षराट्
पात्रिकामदात् ॥ भिक्षां भगवती साक्षादुमादादंबिका सती ॥ ४२ ॥ ४२

चिद्रूपः ॥ कथमधारयत् ॥ भाति दीप्तिः विभूषणानि च आयुधानि च तैर्व्यक्तं यथा भवति तथा ॥ कर्माणि जातकर्मादीनि ॥ वनस्पतिः वनानां पतिः सो
मः पात्रिकां भिक्षापात्रीं ॥ ७ ॥

81

ततस्तस्मादाश्रैष्टभक्तवात्सल्यान्मनः सत्कृतो विलैः ॥ यद्यूगतस्ततस्तेन सत्कृतो कोवरान्वृणे ॥ २५ ॥ इत्थं विरिंचेनस्तुतं कर्म च देवकार्यलक्षणं वीर्यं च प्रभावो यस्य
सच्चिदानंदरूपः प्रादुर्बभूवेति त्रयाणामन्वयः ॥ अमृतभूः मृत्युजन्मरहितः ॥ शंखगदापद्मचक्राण्यस्य भवंतीति तथा अर्णं आदित्वेन मत्वर्थीयोऽच् पूवत्प
यः ॥ अविसर्गपाठे स्वचासौ पिशंगवासाश्च रुष्टगजोम्भकरः तदाकारयोः कुंडलयोस्त्विषा उल्लसंती श्रीवदनांबुजे यस्य श्रीवत्सो वक्षसि यस्य । वल
येरंगदैश्च सह शोभासंति किरीटादीनि यस्य ॥ श्रीमत्या वनमालया विराजितः वेश्म गतं तमः अग्निजिका देवा नगाः पर्वताः ॥ तत्प्रादुर्भावसमय

श्रीशुक उवाच ॥ इत्थं विरिंचस्तुतकर्मवीर्यः प्रादुर्बभूवामृतभूरदित्यां ॥ चतुर्भुजः शंखगदाब्जचक्रः पिशंगवासा नलिनायतेक्षणः ॥ २६ ॥
श्यामावदातो झषराजकुंडलत्विषोल्लसच्छ्रीवदनांबुजः पुमान् ॥ श्रीवत्सवक्षा वलयांगदोल्लसत्किरीटकांचीगुणचारुनूपुरः ॥ २७ ॥
मधुव्रतव्रातविघुष्टया स्वया विराजितः श्रीवनमालया हरिः ॥ प्रजापतेर्वेश्मतमः स्वरोचिषा विनाशयन्कंठनिविष्टकौस्तुभः ॥ २८ ॥ दिशः
प्रसेदुः सलिलाशयास्तदा प्रजाः प्रहृष्टा ऋतवो गुणान्विताः ॥ द्यौरंतरिक्षं क्षितिरग्निजिह्वा गावो द्विजाः संजहृषुर्नगाश्च ॥ २९ ॥ श्रोणा
यां श्रवणद्वादश्यां मुहूर्तेऽभिजिति प्रभुः ॥ सर्वे नक्षत्रतारा द्याश्चक्रुस्तज्जन्म दक्षिणं ॥ ३० ॥

श्रुक्रं

म०टी० श्रोणायमिति ॥ भाद्रपदे शुक्ल द्वादशी श्रवणद्वादशीति प्रसिद्धा तस्यां तत्रापि श्रोणायां श्रवणाख्ये चंद्र इत्यर्थः ॥ तत्रापि श्रवणस्य प्रथमांशे भि
जितिनक्षत्रे तच्चश्रुत्यादर्शितं अभिजिन्नाम नक्षत्रमुपरिष्टादषाढानामवस्तात् श्रोणाया इति एवं विधाभिमुहूर्ते प्रभुः प्रादुर्बभूवेत्यर्थः ॥ किंच ॥
नक्षत्राण्यश्विन्यादीनि ताराशब्देन तारा ग्रहाः शुक्रादयः ते च ग्रहा येषां ते ॥ सूर्यादयोऽपि सर्वे तस्य जन्म दक्षिणं उदारं चक्रुः जन्ममुहूर्ते गुणाव
हा एवाभवन्नित्यर्थः ॥ ७ ॥

गुणाव

^अतिशयार्थे

भा० अ०
४२
चंद्रमौलिरित्येतदन्वयः । अपार्थश्चिकारः । चंद्रमौलिरपिमंगलत्संपन्नम् कोदयादेतपर्यः ॥ हे आर्य त्वां साक्षात् ब्रह्मर्षीणां तप एव मन्ये कथंभूतं तपः
वपुर्धरं मूर्तिधारि ॥ त्वच्चरणावनेजनैर्वार्भिरिदं तमं हतांहसस्तस्य तस्य मे पुनीता पवित्रीकृता ॥ ममतः प्रतीच्छ गृहाण हे अर्हत्तम पूज्यतम ॥ इति पंचमे स्कंधे अष्टादशः ॥
(उ)लेः

तत्रादिशौ वं किल कल्मषापहं स्वधर्मपिनम् कृत्योत्सुमंगलं । यद् वदेवो गिरिशश्चंद्रमौलिर्दधारमूर्ध्नापरया च भक्त्या ॥ ४७ ॥ श्री बलिरुवाच
स्वागतं ते नमस्तुभ्यं ब्रह्मन्किं करवाम ते । ब्रह्मर्षीणां तपः साक्षान्मन्ये त्वार्य वपुर्धरं ॥ ४८ ॥ अद्य नः पितरस्तृप्ता अद्य नः पावितं कुलं । अद्य
स्विष्टः क्रतुरयं यद्भवानागतो गृहान् ॥ ४९ ॥ अद्याग्नयो मे सुहुता यथाविधि द्विजात्मज त्वच्चरणावनेजनैः । हतांहसो वार्भिरियं च
भूरहो तथा पुनीता तनुभिः पदैस्तव ॥ ५० ॥ यद्यद्वटो वांछसि तत्प्रतीच्छ मे त्वामर्थिनं विप्रसुतानुतर्कये । गां कांचनं गुणवद्धाम मृष्टं तथान्न
पेयमुत वा विप्रकन्यां ॥ ५१ ॥ ग्रामान्समृद्धांस्तुरगान्गजान्वा रथांस्तथार्हत्तम संप्रतीच्छ ॥ ५२ ॥ इति श्रीभागवते महापुराणेऽष्टमस्कंधे
बलिवामनसंवादे १८ अष्टादशोध्यायः ॥ श्रीशुक उवाच ॥ इति वैरोचनेर्वाक्यं धर्मयुक्तं स सूनृतं । निशम्य भगवान्प्रीतः प्रतिनंद्येदमब्रवीत्
१ ॥ श्रीभगवानुवाच ॥ वचस्तवैतज्जनदेव सूनृतं कुलोचितं धर्मयुतं यशस्करं । यस्य प्रमाणं भृगवः सांपराये पितामहः कुलवृद्धः प्रशांतः ॥ २ ॥ ४२

उक्तिं विंशोतुहरिरेणाद्याचितेन पदत्रयं । प्रतिश्रुते च बलिना जात न नमितगुरुवारयन् ॥ १ ॥ सूनृतः प्रीतिः स्वयं तुष्टिरित्यादिप्रस्तुतो चितं । वक्तव्यमिति भिदांस्तुशि
ह्यपन्नारुवामनः ॥ २ ॥ वचस्तवैतदिति षोडशभिः । हे जनदेव सांपराये पारलौकिके धर्मे पितामहः प्रह्लादः प्रमाणं ॥ ३ ॥

83

स एवं संभावितो मारिषः अहो वर्द्धर्षिगणसंघुष्टां तां सभामति काश्यपो नयत ॥ यद्यर्थं वटुर्भूतस्तदाह ॥ श्रुत्वेत्यादि यावत्समाप्तिः ॥ यजमानं यज्ञं तं भृग
णां भृगुभिः उपकल्पितैः प्रवर्त्तितैः ॥ अखिलेन सारेण बलेन संभृतः संपूर्णः ॥ नर्मदाया उत्तरतटे भृगुकच्छसंज्ञिके क्षेत्रे क्रतुश्रेष्ठं प्रवर्त्तयंतो येव

स ब्रह्मवर्चसेनैवं सभां संभावितो वटुः ॥ ब्रह्मर्षिगणसंघुष्टामत्यरोचत मारिष ॥ समिद्धमाहितं वह्निं कृत्वा परिसमूहनं ॥ परिस्तीर्य समभ्यर्च्य
द्विजः समिद्भिरजुहोद्द्विजः ॥ श्रुत्वाश्वमेधैर्यजमानमूर्जितं बलिं भृगूणामुपकल्पितैस्ततः ॥ जगाम तत्राखिलसारसंभृतो भारेण गां सन्नमयन्प
दे पदे ॥ तं नर्मदायास्तट उत्तरे बलेर्य ऋत्विजस्ते भृगुकच्छसंज्ञिके ॥ प्रवर्त्तयंतो भृगवः क्रतूत्तमं व्यचक्षतारादुदितं यथा रविं ॥ ते ऋत्विजो यजमा
नः सदस्या हततत्विषो वामनतेजसा नृप ॥ सूर्यः किलायात्युत वा विभावसुः सनत्कुमारोऽथ दिदृक्षया क्रतोः ॥ इत्थं सशिष्येषु भृगुष्वनेकधा वित
र्क्यमाणो भगवान्स वामनः ॥ छत्रं सदंडं सजलं कमंडलुं विवेश बिभ्रद्धयमेधवाटं ॥ मौंज्या मेखलया वीतमुपवीताजिनोत्तरं ॥ जटिलं वामनं वि
प्रं मायामाणवकं हरिं ॥ प्रविष्टं वीक्ष्य भृगवः सशिष्यास्ते सहाग्निभिः ॥ प्रत्यगृह्णन्समुत्थाय संक्षिप्तास्तस्य तेजसा ॥ यजमानः प्रमुदितो दर्श
नीयं मनोरमं ॥ रूपानुरूपावयवं तस्मा आसनमाहरत ॥ स्वागतेनाभिनंद्याथ पादौ भगवतो बलिः ॥ अवनिज्यार्चयामास मुक्तसंगमनोरमं ॥ ७ ॥

वामनं
ते ऋत्विजो भगवः तेतं व्यचक्षत अपश्यन ॥ आरात्समीपे एवोदितं रविमिव ॥ ते ऋत्विगादयः ॥ सूर्यः किलेत्येवमादि [illegible] हयमेधवाटं
व्यतर्कयन्निति शेषः
अश्वमेधमंडपं विवेश सः उपवीताजिनं उपवीतवत्कृतमजिनमेव उत्तरमुत्तरीयं यस्य ॥ संक्षिप्ताः अभिभूताः संतः ॥ रूपस्यानुरूपा अवयवा यस्य तं हृ
दीति शेषः ॥ ७ ॥

भा॰ अ॰
४२

कथं नामासोऽस्मरत्पिरोमणिर्जीवल्लोककातरवैदेहमुपेक्षितवान् नित्याशयेनाह। वैरानुबंध एता[वा] नाम त्यो भवति किं देहिनां देहनिग्रहाभिमानवतां स्मराणां
तथाहंमानेनोपबृंहितो मन्युश्च भवतो वचयतो ह्यानज्ञम। ज्ञ। अज्ञानानिवृत्तेः प्राकृपोकृषत्परोमां घ्नेवेत्यर्थः। तदेवं पूर्वजान्स्तुत्वा तत्पितरं स्तौति पि
तेति। द्विजवेषधारिणो महाहरिणो देवा एते न तु द्विजा इति तद्विज्ञानपि सः याचितः सन्स्वीयमायुर्देवेभ्योऽददो। ममपदसंस्थिता नीति त्रिविक्रमपाद
प्रिप्रायेणानचान तवादः। तत्रापिस्वपदत्वान्नपगमात। यावदर्थमेवप्रतिग्रहोपपसः। ईश्वरस्यापि याञ्चाकारणं याञ्चप्रकारं चोक्त्वा बलेर्बंधन

वैरानुबंध एतावानामृत्योरिह देहिनां। अज्ञानप्रभवो मन्युरहंमानोपबृंहितः। १२। पितामहस्त्वाद् पुत्रस्ते तद्विद्वान् द्विजवत्सलः। स्वमायुर्द्विज
लिंगेभ्यो देवेभ्योऽदात्स याचितः। १३। भवतां च रिता नृधर्मानुस्थितो गृहमेधिभिः। ब्राह्मणैः पूर्वजैः शूरैरन्यैश्चोद्दामकीर्तिभिः। १४। तस्मा
त्वत्तो महीमीषद्वृणेऽहं वरदर्षभात्। पदानि त्रीणि दैत्येंद्र संमितानि पदा मम। १५। नान्यत्ते कामये राजन्वदान्याज्जगदीश्वरात्। नैनः प्राप्नो
ति वै विद्वान्यावदर्थप्रतिग्रहः। १६। बलिरुवाच। अहो ब्राह्मणदायाद वाचस्ते वृद्धसंमताः। त्वं बालो बालिशमतिः स्वार्थं प्रत्यबुधो यथा। ७।
मां वचोभिः समाराध्य लोकानामेकमीश्वरं। पदत्रयं वृणीते योऽबुद्धिमान्द्वीपदाशुषं। १८। न पुमान्मामुपव्रज्य भूयो याचितुमर्हति। त
स्माद्वृत्तिकरीं भूमिं वटो कामं प्रतीच्छ मे। १९।

अस्मान्नरत्वेन तस्य गर्वातिरेकेणाधिक्षेपप्रकारमाह। अहो इति त्रिभिः। तव वाचो वृद्धानां संमताः। त्वं तु बालः। बालिशश्चेति छेदः। स्वार्थं प्रत्यबुध इति चमत्कारेणा
मे वार्थं बुध्यसे न स्वार्थं बुद्धिस्ते न स्वार्थपरिपूर्तिस्य तवतद्व्यतिरेकेण स्वार्थाभावादित्यर्थः। अबुधत्वमेवाह। मामिति द्वीपस्य दाशुषं संदातारं अ
बुद्धिमान् वस्तुतस्तु बुद्धिमानित्येव छेदः। कामं यथेष्टं सम्यक् पादप्रसारेणेत्यर्थः। अतएव तथा करिष्यति। क।

४२ ८७

निःसत्वस्य लक्षणं ॥ यो द्विजातये याचकाय प्रत्याख्याता न ददामीति वक्ता ॥ कृपणस्य लक्षणं प्रथमं प्रतिश्रुत्य यो दाता न ददातीति ॥ तीर्थे दानावसरे यस्मिन् युष्मत्कुले ॥ यतः यस्मिन् कुले जातः ॥ क्ष्मोद्धारे भूम्युद्धरणे ॥ पराग्दृशः बहिर्दृष्टेः ॥ अतोहं हृदये स्थितं मां न द्रक्ष्यतीत्येवं निश्चित्य ॥ श्वासानिलेंतर्हितः सूक्ष्मो देहो यस्य विविग्नमति कंपितं चेतो यस्य ॥ अनुकंपितचित्त इति वा सत्ववीर्यः ॥ न ददर्श ॥ अंतःप्रविष्टत्वात् ॥ पुमान्यतः सकाशान्ना

न ह्येतस्मिन् कुले कश्चिन्निःसत्वः कृपणः पुमान् ॥ प्रत्याख्याता प्रतिश्रुत्य यो वा दाता द्विजातये ॥ २ ॥ न संति तीर्थे युधि चार्थिनार्थिताः पराङ्मुखा ये त्व मनस्विनो नृपाः ॥ युष्मत्कुले यद्यशसामलेन प्रह्लाद उद्भाति यथोडुपः खे ॥ ३ ॥ यतो जातो हिरण्याक्षश्चरन्नेक इमां महीं ॥ प्रतिवीरं दिग्विजये नाविंदत गदायुधः ॥ ४ ॥ यं विनिर्जित्य कृच्छ्रेण विष्णुः क्ष्मोद्धार आगतं ॥ आत्मानं जयिनं मेने तद्वीर्यं भूर्यनुस्मरन् ॥ ५ ॥ निशम्य तद्वधं भ्राता हिरण्यकशिपुः पुरा ॥ हंतुं भ्रातृहणं क्रुद्धो जगाम निलयं हरेः ॥ ६ ॥ तमायांतं समालोक्य शूलपाणिं कृतांतवत् ॥ चिंतयामास कालज्ञो विष्णुर्मायाविनां वरः ॥ ७ ॥ यतो यतोहं तत्रासौ मृत्युः प्राणभृतामिव ॥ अतोहमस्य हृदयं प्रवेक्ष्यामि पराग्दृशः ॥ ८ ॥ एवं स निश्चित्य रिपोः शरीरमाधावतो निर्विविशेसुरेंद्र ॥ श्वासानिलांतर्हितसूक्ष्मदेहस्तत्प्राणरंध्रेण विविग्नचेताः ॥ ९ ॥ स तन्निकेतं परिमृश्य शून्यमपश्यमानः कुपितो ननाद ॥ क्ष्मां द्यां दिशः खं विवरान् समुद्रान् विष्णुं विचिन्वन्न ददर्श वीरः ॥ १० ॥ अपश्यन्निति होवाच मयान्विष्टमिदं जगत् ॥ भ्रातृहा मे गतो नूनं यतो नावर्त्तते पुमान् ॥ ११ ॥ २

वर्त्तते तत्र ब्रह्मलोक एव नूनं गतः नित्यमुक्तत्वादिति वा सत्ववीर्यः ॥ एवं च मृत्युपर्यंतमखंडं विष्णौ वैरं यत्कृतवान् तदुचितमेव तस्यासीदिति दंदमरु बलपराक्रमस्य प्रह्रादस्यानविजृंभितक्रोधानुबंधस्य ॥ ७ ॥

^द्वितीयेन दिवं खं च

भा०अ० ४४

तथापि श्रीति श्रुतं संपादनीयमेवेति चेत्तत्राह क्रमत इति द्वाभ्यां ॥ एकेन पादन्यासेन भूमिं क्रममाणस्येत्यर्थः ॥ तार्तीयस्य तृतीयपादन्यासस्य
तथापि सर्वं वदता कीर्तित्वात् विष्यतीति चेत्तत्राह न तद्दानमिति तपः स्विन्नेका सकर्मपूर्त्तं ॥ ननु तर्हि प्रतिश्रुतप्तेति किं यमन्तं वाच्यंत
त्राह सार्द्धैः षड्भिः ॥ अत्रापि सत्यानृतत्वावस्थायां वक्तृवश्रुत्यादि भयं कोमितिसत्यं नेत्यन्तं तामिसादि नासत्वान्तयोर्लक्षणपूर्वकं स्तु
तिनिंदाभ्यां सत्यं विहितं अनृतं च निषिद्धं ॥ अनंतरं नवरात्रा एतज्जिकम तरामित्यादि नासत्ये दोषानन्तं तेषुणानुत्का तस्मात्कालएव द
घात् काले न दद्यात् तत्सत्वान् तामिपुनीकरोत्यात्मुपसंहारेण वृत्तिसंकटादिषु न तमप्यनुज्ञातं ॥ तामिसं श्रुतप्रपंदर्शयन्नाह ॥ कें

क्रमतोगांपदेकेन द्वितीये न दिवं विभोः ॥ खं च कायेन महता तार्त्तीयस्य कुतो गतिः ॥ ३३ ॥ निष्ठां तेन रके मन्ये स्वप्रदातुः प्रतिश्रुतं ॥ प्र
तिश्रुतस्य योनाशः प्रतिपादयितुं भवान् ॥ ३२ ॥ न तद्दानं प्रशंसंति येन वृत्तिर्विपद्यते ॥ दानं यज्ञस्तपः कर्म लोके वृत्तिमतो यतः ॥ ३४ ॥ धर्माय
यशसेर्थाय कामाय स्वजनाय च ॥ पंचधा विभजन् वित्तमिहामुत्र च मोदते ॥ ३५ ॥ अत्रापि वह्वृचैर्गीतं शृणु मे सुरसत्तम ॥ सत्यमोमिति य
त्प्रोक्तं यन्नेत्याहानृतं हि तत् ॥ ३६ ॥ सत्यं पुष्पफलं विद्यादात्मवृक्षस्य जीवतः ॥ वृक्षेऽजीवति तन्न स्यादनृतं मूलमात्मनः ॥ ३७ ॥ ॥

मित्यंगीकारेण यत्प्रोक्तं तत्सत्यं नेत्यिदत्तद्दवानृतं ॥ तत्र सत्यमीषदनृतं वि नान्यसिद्धतीत्याशयेनाह सत्यं पुष्पफलं विद्यात् तज्जीव्यात् ४४
आत्मवृक्षस्य देहवृक्षस्य वृक्षस्य कुतः गायते श्रुत्यो च्यत इत्यर्थः ॥ पाठांतरं तु सुगमं ॥ यद्यपि श्रुत्या वाचः सत्यं पुष्पफलं चेत्युक्तं तथापि वाचो
देहनिर्वाहाधीनत्वात्तत्र वृक्षस्येति प्रस्तुतानुसारेणोक्तं ॥ ननु भवतु पुष्पफलस्थानीयं सत्यं ततः किमत आह ॥ वृक्षेऽदेहे अजीवति तत्पु
ष्पफलं न स्यात् सा न स्यादिति पाठे श्रुतु क्रोयावाचः ॥ परामर्शः ॥ देहश्चानृतेन रक्षणीय इत्याह अनृतं तत्मनो देहस्य मूलं ॥ ७ ॥ ॥

87

पुनरपि निःस्पृहत्वमेवाविःकुर्वन्नाह यावंत इति सप्तभिः ॥ नववर्षसमेतेन द्वीपेनापि सप्तद्वीपवराणां इच्छया ॥ तृष्णायाः अंतं न गताः इत्यस्माभिः श्रु
तं असंतुष्टस्तु प्राप्तैस्त्रिभिर्लोकैरपि न सुखं वर्त्तते ॥ अशुशुक्षणिरग्निः ॥ सिद्धो कृतार्थः एतावतैव सर्वस्वापहारसिद्धेरिति गूढोभिप्रायः ॥ तदेवाह ॥ ८८

श्रीभगवानुवाच ॥ यावंतो विषयाः प्रेष्ठास्त्रिलोक्यामजितेंद्रियं ॥ न शक्नुवंति ते सर्वे प्रतिपूरयितुं नृप ॥ २० ॥ त्रिभिः क्रमैरसंतुष्टो द्वीपेनापि न
पूर्यते ॥ नववर्षसमेतेन सप्तद्वीपवरेच्छया ॥ २१ ॥ सप्तद्वीपाधिपतयो नृपा वैन्यगयादयः ॥ अर्थैः कामैर्गता नांतं तृष्णाया इति नः श्रुतं ॥ २२ ॥
यदृच्छयोपपन्नेन संतुष्टो वर्त्तते सुखं ॥ नासंतुष्टस्त्रिभिर्लोकैरजितात्मोपसादितैः ॥ २३ ॥ पुंसोयं संसृतेर्हेतुरसंतोषोर्थकाम
योः ॥ यदृच्छयोपपन्नेन संतोषो मुक्तये स्मृतः ॥ २४ ॥ यदृच्छालाभतुष्टस्य तेजो विप्रस्य वर्द्धते ॥ तत्प्रशाम्यत्यसंतोषादंभसेवाशुशुक्षणिः ॥ २५ ॥
तस्मात्त्रीणि पदान्येव वृणे त्वद्वरदर्षभात ॥ एतावतैव सिद्धोहं वित्तं यावत्प्रयोजनं ॥ २६ ॥ श्रीशुक उवाच ॥ इत्युक्तः स हसन्नाह वांछातः प्र
तिगृह्यतां ॥ वामनाय महीं दातुं जग्राह जलभाजनं ॥ २७ ॥ विष्णवे क्ष्मां प्रदास्यंतमुशना असुरेश्वरं ॥ जानंश्चिकीर्षितं विष्णोः शिष्यं प्राह
विदां वरः ॥ २८ ॥ शुक उवाच ॥ एष वैरोचने साक्षाद्भगवान्विष्णुरव्ययः ॥ कश्यपाददितेर्जातो देवानां कार्यसाधकः ॥ २९ ॥ प्रतिश्रुतं त्वये
तस्मै यदनर्थमजानता ॥ न साधु मन्ये दैत्यानां महानुपगतोनयः ॥ ३० ॥ एष ते स्थानमैश्वर्यं श्रियं तेजो यशः श्रुतं ॥ दास्यत्याच्छिद्य शक्राय
मायामाणवको हरिः ॥ ३१ ॥ त्रिभिः क्रमैरिमांल्लोकान्विश्वकायः क्रमिष्यति ॥ सर्वस्वं विष्णवे दत्वा मूढ वर्तिष्यसे कथं ॥ ३२ ॥

वित्तं द्रव्यादि प्रयोजनं भवेत्सुखं अधिकस्य क्लेशावहत्वादित्यर्थः ॥ अनयः अन्यायः ॥ अन्यायमेवाह एष इति ॥ ननु मया पदत्रयमेव प्रतिश्रुतं
नाधिकं तत्राह त्रिभिरिति ॥ क्रमता मिमीते चेत्तत्राह सर्वस्वमिति ॥ ७ ॥

भा०स्क० ८५

ननु ताईं इदमनृतमस्तत्कासर्वदत्तं च्युस्यात् तेनाह ॥ न बिभि ति तथा च श्रुतिः ॥ अथैतत्पूर्णमभ्यात्मेयन्नोति सयत्सर्वं नेतित्र्यात्तं बापीयका
स्यकीर्त्तिं जायेतसे नंत तेवैवहन्यादिति ॥ अतो न तु संकुदादिषु न तं नदोषो येषु परं सं कुराति ॥ स्त्रीपुत्रोत्ता इनेन प्रकारे नर्म स्तोर्प्वरि इसे
विवाह च वरादिस्तु तोगवांत्राललाणे नां च ह्निता र्थे हिंसायां च कस्यापि तत्रा सायां ॥ तथा च याज्ञवल्क्यः ॥ वर्णिनां हि वधो यत्र तत्र साक्ष्यनृतं वदे ८१
त् ॥ तथा च श्रुतिः ॥ तस्मात्कालएव दद्यात् कालेन दद्यात्सत्यान्तेमिथुनीकरोतीति ॥ इत्यष्टमे एकोनविंशः ॥ विंशेत्वनृतभीतासो ज्ञात्वा

सर्वं निवेदनं तं कृपा स्वगुः कीर्त्तिः श्रेयसम्मतः ॥ स्त्रीषु नर्मविवाहे च वृत्त्यर्थे प्राणसंकटे ॥ ४० ॥ गोब्राह्मणार्थे हिंसायां नानृतं स्याज्जुगु
गुप्सितं ॥ ॥ इति श्रीभागवते महापुराणे अष्टमस्कंधे वामनप्रादुर्भावे एकोनविंशोध्यायः ॥ श्रीशुक उवाच ॥ बलिरेवं गृहपतिः
कुलाचार्येण भाषितः ॥ तूष्णीं भूत्वा क्षणं राजन्नुवाचावहितो गुरुं ॥ १ ॥ श्रीबलिरुवाच ॥ सत्यं भगवता प्रोक्तं धर्मोयं गृहमेधिनां
अर्थं कामं यशो वृत्तिं यो न बाधेत कर्हिचित ॥ २ ॥ स चाहं वित्तलोभेन प्रत्याचक्षे कथं द्विजं ॥ प्रतिश्रुत्य ददामीति प्राह्लादिः कित
वो यथा ॥ ३ ॥ न ह्यसत्यात्परोऽधर्म इति होवाच भूरियं ॥ सर्वं सोढुमलं मन्ये ऋतेऽलीकपरं नरं ॥ ४ ॥ नाहं बिभेमि निरयान्नाधन्याद
सुखार्णवात ॥ न स्थानच्यवनान्मृत्योर्यथा विप्रप्रलंभनात ॥ ५ ॥

पिकपदं हरेः ॥ ददावेव ततो विष्णुः सहसा त्रैलोक्यहृतं ॥ १ ॥ भगवता त्वया प्रोक्तं सत्यं किंतत् योऽर्थकामादिकं न बाधेत स गृहमेधिनां ध ८५ ८७
र्म इति कथं त्वया न त्वोभिराकरोमि ॥ न ह्यसत्यात्परो नेरोपाकन्नाः तत्राह ॥ नाहमिति ॥ अधन्यात् दारिद्र्यात् ॥ मृत्योरपि ॥ ७ ॥

एतदेव दृष्टान्तेन स्पष्टयति तद्यथा वृक्ष उत्पादितमूलः शुष्यति अचिरादेवोद्वर्त्तते पततीति च ॥ एवं नष्टमनृतं यस्य स आत्मा देहः शुष्येत् यद्यपि च
श्रुत्या एवमेवानृतं वदन्नात्मानमाविर्मूलं करोतीत्येवं निंद्यानृतं निषिद्धं ॥ तथाप्युपसंहारानुसारेण केवलानृतविषयमित्यभिप्रेत्येवं व्याख्या
तं ॥ दयेत त्वेतेनेति च तथोक्तेः तथा च श्रुतिः ॐमिति सत्यं नेत्यनृतं तदेतत्पुष्पं फलं वाचो यत्सत्यं स हेश्वरो यशस्वी कल्याणकीर्त्तिर्भविता
पुष्पं हि फलं वाचः सत्यं वदत्यथैतन्मूलं वाचो यदनृतं ॥ तद्यथा वृक्ष आविर्मूलः शुष्यति स उद्वर्त्तत एवमेवानृतं वदन्नाविर्मूलमात्मानं करोति स उ
द्वर्त्तते ॥ तस्मादनृतं न वदेद्दयेत त्वेतेन एतेन ... तु अनृतेन दयेत तस्मात् कटे धाम्नानंरहोदीति श्रुत्यर्थः ॥ सर्वथा सत्यमेव च न देहो न निर्वहेदिति
स्फुटीकर्तुं सत्यस्य दोषाननृतस्य गुणानाह पराग्भिति द्वाभ्यां ॥ यदोमित्यक्षरं तत्पराक् पूर्वे अर्थं गतां वाचं वलीति पराक्पूर्वक्रमिति श्रुतिपद

तद्यथा वृक्ष उन्मूलः शुष्यत्युद्वर्त्तते चिरात् ॥ एवं नष्टानृतः सद्य आत्मा शुष्येन्न संशयः ॥ ३७ ॥ पराक्पूर्वं क्रमपूर्णं वा अक्षरं यत्तदोमिति
तथा किंचोमिति ब्रूयात्तेन रिच्येत वै पुमान् ॥ ३८ ॥ निःशेषं सर्वमोंकुर्वन्नालं कामेन चात्मने ॥ अथैतत्पूर्णमभ्यात्मं यन्न नेत्यनृतं वचः ॥ ३९ ॥

स्य व्याख्यानं अपूर्णं वै इति ॥ तस्मात् अर्थिने यत्किंचिदोमिति दास्यामीति ब्रूयात् तेन रिच्येत न्यूनो भवेत् किं च निःशेषं सर्वमोंकुर्वन् दास्यामी
त्यंगीकुर्वन् आत्मने कामेन नालं पर्याप्तो न भवति ॥ तस्य भोगो न सिध्यतीत्यर्थः ॥ तथा च श्रुतिः ॥ पराग्वा एतद्रिक्तमक्षरं यदेतदोमिति ॥ यत्किंचो
मित्याह त्रैवास्मै तद्रिच्यते स यत्सर्वमोंकुर्याद्रिच्यादात्मानं स कामेभ्यो नालं स्यादिति नेति यदनृतं वचः एतत् पूर्णमर्थव्ययाभावात् अभ्या
त्मानं चेति च कारान्वयः ॥ आत्मनोऽभिमुखमन्यस्यार्थकामानाकर्षतीत्यभ्यात्मं याचितं मम किंचिदपि नास्ति दास्यामीति ब्रुतेऽनृतेन परधा
नर्था नाकर्षतीति ज्ञातव्यं ॥ ४० ॥

भा॰ अ॰ ४६

ननु नायं वटुः किंतु विष्णुस्तव शत्रुरित्युक्तं तर्हि सुतरामेव दास्यामीत्याह ॥ यजंतीति परः शत्रुर्वा अस्तु ॥ यद्यद्यय यशो न जिहासति तर्हि युद्धे मां हत्वा
एनां भूमिं हरेत् शय्या तवासम्पकृत्वातः सन्नं मम चित्रे शयीतेति वास्तवोर्थः ॥ अत्र इति अज्ञातत्र्यदंजालकं मुक्ताभरणविशेषः तस्मात्लाव

यजंतियज्ञं क्रतुभिर्यमादृता भवंत आम्नायविधानकोविदाः ॥ स एव विष्णुर्वरदो स्तु वा परो दास्याम्यमुष्मै क्षितिमीप्सितां मुने ॥ ९ ॥ यद्य
प्यसावधर्मेण मां बध्नीयादनागसं ॥ तथाप्येनं न हिंसिष्ये भीतं ब्रह्मतनुं रिपुं ॥ १० ॥ एष वा उत्तमश्लोको न जिहासति यद्यशः ॥ हत्वा मेनां हरे
द्युद्धे शयीत निहतो मया ॥ ११ ॥ श्रीशुक उवाच ॥ एवमश्रद्धितं शिष्यमनादेशकरं गुरुः ॥ शशाप दैवप्रहितः सत्यसंधं मनस्विनं ॥ १२ ॥
दृढं पंडितमान्यज्ञः स्तब्धोस्यस्मदुपेक्षया ॥ मच्छासनातिगो यस्त्वमचिराद्भ्रश्यसे श्रियः ॥ १३ ॥ एवं शप्तः स्वगुरुणा सत्यान्न चलितो म
हान् ॥ वामनाय ददावेनामर्चित्वोदकपूर्वकं ॥ १४ ॥ विंध्यावलिस्तदागत्य पत्नी जालकमालिनी ॥ आनिन्ये कलशं हैममवनेजन्यपां भृ
तं ॥ १५ ॥ यजमानः स्वयं तस्य श्रीमत्पादयुगं मुदा ॥ अवनिज्यावहन्मूर्ध्नि तदपो विश्वपावनीः ॥ १६ ॥ तदासुरेंद्रं दिवि देवतागणा गंधर्व
विद्याधरसिद्धचारणाः ॥ तत्कर्म सर्वेपि गृणंत आर्जवं प्रसूनवर्षैर्ववृषुर्मुदान्विताः ॥ १७ ॥ नेदुर्मुहुर्दुंदुभयः सहस्रशो गंधर्वकिंपुरुष
किन्नरा जगुः ॥ मनस्विनानेन कृतं सुदुष्करं विद्वानदाद्यद्रिपवे जगत्त्रयं ॥ १८ ॥ तद्वामनं रूपमवर्धताद्भुतं हरेरनंतस्य गुणत्रयात्मकं
भूः खं दिशो द्यौर्विवराः पयोधयस्तिर्यङ्नृदेवा ऋषयो यदासत ॥ १९ ॥ ४६

ती ॥ अवनेजनं नीनामपां कलशं भृतं पूर्णं ॥ अवर्धत वर्धतः जगत्त्रयं तामिति बलिना पूर्वमुक्तत्वात् ॥ गुणत्रयमात्मनि यस्य तत् ॥ अत एव भूः ख
मित्याद्ययोयस्मिन् आसन्नास्पिताः तत् ॥ ७ ॥

४७

९१

रूपाला:
मविपाव:

सू २

किंच यद्यद्धनादिकं तत्सर्वं संपरेतं पुरुषं हास्यति त्यक्ष्यत्येव तत्किमिति जीवतैव स्वयं न देयमिति भावः ॥ तथापि तावत्तत्र तिसंकल्प परित्यक्तं श्री
अर्हं दीयतां इति चेत्तत्राह तस्येति ॥ विप्रश्चेत्तेनार्थेन दत्तेनापि न तुष्येत् ॥ तर्हि तस्यार्थस्य त्यागेन नैकिं निमित्तं न किंचित्तस्या चितात्तस्य
स्वदानेन विप्रस्यासंतोषेण त्व नंद्य थमेकस्मात् ॥ अतस्तथापि चितं सर्वं देयं न किंचिदिति भावः ॥ तर्हि न देयमेवेति चेत्तत्राह श्रेय इति ॥ ९२
दुस्त्यजैरसुभिरपि को विकल्पो विचारः ॥ ये दधीचि शिब्यादयः ... रूपमुक्तास्तेषामिहलोका परलोकं श्रेयं प्राप्तमिति

यद्यपास्तुतिल्लोकेस्मिन् संपरेतं धनादिकं ॥ तस्य त्यागे निमित्तं किं विप्रस्तुष्येन्न ते न चेत् ॥५॥ श्रेयः कुर्वीति भूतानां साधवो दुस्त्यजासुभिः ॥
दध्यङ् शिबिप्रभृतयः को विकल्पो धरादिषु ॥६॥ यैरियं बुभुजे ब्रह्मन् दैत्येंद्रैरनिवर्तिभिः ॥ तेषां कालोग्रसील्लोकान्न यशोधिगतं भुवि ॥
७ ॥ सुलभा युधि विप्रर्षे ह्यनिवृत्तास्तनुत्यजः ॥ न तथा तीर्थ आयाते श्रद्धया ये धनत्यजः ॥८॥ मनस्विनः कारुणिकस्य शोभनं यदर्थिकामो
पनयेन दुर्गतिः ॥ कुतः पुनर्ब्रह्मविदां भवादृशां ततो वटो तस्य ददामि वांछितं ॥ ९ ॥ ॥

कालोग्रसीत् संहृतवान् ॥ न तु भुवि तैरधिगतं प्राप्तं यशोग्रसीत् ॥ अतः कीर्तिरेव साध्या नान्यदिति भावः ॥ देहत्यागं त्यक्त्वा धनत्यागे कीर्तिर्भ
वतीत्याह सुलभा इति ॥ तनुं त्यजंतीति तथा तीर्थे पात्रे ॥ अतो ... तिष्ठको धन त्यागएव मया कार्य इति भावः ॥ तर्हि निर्धनत्वेन दैन्यं स्यादिति चेत्तत्र
आह ॥ मनस्विन इति याहृशा ता ह्यशानामर्थिनां कामोपनकाम पूर्णेन दुर्गतिर्दैन्यमित्यर्थः तच्छोभनं भद्रमेव भवादृशानां कामोपनयेन दु
र्गतिः शोभनमिति किं पुनर्वक्तव्यमित्यर्थः ॥

भा॰ अ॰
४७

विद्याधरसंज्ञोसिः ॥ मीनकुंडलस्फुरंतिकिरीटादीनिधारयसः ॥ मधुव्रतानांस्रजोयस्योतयावनमालयाश्रीवत्सादिभिश्चवृतोव्याप्तः ॥ उरुक्रमत्वमे
वाह ॥ क्षितिमितिद्वितीयपदंक्रमतोविलियतस्त्रिविष्टपंतदीयंकिंचिन्मात्रंजातं ॥ ततस्तृतीयंतुनकिंचिदपि ॥ तत्रहेतुः ॥ उरुक्रमस्यांघ्रिस्त्रिविष्टपमु
प ॰र्युपरिगच्छन् ॥ महर्जनाभ्यांतपसश्चपरंसत्यलोकंगतइति ॥ इत्यष्टमेविंशः ॥ २० ॥ एकविंशेपदाघ्रिभिघोणवलिबंधनं ॥ विष्णुनाकृतम्

पर्जन्यघोषोजलजः पांचजन्यः

कौमोदकीविष्णुगदातरस्विनीविद्याधरोसिः शतचंद्रयुक्तः ॥ तूणोत्तमावक्षयसायकौचमुख्यामुखाउपतस्थुरीशं ॥ २८ ॥ स्फुरत्कि पार्षदमुख्याः सहलोकपालाः इत्यपिपाठः
रीटांगदमीनकुंडलः श्रीवत्सरत्नोत्तममेखलांवरैः ॥ मधुव्रतस्रग्वनमालयावृतोरराजराजन्भगवानुरुक्रमः ॥ २९ ॥ क्षितिंपदैकेन
बलेर्विचक्रमेनभः शरीरेणदिशश्चबाहुभिः ॥ पदंद्वितीयंक्रमतस्त्रिविष्टपंनवैतृतीयस्यतदीयमण्वपि ॥ ३० ॥ उरुक्रमस्यांघ्रिरुपर्युपर्यथोम
हर्जनाभ्यांतपसः परंगतः ॥ ॥ इतिश्रीभागवतेमहापुराणेअष्टमस्कंधेविंशतमोध्यायः ॥ २० ॥ श्रीशुकउवाच ॥ सत्यंसमीक्ष्याब्जभवोन
खेंदुभिर्हतस्वधामद्युतिरावृतोभ्यगात ॥ मरीचिमिश्राऋषयोबृहद्व्रताः सनंदनाद्यानरदेवयोगिनः ॥ १ ॥

कर्मतस्यत्वापयितुंजने ॥ ४ ॥ उरुक्रमस्यांघ्रिस्तपसः परंगतइत्युक्तं ततः किंवृत्तं तदाह ॥ सत्यंसत्यलोकमाहृतंतमंघ्रिंसमीक्ष्य अब्जभवोभ्यगात तथा
मरीचिमिश्रादयश्चेतिद्वयोरन्वयः कथंभूतोब्जभवः ॥ हरेरंघ्रेर्नखाएवेंदवः तैर्हतास्वधाम्नोद्युतिर्यस्यसः ॥ स्वयंचतेनावृतः अन्ये हे नरदेववृहद्व्र
तायोगिनश्च ॥ ७ ॥ ४

४७

अचष्टवैतान् ॥

ऋत्विग्गात्स्विद्ं तो बलिस्तस्य हरेः काये एतद्विश्वं ददर्श ॥ तदेव प्रपंचयति ददर्श भूमिं पादौ नैःसप्तभिः ॥ मारुतं गगनं काययुगं ॥ इंद्रस्य सेनेव से नाथ ९४
स्यसः ॥ इंद्रपदे स्थितत्वात् ॥ ……… ॥ आत्मस्वयं बलिर्मुखोपयेयां ता न ॥ ऋक्षमालां नक्षत्रयं किं ॥ अंगहरजन ॥ समस्ता न रेफान् शब्दान् ॥ यो

काये बलिस्तस्य महाविभूतेः सहर्त्विगाचार्यसदस्य एतत् ॥ ददर्श विश्वं त्रिगुणं गुणात्मके भूतेंद्रिया र्थाशय जीवयुक्ते ॥ २० ॥ रसातलं चरणांघ्रितले त्य
पादयोर्महीं महीध्रान् पुरुषस्य जंघयोः ॥ पतत्रिणो जानुनि विश्वमूर्तेरूर्वोर्गणं मारुतमिंद्रसेनः ॥ २१ ॥ संध्यां ……… र्वाससि गुह्ये ददर्श प्र विभोः
जापतीन् जघने आत्ममुख्यान् ॥ नाभ्यां नभः कुक्षिषु सप्त सिंधुनुरुक्रमस्योरसि ऋक्षमालां ॥ २२ ॥ हृद्यंग धर्मं स्तनयोर्मुरारेर्ऋतं तं च
सत्यं च मनस्यथेंदुं ॥ श्रियं च वक्षस्यरविंदहस्तां कंठे च सामानि समस्तरेफान् ॥ २३ ॥ इंद्रप्रधानानमरान् भुजेषु तत्कर्णयोः ककुभो द्यौश्च
मूर्ध्नि ॥ केशेषु मेघान् श्वसनं नासिकायामक्ष्णोश्च सूर्यं वदने च वह्निं ॥ २४ ॥ वाण्यां च छंदांसि रसे जलेशं भ्रुवोर्निषेधं च विधिं च पक्ष्मसु ॥ अहः
क्षपे त्रिं च परस्य पुंसो मन्युं ललाटेऽधर एव लोभं ॥ २५ ॥ स्पर्शे च कामं नृप रेतसांभः पृष्ठे त्वधर्मं क्रमणेषु यज्ञं ॥ छायासु मृत्युं हसिते च मायां त्रि
तनूरुहेष्वोषधिजातयश्च ॥ २६ ॥ नदीश्च नाडीषु शिला नखेषु बुद्धावजं देवगणानृषींश्च ॥ प्राणेषु गात्रे स्थिरजंगमानि सर्वाणि भूतानि ददर्श वीरः ॥ २७ ॥ नंति
रीद्वा ॥ सर्वात्मनीदं भुवनं निरीक्ष्य सर्वेऽसुराः कश्मलमापुरंग सुदर्शनं च क्रमसह्यतेजः ॥ धनुश्च शार्ङ्गं स्तनयित्नुघोषं पांचजन्यो … ॥ २८ ॥ ॥
॥ २८ सर्वाणि भूतानि ददर्श वीरः २७

स्वधां रसे रसने दृ तसो रेतसि ॥ क्रमणेषु पादन्यासेषु ॥ औषधिजातीश्च प्राणेषु इंद्रियेषु ॥ सर्वात्मनीत्यादि वक्ष्यांतरं सुदर्शनमित्यादीनामीशमुपत
स्थुरित्युत्तरेणान्वयः ॥ ६ ॥

नाम्ना ४ ततः नवै शतिसा दैत्यविभिः॥ अनुचराश्च ते सुराश्च॥ अर्थकृत अनुकूलः॥ यो स्मद्वेष्टं कालमतिवर्तितुं पुमान् ईश्वरः समर्थो

४८ नवा अयं ब्रह्मबंधुर्विष्णुर्मायाविनां वरः॥ द्विजरूपप्रतिच्छन्नो देवकार्यं चिकीर्षति॥ ११॥ अनेन याचमानेन शत्रुणा वटुरूपिणा॥ सर्वस्वं नो
हृतं भर्तुर्न्यस्तदंडस्य वर्हिषि॥ १२॥ सत्यव्रतस्य सततं दीक्षितस्य विशेषतः॥ नानृतं भाषितुं शक्यं ब्रह्मण्यस्य दयावतः॥ १३॥ तस्मादस्य
वधो धर्मो भर्तुः शुश्रूषणं च नः॥ इत्यायुधानि जगृहुर्वलेरनुचरासुराः॥ १४॥ ते सर्वे वामनं हंतुं शूलपट्टिशपाणयः॥ अनिच्छतो वले रा
जन्प्राद्रवन्जातमन्यवः॥ १५॥ तानभिद्रवतो दृष्ट्वा दितिजानीकपान्नृप॥ प्रहस्यानुचरा विष्णोः प्रत्यषेधन्नुदायुधाः॥ १६॥ नंदः सुनं
दोथ जयो विजयः प्रवलो वलः॥ कुमुदः कुमुदाक्षश्च विष्वक्सेनः पतत्रिराट्॥ १७॥ जयंतः श्रुतदेवश्च पुष्पदंतोथ सात्वतः॥ सर्वे
नागायुतप्राणाश्चमूं ते जघ्नुरासुरीं॥ १८॥ हन्यमानान्स्वकान्दृष्ट्वा पुरुषानुचरैर्वलिः॥ वारयामास संरब्धान्काव्यशापमनुस्मरन॥
१९॥ हे विप्रचित्ते हे राहो हे नेमे श्रूयतां वचः॥ मा युध्यत निवर्तध्वं न नः कालोयमर्थकृत॥ २०॥ यः प्रभुः सर्वभूतानां सुखदुःखोपपत्त
ये॥ तं नातिवर्तितुं दैत्याः पौरुषैरीश्वरः पुमान॥ २१॥ यो नो भवाय प्रागासीदभवाय दिवौकसां॥ स एव भगवानद्य वर्तते तद्विपर्ययं॥ २२॥
वलेन सचिवैर्बुद्ध्या दुर्गैर्मंत्रौषधादिभिः॥ सामादिभिरुपायैश्च कालं नात्येति वै जनः॥ २३॥ भवद्भिर्निर्जिता ह्येते वहुशोनुचरा हरेः॥ दैवेन
र्द्धैस्त एवाद्य युधि जित्वा नदंति नः॥ २४॥ एतान्वयं विजेष्यामो यदि दैवं प्रसीदति॥ तस्मात्कालं प्रतीक्षध्वं यो नोर्थत्वाय कल्पते॥ २५॥ श्रीशुक
उवाच॥ पत्युर्निगदितं श्रुत्वा दैत्यदानवयूथपाः॥ रसां निर्विविशू राजन् विष्णुपार्षदताडिताः॥ २६॥ ४८

न भवति॥ हरेरनुचरा देवाः॥ दैवेन ऋद्धैः॥ समृद्धैः॥ भवद्भिः॥ अर्थत्वाय अनुकूलाय॥ ७॥ ॥श्रीगोपीजनवल्लभाय नमः॥ ६॥

अंगानि शिक्षादीनि पुराणानि तत्संहिताश्च ॥ योगएव समीरस्तेन दीपितं ज्ञानमेवाग्निस्तेन रंधितं दग्धं कर्मैककल्मषं कर्मफलं येषां ते च सर्वे तमंघ्रिं ववंदिरे ॥ 96
यस्यांघ्रेः स्मरणानुभाविताः अकर्मकं कर्म निरवाप्यं ॥ विलोरंघ्रये स्वयं यस्य नाभिपंकेरुहसंभवः तस्य विलोरंघ्रिं समभ्यर्च्य लोकत्रयं मोहिप ॥

वेदोपवेदा नियमान्नयान्विताः तर्केतिहासांगपुराणसंहिताः ॥ ये चापरे योगसमीरदीपितज्ञानाग्निनारंधितकर्मकल्मषाः ॥२॥ ववंदिरे यत्स्मर
णानुभाविताः स्वायंभुवं धाम गता अकर्मकं ॥ यस्यांघ्रये प्रोन्मिताय विश्वरूपादरतस्य भवेद्दि लोदके ॥३॥ समर्च्य भक्त्याभ्यगणेषु
त्रिविक्रमाय न्नाभिपंकेरुहसंभवः स्वयं ॥ धातुः कमंडलुजलं तदुरुक्रमस्य पादावनेजनपवित्रतया नरेंद्र ॥४॥ स्वर्धुन्यभून्नभसि सा पतती
निमार्ष्टि लोकत्रयं भगवतो विशदेव कीर्तिः ॥५॥ ब्रह्मादयो लोकनाथाः स्वनाथाय समाहृताः ॥ सानुगा बलिमाजह्रुः संक्षिप्तात्मविभूतये ॥६॥
तोयैः समर्हणैः स्रग्भिर्दिव्यगंधानुलेपनैः ॥ धूपैर्दीपैः सुरभिभिर्लाजाक्षतफलांकुरैः ॥७॥ स्तवनैर्जयशब्दैश्च तद्वीर्यमहिमांकितैः ॥ नृत्यवा
दित्रगीतैश्च शंखदुंदुभिनिःस्वनैः ॥८॥ जांबवान् ऋक्षराजस्तु भेरीशब्दैर्मनोजवः ॥ विजयं दिक्षु सर्वासु महोत्सवमघोषयत् ॥९॥ महीं सर्वां
हृतां दृष्ट्वा त्रिपदव्याजयाच्ञया ॥ ऊचुः स्वभर्तुरसुरा दीक्षितस्यात्यमर्षिताः ॥१०॥

विक्रमति ॥ संक्षिप्ता उपसंहृता आत्मविभूतिः स्वविस्तारो येन तस्मै ॥ यथा पूर्वं वामनरूपेण स्थिताय तस्मै इत्यर्थः ॥ त्रिपदविषयया व्याजयाच्ञया (…तया) स्वभर्तुर्बलेर्महीं हृतां
दृष्ट्वा ऊचुः ॥१०॥

भा॰ अ॰ ४९ ग्रविंशेतु प्रसन्न सन प्रस्याप्यसुतलं बलिं ॥ दत्वा वरान् हरिर्न्न्र्नं भवान् हारपो भवत ॥ २८ ॥ समर्पितान् बिलानिर्मला चलभक्तितः ॥ छलितो बलिना चि
त्रंस्व नैवार्पयत् च्युतः ॥ २ ॥ विप्रकृतः अपकृतः भिद्यमानः सत्या च्चाल्यमानः ॥ ३ ॥ उत्तमश्लोकेति कदाचित् मम वचः इदितं प्रतिश्रुतं नतावद्व्य
लीकं त्वया कपटेन वामनतया मिलित्वा रूपांतरस्याविः कृतत्वात् एवमपि यदि भवान् व्यलीकं मन्यते तथापि ऋतमेवाहं करोमि ॥ मद्वचः व्यलो
भैनं न भवतु ॥ मे शीर्ष्णि निजं तृतीयं पदं कुरु ॥ न च द्वाभ्यां विश्वं क्रांतवतो मे तद्वशिरः पदपर्याप्तं भवतीति मन्येथाः ॥ वित्तेन चेत्पदद्वयं जातं तर्हि दम
धिकमेव स्यात् ॥ वित्तादपि वित्तवतो धिकत्वादिति भावः ॥ ननु च आपदर्थे धनं रक्षेद्दारान् रक्षेद्धनैरपि ॥ आत्मानं सततं रक्षेद्दारैरपि धनैरपीत्या 97

श्रीशुक उवाच ॥ एवं विप्रकृतो राजन् बलिर्भगवतासुरः ॥ भिद्यमानोप्यभिन्नात्मा प्रत्याहाविक्लवं वचः ॥ १ ॥ बलिरुवाच ॥ यद्युत्तमश्लोक भवा
न्ममेरितं वचो व्यलीकं सुरवर्य मन्यते ॥ करोम्यृतं तन्न भवेत्प्रलंभनं पदं तृतीयं कुरु शीर्ष्णि मे निजं ॥ २ ॥ बिभेमि नाहं निरयात्पदच्युतो
न पाशबंधाद्व्यसनाद्दुरत्ययात् ॥ नैवार्थकृच्छ्राद्भवतो विनिग्रहादसाधुवादाद्भृशमुद्विजे यथा ॥ ३ ॥ पुंसां श्लाघ्यतमं मन्ये दंडमर्हत्तमार्पि
तं ॥ यन्न माता पिता भ्राता सुहृदश्चादिशंति हि ॥ ४ ॥

दिवचनात् आत्मभयपरिहारा यस सर्वस्वं तज्यते ॥ त्वं तु कुतो भीतः सन्नात्मानमर्पयसि अत आह ॥ बिभेमीति निरयादिभ्यो न बिभेमि असा ४९
धुवादात् अपकीर्त्या यथाहं भृशमुद्विजे तथा निरयादिभ्यो न बिभेमि ॥ ननु मया निग्रहात्तवापकीर्तिर्जातैव नैवेत्याह ॥ पुंसामिति अर्हत्तमैरपि
तं यद्दंडं माता दयोपि न हि आदिशंति नैवार्पयंति ॥ हितोपि त्वया निग्रहीतोहं श्लाघ्य एवास्मीति भावः ॥ ७ ॥ ॥

विष्णुपत्निषुराजते इतिविराटप्रभोश्चिकीर्षितं ज्ञात्वा ॥ अथमर्थः । अस्यसर्वस्यापहारेणममैतान्निमं नेसंतानेपदानीदेहस्वीकारेणाहंकारमपित्याज
मा पिलापरमनुग्रहंकर्तुमिच्छति ॥ नचानेनतुल्योन्यः कोपिमत्तसंधोथीरोवास्तीतितद्यशः प्रख्यापनार्थं किंचित मातयितुमपाकृतीतिप्रभोरभि — 98
प्रायंज्ञात्वा तंवबंधेति सत्येनहनिस्तोमाभिवदिने ॥ रोदस्योः द्यावापृथिव्यो ॥ असोसृर्यः मयाप्यालनेतव न्वय: ॥ व्यापिनेत्यर्थः ॥ रवंचीदशाभ्व
मौने,

अथतात्पर्यस्तुतोज्ञात्वाविराड्विभुश्चिकीर्षितं ॥ बबंधवारुणैः पाशैर्वलिंसत्यहनिकृतो ॥ २७ ॥ हाहाकारोमहानासीद्रोदस्योःसर्वतोदिशं ॥
गृहस्थमानोसुरपतौ विष्णुनाप्रभविष्णुना ॥ २८ ॥ तंबद्धंवारुणैःपाशैर्भगवानाहवामनः ॥ नष्टश्रियंस्थिरप्रज्ञमुदारयशसंनृप ॥ २९ ॥
पदानित्रीणिदत्तानिभूमेर्मह्यंत्वयासुर ॥ द्वाभ्यांक्रांतामहीसर्वात्तृतीयमुपकल्पय ॥ ३० ॥ यावत्तपत्यसौसूर्योगभस्तिर्यावदिंदुः सहोडुभिः
यावद्वर्षतिपर्जन्यस्तावतीभूरियंतव ॥ ३१ ॥ पदैकेनमयाक्रांतोभूर्लोकोविबरैःसह ॥ स्वर्लोकस्तुद्वितीयेनपश्यतस्तेस्वमात्मना ॥ ३२ ॥ प्र
तिश्रुतमदातुस्तेनिरयेवासइष्यते ॥ विशत्वंनिरयंतस्माद्गुरुणाचानुमोदितः ॥ ३३ ॥ वृथामनोरथस्तस्यदूरःस्वर्गःपततःधः ॥ विप्रलब्धोददामी
तित्वयाहंचाभिमानिना ॥ ३४ ॥ तद्व्यलीकफलंभुंक्ष्वनिरयंकतिचित्समाः ॥ इतिश्रीभागवतेमहापुराणेऽष्टमस्कंधेबलिनियहोनामेकविंशोध्या

द्विरिशमनो:   इतिश्रुतस्यादानेनयोऽर्थिनंविप्रलंभते

ततो: तद्वातत्तरीयंसर्वस्वं ॥ गुरुणाचस्वुक्केणानुमोदितःसन् ॥ एवमुक्केऽपिनिरयपरिहारार्थं चमनोरथं चकुर्वंतंप्रत्याह ॥ दृथेतिप्रतिश्रुतस्यादानेनया
चकंविप्रलंभतेतस्यमनोरथोवृथैवस्वर्गश्चतस्यदूरएवसत्वाधःपतत्येवत्वयाचाहंविप्रलब्धःतस्माद्व्यलीकफलंनिरयंभुंक्ष्वेत्यर्थः ॥ इत्यष्टमेएकविंशः

कथंभूतं कृतां तत्पातिकवर्त्तिमतो: संनिहितं ॥

मा०म० तस्यापि त्रसमं बलात् लाडिता श्रीर्यया यया स्वश्रिया तत्र मतिः स न पुमानिदं जीवितमधःकृतं न बुध्यते । शिरसा नमन्नेव ज्येतम् श्री

५० राकापतिः पूर्णेन्दुः अंजनं निबिडं स्पार्शं स्वकृता हुंकारादिरूपापराधस्मरणेन सव्रीडं नीचीनमधोमुखं यस्य सः ॥ त्वयैवेति । न ह्येतं पदमेतदीयं त्वयापहृतं किं तु स्वीयमेव पुनः स्वीकृतं

न नामवलोक्तितं कृतमनुग्रहदृष्ट्या पुलकैः स्मश्रुभिश्च विकलो विकलः ॥ त्वयैवेति । [illegible] ९९

अथ हृत्मपात्ति रिपोत्त्वं तिकं दैवेन नीतः असमं लाडित श्रीः ॥ इदं स्वतां तातिकवर्त्तिजीवितं यया धकं यस्य मतिर्न बुध्यते ॥ १० ॥ श्री

कउ वा ॥ तस्येत्यभावम एस्य प्रह्वो [illegible] भगवत्प्रियः ॥ आजगाम कुसमेघ राकापतिरिवोत्थितः ॥ ११ ॥ तमिंद्रसेनः स्वपितामहः प्रियावि

राजमानं नलिनायतेक्षणं प्रांशुं पिशंगांबरमंजनत्विषं प्रलंबबाहुं सुभगं समैक्षत ॥ १२ ॥ तस्मै बलिर्वारुणपाशयंत्रितः समर्पणेनो

पजहार पूर्ववत् ॥ ननाम मूर्ध्ना स्तुविलोचनः सव्रीडनीचीनमुखो बभूव ह ॥ १३ ॥ स तत्र हासीनमुदीक्ष्य सत्पतिं सुनंदनंदाद्य

नुगैरुपासितं ॥ उपेत्य भूमौ शिरसा महामना ननाम मूर्ध्ना पुलकाश्रुविक्लवः ॥ १४ ॥ श्री प्र [illegible] उवा ॥ त्वयैव दत्तं पदमैन्द्रमूर्जितं

हृतं तदेवाद्य तथैव शोभनं ॥ मन्ये महानस्य कृतो ह्यनुग्रहो विभ्रंशितो यच्छ्रिय आत्ममोहनात् ॥ १५ ॥ यया हि विद्वानपि मुह्यते यत

स्तत्को विचष्टे गतिमात्मनो यथा ॥ तस्मै नमस्ते जगदीश्वराय वै नारायणायाखिललोकसाक्षिणे ॥ १६ ॥ ५०

त्तद्वशो भवन्नेव कृतं तत्र हेतुः मन्य इति ॥ यद्यस्मात् श्री रेव यत् आत्ममोहनं तस्माद्विभ्रंशितः ॥ मोहकत्वमेवाह यया श्रिया विद्वानपि यतः संयतोपि मु

ह्यते तत्तस्याः सकाशात्को न्यः पुमानात्मनो गतिं तत्त्वं यथावद्विचष्टे पश्यति तस्मै ॥ महाकारुणिकाय ॥ ६ ॥

नन्वहं देवानां हिते [illegible] नासुरगणं त्वाह ॥ त्वं नूनमिति परोक्षः शत्रुकुलेन वर्त्तमानः ॥ शत्रुत्वं पुनर्भक्तो नेवास्माननुग्रहीतुमेवेत्याह यस्मिन्नि 100
ति ॥ उग्रस्तेऽहं श्रसिद्धं ॥ अतो नात्रस्म मलज्ञापि दुःखमित्याह ॥ तेन गुरुणा भवता किंच ॥ योयं दण्डरूपो ममानुग्रहः त्वया कृतः सतु वेद्यत्रकेपो त्र
त्वेन न त्वदनुग्रहस्य पात्रमित्याशयेनाह पितामह इति ॥ भवदीयानां संमतः यतः आविःकृतः साधुवादो यस्य त्वमेव परम आश्रयो यस्य सः
अतः भवतो विपक्षेण विद्विषा हिरण्यकशिपुना विचित्रवैशसं हिंसां संप्रापितो पि दृष्टादीनामस्मारतां निश्चित अकुतोभयं एवं च भवतः पा

त्वं नूनमसुराणां नः पारोक्षः परमो गुरुः ॥ यो नोनेकमदांधानां विध्वंसं च कृपादिशत् ॥ ४ ॥ यस्मिन्वैरानुबंधेन रूढेन विबुधेतराः ॥ बहवो ले
भिरे सिद्धिं यामु हैकांतयोगिनः ॥ ५ ॥ तेनाहं निगृहीतोस्मि भवता भूरिकर्मणा ॥ बद्धश्च वारुणैः पाशैर्नो नुव्रीडे न वि व्यथे ॥ ६ ॥ पितामहो
मे भवदीयसंमतः प्रह्लाद आविःकृतसाधुवादः ॥ भवद्विपक्षेण विचित्रवैशसं संप्रापितस्त्वत्परमः स्वपित्रा ॥ ७ ॥ किमात्मनानेन ज
हाति योंततः किं रिक्थहारैः स्वजनाख्यदस्युभिः ॥ किं जायया संसृतिहेतुभूतया मर्त्यस्य गेहैः किमिहायुषो व्ययः ॥ ८ ॥ इत्थं स निश्चि
त्य पितामहो महानगाधबोधो भवतः पादपद्मं ॥ ध्रुवं प्रपेदे ह्यकुतोभयं जनाद्भीतः स्वपक्षक्षपणस्य सत्तम ॥ ९ ॥ ॥

रूपद्मं ध्रुवं प्रपेदे । अथ तस्माद्दृष्टमपि दैवेन तस्यैवार्पणेन तत्वं तिकं नीत इति चतुर्णामन्वयः । अंततः आयुषां ते रिक्थहारैः पुत्रैः इह गेहेषु के
वलमायुषो व्यय एव न तु सुखं किंचित् ॥ सः ज्ञासि ह्योम्कान् स्वपक्षं देत्यपक्षं क्षपयतीति तथा ॥ ९ ॥

86

५२

तस्य विशः अर्थान् नत्वर्थोपहारः कोऽयमनुग्रहः तत्राह ॥ यन्मदः यैर्धनैर्मदो यस्य सः अतएव स्तब्धः अनम्रः मद्भक्तं महतश्च नामस्थानापहार
स्वानुग्रह इत्यर्थः ॥ दुर्लभं पुरुषजन्म कथं विद्याद्यवतो जीवस्य जन्मादिनिमित्तो महानभिमानस्तस्य च नाशो मदनुग्रहादेवेत्याह द्वाभ्यां यदेति अनी
शः परतंत्रः स्वनिजैः कर्मभिः नानायोनिषु कृमिकीटादिषु संसरन् तत्र पौरुषं गतो जन्मादिभिः स्तम्भो यदि तस्य न भवेत् तर्हि अयं मदनुग्रह एव
कथं तर्हि धनादिभिः संपदो दृश्यन्त इति चेत्तत्राह ॥ मान एव स्तंभः अनम्रता तस्य निमित्तभूता समंततः सर्वश्रेयःप्रतिकूलानां जन्मादीनां सत्त्वेऽपि

श्रीभगवानुवाच ॥ ब्रह्मन्यमनुगृह्णामि तद्विशो विधुनोम्यहं ॥ यन्मदः पुरुषस्तब्धो लोकं मां चावमन्यते ॥२२॥ यदा कदाचिज्जीवात्मा संस
रन्निजकर्मभिः ॥ नानायोनिष्वनीशोऽयं पौरुषीं गतिमाव्रजेत् ॥२३॥ जन्मकर्मवयोरूपविद्यैश्वर्यधनादिभिः ॥ यद्यस्य न भवेत्स्तंभस्तत्रायं
मदनुग्रहः ॥२४॥ मानस्तंभनिमित्तानां जन्मादीनां समंततः ॥ सर्वश्रेयःप्रतीपानां हंत मुह्येन्न मत्परः ॥२५॥ एष दानवदैत्यानामग्रणीः कीर्तिवर्द्ध
नः ॥ अजैषीदजयां मायां सीदन्नपि न मुह्यति ॥२६॥ क्षीणरिक्थश्च्युतः स्थानात्क्षिप्तो बद्धश्च शत्रुभिः ॥ ज्ञातिभिश्च परित्यक्तो यातनामनुया
पितः ॥ गुरुणा भर्त्सितः शप्तो जहौ सत्यं न सुव्रतः ॥ छलैरुक्तो मया धर्मो नायं त्यजति सत्यवाक् ॥२७॥ एष मे प्रापितः स्थानं दुःप्रापममरैरपि ॥ साव
र्णेरंतरस्यायं भवितेंद्रो मदाश्रयः ॥२८॥

जन्मादिभिरिति वा हंत हे ब्रह्मन् मत्परो न मुह्येत अतो भक्तस्य कृपया संपदोऽपि ददामि अभक्तस्तु मुह्येदिति तदपहाररूपमेव तस्यानुग्रहं करोमीति भावः ॥
अस्य चेदानीं मत्परत्वाद् दुःप्रापमपि दास्यामीति वक्तुं तस्य मोहाभावमाह ॥ एष इति त्रिभिः ॥ न ह्येतस्मिन् कुले कश्चिन्निःसत्त्वः कृपणः पुमानि ५२
त्यादिना छलैरेव मया धर्म उक्तः ॥ तथापि धर्ममयं न त्यजति अतः सत्यवाक् मे मया अहमेवाश्रयः पालको यस्य सः ॥७॥

101

तस्मानुष्टुवतो राजन् प्रह्लादस्य कृतांजलेः। दिराप्रगर्भौ भगवानुवाच मधुसूदनः
बलि पती

तस्य प्रह्लादस्यानुष्टुवतः उवाचेति किंचिदनुकम्पयन्नित्यर्थः॥ तदेवविंध्यावलिरपि वधूं प्रदत्ता तां च संभ्रम नयनं दृष्ट्वा ततदेव भगवान्नहिरण्यगर्भः किंचि
द्विद्दृष्टुं तत्र समागतः॥ लोपं त्रयीस्थितः अतस्तस्या एव वाक्यं प्रथमम वतारयति वद्ध्वी दृष्टेति॥ त्रिजगतः कर्तुः प्रभोः पालकस्य अस्य तः संहर्तु
श्च ईश्वरस्य तवान्ये किम आवहन्ति किं समर्पयन्ति त्वया वरोपितः कर्तृवादः कर्त्तारः स्व तंत्रा वयमिति वादमात्रमपि येषां ते अयं भावः लोकत्रयं मया
र्पितं तृतीयपददानाय देहं समर्प्य प्रतिश्रुतम् तं करोमीति दर्शादि पुत्र्याः स्वावि कारेण भुवनत्रयं कुबुद्धिर्निर्लज्जश्चायतस्त्वमेव सर्वस्यापि स्वामी अतो मं द

श्रीशुक उवाच॥ वद्ध्वी स्वपतिं साध्वी तत्र श्रीमयविकला॥ प्रांजलिः प्रणतोपेन्द्रं वभाषेवाङ्मुखी नृप॥ विंध्यावलिरुवाच॥ क्रीडार्थमात्मन
इदं त्रिजगत्कृतं ते स्वाम्यं तु तत्र कुधियोपर ईश कुर्युः॥ कर्तुः प्रभोस्तव किमस्यति आवहन्ति त्यक्तह्रियस्त्वदवरोपित कर्तृवादाः॥ १९॥ श्रीशुक
उवाच॥ तस्यानुष्टुवतो राजन् प्रह्लादस्य कृतांजलिः॥ हिरण्यगर्भो भगवानुवाच मधुसूदनं॥ २०॥ ब्रह्मोवाच॥ भूतभावन भूतेश देवदेव ज
गन्मय॥ मुंचैनं हृतसर्वस्वं नायमर्हति निग्रहं॥ २१॥ कृत्स्ना तेनेन दत्ता भूर्लोकाः कर्मार्जिता श्चये॥ निवेदितं च सर्वस्वमात्मा विक्लवया धिया॥ २२
यत्पादयोरशठधीः सलिलं प्रदाय दूर्वांकुरैरपि विधाय सतीं सपर्यां॥ अप्युत्तमां गतिमसौ लभते त्रिलोकीं दाश्वाननविक्लवमनाः कथमार्तिमृच्छेत्॥ २३
ठधीः

बुद्धिमन्नं केवलं कृपयाविमुंचपालयेति उक्तं च प्रमातामहीनामयमेवस्त्याप द्रयं यथासि पद्मनाभ॥ विनापराधं मम वञ्चकोऽतः प्रभुर्यदेवं विलसितं
करोतु तदेवं प्रह्लादस्य विंध्यावलेश्च प्रार्थनया प्रसन्नो हरि र्इल्वा तु लोकद्वयीं दत्वा पयति त्रिभिः॥ भूत भावनेति देव देवेति त्रिभिः॥ निग्रहं नर्हत्वे
हेतुः कृत्स्नेति। सर्वस्वमेवाह आत्मेति तदेवं कैमुत्यन्यायेनाह यस्य नवपादयोः सलिलमात्रमपि प्रदाय सर्वोपि जनः उत्तमां गतिं प्रा
प्नोति तस्मै तुभ्यमसौ बलिस्त्रिलोकीं दाश्वान् दत्तवान् आर्तिं कथं प्राप्नुयात्॥ २३॥

102

५२

अक्लेशतोऽनामसमर्हिमायदर्थे कृतः समुद्यमः एव प्रपन्नानां भक्तानां यो अर्थः तस्य विधौ अभक्षेपितस्य संपादने समाहितः अप्रमत्तः स्थितः
कुतः यतः येनोद्यमेन लोकपालैरमरैः सत्वप्रधानैरपि अलब्धपूर्वस्त्वदनुग्रहः अपसदे नीचे राजसे मयि अर्पितः । अयं भावः परमेश्वरा ·103
यतुमपमदं कराव त्रिलोकी दत्तवान् नित्यैतत्रत्स्रं ब्राह्मणोऽपि न सम्यक् कृतः ॥ किंतु तदर्थमुद्यममात्रं कृतं । तेन च तपोदानादिकोटिभिरप्यल

कृतः
श्री व लि रु वा च ॥ अक्लेशाणामार्यं समुद्यमः प्रपन्नभक्तार्थविधौ समाहितः ॥ यल्लोकपालैस्त्वदनुग्रहोऽमरैरलब्धपूर्वोऽपसदेऽसुरे
र्पितः ॥ २ ॥ श्री शु क उ वा च ॥ इत्युक्त्वा हरिमानम्य ब्रह्माणं सभवं ततः ॥ विवेश सुतलं प्रीतो बलिर्मुक्तः सहासुरैः ॥ ३ ॥ एवमिंद्राय
भगवान् प्रत्यानीय त्रिविष्टपं ॥ पूरयित्वादितेः कामं शशास सकलं जगत् ॥ ४ ॥ लब्धप्रसादं निर्मुक्तं पौत्रं वंशधरं बलिं ॥ निशाम्य
भक्तिप्रवणः प्रह्लाद इदमब्रवीत् ॥ ५ ॥ श्री प्र ह्ला द उ वा च ॥ नेमं विरंचो लभते प्रसादं न श्रीर्न शर्वः किमुतापरे ये ॥ यन्नोऽसुरा
णामसि दुर्गपालो विश्वाभिवंद्यैरभिवंदितांघ्रिः ॥ ६ ॥ यत्पादपद्ममकरंदनिषेवणेन ब्रह्मादयः शरणद स्नुवते विभूतीः ॥ कस्मा
द्वयं कुसृतयः खलयोनयस्ते दाक्षिण्यदृष्टिपदवीं भवतः प्रणीताः ॥ ७ ॥
स्पृष्टे

भस्त्वदनुग्रहः संपादितः ॥ अक्लेशत्वमप्रभावः । आश्चर्यमिति ॥ अभ्यासत उपेंद्रः स न पालयामास ॥ दुर्गपालोऽसि रक्षितोऽसि सर्वतोऽपि तु क
स्मात् हे शरणद आश्रयप्रद वयं कुसृतयः दुर्वृत्ताः खलयोनयः उग्रजातयश्च ते त्वयं तस्य भवतो दाक्षिण्यदृष्टेः पदवीं कस्माद्धेतोः प्रणीताः ५२
वकुमानेनचित्तानुवर्तिनं दाक्षिण्यं तेन दृष्टिस्त्वाद्विषयतां प्रापिताः ॥ ७ ॥

स्थानं स्थापित इत्ययदुक्तं तदेव स्थानमाह ॥ तावत्सावर्णिमन्वंतरपर्यंतं सुतलमध्यास्तां अधिवसन्नित्यर्थः ॥ यद्यस्मिन्निवसतां आध्यादयो म 104

मे ह्याधयान संभवंति ॥ एवं ब्रह्मलोकात्सुरलोकाकरुणपरवशः साक्षाद्बलिं प्रत्याह ॥ इंद्रसेनेति चतुर्भिः ॥ त्वच्छासनं अतिगत्वर्तिवर्तंत इति तथा तत्र ॥

*अति *ता ते

तावत्सुतलमध्यास्तां विश्वकर्मविनिर्मितं ॥ यन्नाधयो व्याधयश्च क्लमस्तंद्रा पराभवः ॥ २५ ॥ नोपसर्गा निवसतां संभवंति ममेक्षया ॥

इंद्रसेन महाराज याहि भो भद्रमस्तु ते ॥ २६ ॥ सुतलं स्वर्गिभिः प्रार्थ्यं ज्ञातिभिः परिवारितः ॥ न त्वामभिभविष्यंति लोकेशाः किमुता

परे ॥ २७ ॥ त्वच्छासनातिगान्दैत्यान् चक्रं मे सूदयिष्यति ॥ रक्षिष्ये सर्वतोऽहं त्वां सानुगं सपरिच्छदं ॥ २८ ॥ सदा संनिहितं वीर तत्र मां द्र

क्ष्यते भवान् ॥ तत्र दानवदैत्यानां संगात्ते भाव आसुरः ॥ दृष्ट्वा मदनुभावं वै सद्यः कुंठो विनंक्ष्यति ॥ २९ ॥ इति श्रीभागवते महा

पुराणे ऽष्टमस्कंधे बलिनो बंधनं नाम द्वाविंशोऽध्यायः ॥ २२ ॥ श्रीशुक उवाच ॥ इत्युक्तवंतं पुरुषं पुरातनं महानुभावोऽखिल

साधुसंमतः ॥ बद्धांजलिर्बाष्पकलाकुलेक्षणो भक्त्युत्कलो गद्गदया गिराब्रवीत् ॥ १ ॥

तथापि भगवद्वियोगात् रुदन्निव तं तत्र साहस इति ॥ संगाद्य आसुरो भावः स विनंक्ष्यति ॥ इत्यष्टमे द्वाविंशः ॥ त्रयोविंशे बलौ याते सुतलं सपिता

महः ॥ उपेंद्रेण दिवं गत्वा पूर्ववन्मोदते हरिः ॥ १ ॥ बाष्पकलाभिर्बिंदुभिराकुले ईक्षणे यस्य ॥ भक्त्या उत्कलः उत्कंठः ॥ १ ॥

भा॰ ८ अ॰ मखनयस्य सर्वेणापि भावेन वस्तुमात्रेण पूजितः तस्य कर्मसु कुतो वैषम्यं ॥ कथंभूतः कर्मणामीश्वरः अवतर्त्तकः फलदः यज्ञपुरुषः यज्ञ [टीका ॥ २१] 105
२३ नयज्ञपुरुषः ॥ आस्तां तावत्पूजा यस्मात् मंत्रतः स्वरादिभ्रंशेन, तंत्रतः क्रमादिनादेशतः कालतश्च अर्हतः पात्रतः वस्तुतश्च दक्षिणा
दिनायच्छिद्रं न्यूनं तत्सर्वं तव नुकीर्त्तनमात्रमेव निश्छिद्रं करोति ॥ इति किंकरत्वं प्रतिपन्नः इत्याह चतुर्भिः अतो ब्रह्मा च्छिद्रं समाधत्त संदधे यत्तदनंतरे समाधाय

श्रीशुक उवाच ॥ कुतस्तत्कर्मवैषम्यं यस्य कर्मेश्वरो भवान् ॥ यज्ञेशो यज्ञपुरुषः सर्वभावेन पूजितः ॥१४॥ मंत्रतस्तंत्रतः छिद्रं देशकाला
श्रीशुक॰ र्हवस्तुतः ॥ सर्वं करोति निःछिद्रं नामसंकीर्त्तनं हरेः ॥१५॥ तथापि वदतो भूमन् करिष्याम्यनुशासनं ॥ एतच्छ्रेयः परं पुंसां यत्तवाज्ञानुपाल
नं ॥ १६ ॥ अभिनंद्य हरेराज्ञामुशना भगवानिति ॥ यज्ञच्छिद्रं समाधत्त बलेर्विप्रर्षिभिः सह ॥१७॥ एवं बलेर्महीं राजन् भिक्षित्वा वामनो हरिः
ददौ भ्रात्रे महेंद्राय त्रिदिवं यत्परैर्हृतं ॥१८॥ प्रजापतिपतिर्ब्रह्मा देवर्षिपितृभूमिपैः ॥ दक्षभृग्वंगिरोमुख्यैः कुमारेण भवेन च ॥१९॥ कश्य
पस्यादितेः प्रीत्यै सर्वभूतभवाय च ॥ लोकानां लोकपालानामकरोद्वामनं पतिं ॥२०॥ वेदानां सर्वदेवानां धर्मस्य यशसः श्रियः ॥ मंगला
नां व्रतानां च कल्पं स्वर्गापवर्गयोः ॥२१॥ उपेंद्रं कल्पयांचक्रे पतिं सर्वविभूतये ॥ तदा सर्वाणि भूतानि भृशं मुमुदिरे नृप ॥२२॥ ततस्त्विंद्रः पु
रस्कृत्य देवयानेन वामनं ॥ लोकपालैर्दिवं निन्ये ब्रह्मणा चानुमोदितः ॥२३॥ प्राप्य त्रिभुवनं चेंद्र उपेंद्रभुजपालितः ॥ श्रिया परमया जुष्टो मुमुदे
गतसाध्वसः ॥२४॥ ब्रह्मा शर्वः कुमारश्च भृग्वाद्या मुनयो नृप ॥ पितरः सर्वभूतानि सिद्धा वैमानिकाश्च ये ॥२५॥

५३

तामनुज्ञां संपादितवानिति शेषः ॥ देवाश्च ऋषयश्च भूमिपाश्च मनवश्च तैः सहितः ॥ ननु लोकादीनां पतिरिंद्रो ऽस्त्येव सत्यं तथापि देवादीनां कल्पं पा
लनेदक्षं ॥ वामनमुपेंद्रं कल्पयांचक्रे ॥ देवयानेन मार्गेण विमानेन वा ॥ ७ ॥

भक्तप्रियत्वादिति चेत्तर्हि एवं तवेहितं अहो चित्रं किं तत्र सर्वात्मनः समदृशः स्वभावो विषम इति यत् ॥ सर्वात्मकत्वे चित्रं च यदि तत्र हेतुः अमिता
अचिंत्या योगमाया तस्या लीला तया विसृष्टानि रचितानि भुवनानि येन तस्य अहो इति तानसंधिरार्षः ॥ समदृक्त्वे हेतुः ॥ विशारदस्य सर्वज्ञस्य अथ
वा भक्तप्रियत्वेपि तवैव वैषम्यं नास्त्येव यतः कल्पतरुस्वभावः स न भक्तप्रियोसि ॥ नहि कल्पतरुराश्रितानामेव कामान्पूरयन्नपि विषमो भवति ॥

चित्रं तवेहितमहोमितयोगमायालीलाविसृष्टभुवनस्य विशारदस्य ॥ सर्वात्मनः समदृशो विषमः स्वभावो भक्तप्रियो यदसि कल्पतरुस्वभा
वः ॥ ७ ॥ श्रीभगवानुवाच ॥ वत्स प्रह्लाद भद्रं ते प्रयाहि सुतलालयं ॥ मोदमानः स्वपौत्रेण ज्ञातीनां सुखमावह ॥ ८ ॥ नित्यं द्रष्टासि मां तत्र गदापा
णिमवस्थितं ॥ मद्दर्शनमहाह्लादध्वस्तकर्मनिबंधनः ॥ ९ ॥ श्रीशुक उवाच ॥ आज्ञां भगवतो राजन्प्रह्लादो बलिना सह ॥ बाढमित्यमलप्रज्ञो मू
र्ध्न्याधाय कृतांजलिः ॥ १० ॥ परिक्रम्यादिपुरुषं सर्वासुरचमूपतिः ॥ प्रणतस्तदनुज्ञातः प्रविवेश महाबिलं ॥ ११ ॥ अथाहोशनसं राजन्हरि
र्नारायणोंतिके ॥ आसीनमृत्विजां मध्ये सदसि ब्रह्मवादिनां ॥ १२ ॥ ब्रह्मन्संतनु शिष्यस्य कर्मछिद्रं वितन्वतः ॥ यत्तत्कर्मसु वैषम्यं ब्रह्मदृष्टं
समं भवेत् ॥ १३ ॥

त्पर्थः ॥ मद्दर्शनेन यो महाह्लादस्तेन ध्वस्तं कर्मबंधनं महत्त्वानं यस्य ॥ कर्म वितन्वतः शिष्यस्य यत् छिद्रमंतरं न्यूनं जातं तत्संतनु विस्तारय संधत्स्व ॥ यज
मानं विना कथं संधातव्यमिति न वाच्यमित्याह ॥ यत्तदिति ब्रह्मदृष्टं ब्राह्मणैर्दृष्टमेव समं भवेत् किंपुनरनुष्ठितमित्यर्थः ॥ [illegible] ॥

श्री०
४

ननु कस्मादकस्मादेव मत्स्यावतारश्रवणे काङ्क्षावाननुसाहरपादित्याह यदर्थमिति द्वाभ्यां ॥ दुर्मर्षं दुःसहं बलेरनुग्रहाय जुगुप्सितमपि याञ्चारूपं धृतवानिति युक्तमुक्तं यदर्थं तु लोकजुगुप्सितं मत्स्यरूपं तमसा प्रकृतमधारयत ॥ एतन्नो यथावद्वक्तुमर्हसीत्यर्थः ॥ साम्यं येनावतारप्रयोजनमाह ॥ गोविप्रेति ॥ जुगुप्सितत्वं परिहरति धियो गुणैर्यान्युच्चावचानि रूपाणि तेषु नियन्तृत्वेन चरन्नपीश्वरो नोच्चावचत्वं भजते निर्गुणत्वात् ॥ 107

यदर्थमदधाद्रूपं मात्स्यं लोकजुगुप्सितं ॥ तमःप्रकृति दुर्मर्षं कर्मग्रस्त इवेश्वरः ॥ २ ॥ एतन्नो भगवन्सर्वं यथावद्वक्तुमर्हसि ॥ उत्तमश्लोक-
चरितं सर्वलोकसुखावहं ॥ २ ॥ श्रीसूत उवाच ॥ इत्युक्तो विष्णुरातेन भगवान्बादरायणिः ॥ उवाच चरितं विष्णोर्मत्स्यरूपेण यत्कृतं ३
श्रीशुक उवाच ॥ गोविप्रसुरसाधूनां छंदसामपि चेश्वरः ॥ रक्षामिच्छंस्तनूर्धत्ते धर्मस्यार्थस्य चैव हि ॥ ४ ॥ उच्चावचेषु भूतेषु चरन्वा-
युरिवेश्वरः ॥ नोच्चावचत्वं भजते निर्गुणत्वाद्धियो गुणैः ॥ ५ ॥ आसीदतीतकल्पान्ते ब्राह्मो नैमित्तिको लयः ॥ समुद्रोपप्लुतास्तत्र लोका
भूरादयो नृप ॥ ६ ॥ कालेनागतनिद्रस्य धातुः शिशयिषोर्बली ॥ मुखतो निःसृतान्वेदान्हयग्रीवोऽन्तिकेऽहरत् ॥ ७ ॥ ज्ञात्वा तद्दानवेंद्र-
स्य हयग्रीवस्य चेष्टितं ॥ दधार शफरीरूपं भगवान्हरिरीश्वरः ॥ ८ ॥ तत्र राजर्षिः कश्चिन्नाम्ना सत्यव्रतो महान् ॥ नारायणपरोऽतप्यत्त-
पः स सलिलाशनः ॥ ९ ॥ योऽसावस्मिन्महाकल्पे तनयः स विवस्वतः ॥ श्राद्धदेव इति ख्यातो मनुत्वे हरिणार्पितः ॥ १० ॥

५४

कुतः पुनः शुद्धसत्त्वमयैर्मत्स्याद्याकारैरुच्चावचत्वशंकेति भावः ॥ विरोधतो मत्स्यावतारप्रयोजनमाह ॥ आसीदिति त्रिभिः ॥ ब्रह्मणो निद्रा-
यां भवो ब्राह्मः तेनैव निमित्तेन जातो नैमित्तिकः समुद्रोपप्लुता निमग्नाः ॥ अन्तिके निःसृतान् ॥ शफरीरूपं मत्स्यरूपं ॥ प्रयोजनांतरं च
लीलाप्रकारं चाह ॥ तत्र राजर्षिरित्यादि यावत्समाप्तिः ॥ स एव श्राद्धदेव इति विख्यातः ॥ ८ ॥

एवं चरितं सर्वमाख्यातमिति विशेषो ज्ञात्वा अन्यानपि संतीत्युक्तं तानि तर्हि निःशेषाणि वर्णनीयानीत्यपेक्षायामाह पारमिति उरुक्रमस्य विक्रमतो
विष्णोर्महिम्नः पारं यो गृणन् नो भवति स मर्त्यः पार्थिवानि रजांसि अपि विममे गणितवान् ॥ अयं पार्थिवपरमाणुगणनम् शक्यं तथापि विष्णोर्गुण
गणनमशक्यमित्यर्थः ॥ तथा च मंत्रः ॥ विष्णोर्नु कं वीर्याणीति ॥ एतदेव मंत्रांतराभिप्रायेणाह यस्य पुरुषस्य महिम्नः पारं मंत्रदृगृषि
र्विवशिष्ठः इति एवमाह ॥ कथं किं जायमानो जातो वा उपैति न कोऽप्युपैति वदन्नपि तस्यैवैवं नहीत्यर्थः ॥ तथा च मंत्रः ॥ न ते विष्णो जायमानो न नो

सुमहत्कर्म यद्विष्णोर्यतः परमाद्भुतं ॥ धिष्ण्यानि स्वानि ते जग्मुरदितिं च शशंसिरे ॥ २६ ॥ सर्वमेतन्मयाख्यातं भवतः कुलनंदन ॥ उरुक्रमस्य
चरितं श्रोतॄणामघमोचनं ॥ २७ ॥ पारं महिम्न उरुविक्रमतो गृणानो यः पार्थिवानि विममे स रजांसि मर्त्यः ॥ किं जायमान उत जात उपैति म
र्त्य इत्याह मंत्रदृगृषिः पुरुषस्य यस्य ॥ २८ ॥ य इदं देवदेवस्य हरेरद्भुतकर्मणः ॥ अवतारानुचरितं शृण्वन्याति परां गतिं ॥ २९ ॥ क्रिय
माणे कर्मणीदं दैवे पित्र्येऽथ मानुषे ॥ यत्र यत्रानुकीर्त्येत तत्तेषां सुकृतं विदुः ॥ ३० ॥ इति श्रीभागवते महापुराणे अष्टमस्कंधे वामनावता
रचरिते त्रयोविंशोऽध्यायः ॥ २३ ॥ श्रीराजोवाच ॥ भगवन् श्रोतुमिच्छामि हरेरद्भुतकर्मणः ॥ अवतारकथामाद्यां मायामत्स्यविडंब
नां ॥ १ ॥

जातो देवमहिम्नः पारं संतमाप्नोतीति य इदं शृण्वन्भवति स परां गतिं याति सुकृतं यथावत्तत् विदुः ॥ अष्टमे त्रयोविंशः ॥ चतुर्विंशेऽत्र संगेन म
त्स्यरूपस्य शार्ङ्गिणः ॥ लीला च्यते यतः स्वप्नव्रतरद्वान् सरार्णवे ॥ १ ॥ तनुं तनुनिदधपी दौनिजैश्वर्यनिदर्शनात् ॥ मत्स्यं प्रकृतिप्रक्षीरलोली
लयावामनोपमं ॥ २ ॥ मायया मत्स्यविडंबनं मत्स्यरूपानुकरणं यस्यां नित्रूप्यते तां ॥ ३ ॥

मुख्यः सत्वः आत्मा वर्तते यस्य सः ॥ हे अरविंदाक्ष पद्मनाभ वांछिताभिमानि नां असतामितरेषां पादोपसर्पणं यथा न भवेत् तथा
सर्वसुहृत्प्रियात्मनस्तव पादोपसर्पणेन न भवेत् ॥ यद्यस्मात् नो भक्तानां मद्भुतं वपुः दर्शितवानसि ॥ पाठांतरे पद्मनाभ नो भेद

नमस्ते पुरुषश्रेष्ठ स्थित्युत्पत्त्यप्ययेश्वर ॥ भक्तानां नः प्रपन्नानां मुख्यो ह्यात्मगतिर्विभो ॥ २६ ॥ सर्वे लीलावतारास्ते भूतानां भूतिहेतवः
ज्ञातुमिच्छाम्यदो रूपं यदर्थं भवता धृतं ॥ २७ ॥ न तेरविंदाक्षपदोपसर्पणं मृषा भवेत्सर्वसुहृत्प्रियात्मनः ॥ यथेतरेषां पृथगात्मनां सतां
मदीदृशो यद्वपुरद्भुतं हि नः ॥ २८ ॥ इति ब्रुवाणं नृपतिं जगत्पतिः सत्यव्रतं मत्स्यवपुर्युगक्षये ॥ विहर्तुकामः प्रलयार्णवेब्रवीच्चिकीर्षितं विकीर्षुरकांडनः
भक्तजनप्रियः प्रभुः ॥ २९ ॥ श्री भगवानुवाच ॥ सप्तमेद्यतनादूर्ध्वमहन्येतदरिंदम ॥ निमंक्ष्यत्यप्ययांभोधौ त्रैलोक्यं भूर्भुवादिकं ॥ ३० ॥ त्रि प्रियः प्रियः इति पाठः
लोक्यां लीयमानायां संवर्ताम्भसि वै तदा ॥ उपस्थास्यति नौः काचिद्विशाला त्वां मयेरिता ॥ ३१ ॥

दर्शितः पुंसः ॥ असतां परिच्छिन्नानां पादोपसर्पणं यथा न भवेदित्यर्थः ॥ एकांतभक्त नाम भक्ताः ॥ ^प्रियायस्य ॥ अप्ययांभोधौ प्रलयार्णवे ॥ भूर्भुव आदिकमित्य
र्थः ॥ संवर्ताम्भसि प्रलयोदके त्वामुपस्थास्यति प्राप्स्यति ॥ ७ ॥

कृतमालायां नद्यां यत्राहं सुखं निवसामि तदा कः स्यान्नं कल्पय ॥ औदंचनोदके मीनाकस्यो जले ॥ रक्षायोगेनोपायेन यथा महाकर ग्रानेरवौ जलं

एकदा कृतमालायां कुर्वतो जलतर्पणं ॥ तस्यांजल्युदके काचिच्छफर्येकाभ्यपद्यत ॥ १० ॥ सत्यव्रतोंजलिगतां सह तोयेन भारत ॥ उत्ससर्ज नदी तोये शफरीं
द्रविडेश्वरः ॥ ११ ॥ तमाह सातिकरुणं महाकारुणिकं नृपं ॥ यादोभ्यो ज्ञातिघातिभ्यो दीनां मां दीनवत्सल ॥ १२ ॥ कथं विसृजसे राजन्भीतामस्मिन्सरि
ज्जले ॥ तमात्मनोनुग्रहार्थं प्रीत्या मत्स्यवपुर्धरं ॥ १३ ॥ अजानन्रक्षणार्थाय शफर्याः स मनो दधे ॥ तस्या दीनतरं वाक्यमाश्रुत्य स महीपतिः ॥ १४ ॥ कलशा
प्सु निधायैनां दयालुर्निन्य आश्रमं ॥ सा तु तत्रैकरात्रेण वर्धमाना कमंडलौ ॥ १५ ॥ अलब्ध्वात्मावकाशं वा इदमाह महीपतिं ॥ नाहं कमंडलावस्मिन्
कृच्छ्रं वस्तुमिहोत्सहे ॥ १६ ॥ कल्पयौकः सुविपुलं यत्राहं निवसे सुखं ॥ स एनां तत आदाय न्यधादौदंचनोदके ॥ १७ ॥ तत्र क्षिप्ता मुहूर्तेन हस्तत्र
यमवर्द्धत ॥ न म एतदलं राजन्सुखं वस्तुमुदंचनं ॥ १८ ॥ पृथु देहि पदं मह्यं यत्त्वाहं शरणं गता ॥ तत आदाय सा राज्ञा क्षिप्ता राजन्सरोवरे ॥ १९ ॥
तदावृत्यात्मना सोयं महामीनो न्ववर्द्धत ॥ नैतन्मे स्वस्तये राजन्नुदकं सलिलौकसः ॥ २० ॥ निधेहि रक्षायोगेन ह्रदे मामविदासिनि ॥ इत्युक्तः
सोनयन्मत्स्यं तत्र तत्राविदासिनि ॥ २१ ॥ जलाशयेऽसंमितं तं समुद्रे प्राक्षिपज्झषं ॥ क्षिप्यमाणस्तमाहेदमिह मां मकरादयः ॥ २२ ॥ अदंत्यतिबला
वीरमां नेहोत्स्रष्टुमर्हति ॥ एवं विमोहितस्तेन वदता वल्गुभारतीं ॥ २३ ॥ तमाह को भवानस्मान्मत्स्यरूपेण मोहयन् ॥ नैवं वीर्यो जलचरो दृष्टोस्माभिः
श्रुतोपि वा ॥ २४ ॥ यो भवान्योजनशतमह्नाभिव्यानशे सरः ॥ नूनं त्वं भगवान्साक्षाद्धरिर्नारायणोऽव्ययः ॥ अनुग्रहाय भूतानां धत्से रूपं जलौ
कसां ॥ २५ ॥

विनात्र सुप्येयं तेनोपायेन निधेहि अविदासिनि अनुपक्षये ॥ संमितं तत्तुल्याशयपरिमितं संतं ॥ अभिव्यानशे अभिव्याप्तवान् ॥ ४ ॥

किंवशाकृतो गुरुरनघहेतुरित्याह जन इति ॥ आदिशते उपदिशति ॥ असतीं मतिं अर्थकामादिमतिं ॥ तमः संसारं ॥ ननु तर्हि सर्वोपि लोको
मामेव किं नोपस[...]रति ॥ अज्ञानादित्याह त्वमिति ॥ प्रियश्चासावीश्वरश्च ॥ अहं तु त्वामेव शरणं यामीत्याह तं त्वामिति ॥ प्रतिबोधनाय उपदेशाय ॥

जनोऽज्ञनस्यादिशतेसतीमतिं यया प्रपद्येत दुरत्ययं तमः ॥ त्वं त्वव्ययं ज्ञानममोघमंजसा प्रपद्यते येन जनो निजं पदं ॥४८॥ त्वं सर्वलोक
स्य सुहृत्प्रियेश्वरो ह्यात्मा गुरुर्ज्ञानमभीष्टसिद्धिः ॥ तथापि लोको न भवंतमंधधीर्जानाति संतं हृदि बद्धकामः ॥४९॥ तं त्वामहं देववरं
वरेण्यं प्रपद्य ईशं प्रतिबोधनाय ॥ छिंध्यर्थदीपैर्भगवन् वचोभिर्ग्रंथीन्हृदय्यान्विवृणु स्वमोकः ॥५०॥ श्रीशुक उवाच ॥ इत्यु
क्तवंतं [...] नृपतिं भगवानादिपूरुषः ॥ मत्स्यरूपी महार्णवे विहरंस्तत्त्वमब्रवीत् ॥५१॥ पुराणसंहितां दिव्यां सांख्ययोगक्रियावतीं
सत्यव्रतस्य राजर्षेरात्मगुह्यमशेषतः ॥५२॥ अश्रौषीदृषिभिः साकमात्मतत्त्वमसंशयं ॥ नाव्यासीनो भगवता प्रोक्तं ब्रह्म सनातनं ॥५३॥

अर्थदीपकैः परमार्थप्रकाशकैः ॥ हृदय्यान् [...] ग्रंथीन् अहंकारादीन् ॥ स्वमोकः स्वरूपं विवृणु प्रकाशय ॥ नृपतिं प्रति पुराणसंहितां मत्स्य ५७
पुराणं अशेषतः अब्रवीदित्यनुषंगः ॥ ७ ॥

णरंतारंपिघ्रतं नरि...

...नैर्मिनं तत्किमयंमदाग्रन्लये

ननु॥ वैराग्यं विना कुतोमुक्तिः॥ तर्हि तस्य त्वत्सेवैकफलत्वात्सेवामादिशेत्याशयेनाह॥ अबुधोयजनः॥ अनुध्ययपाप वतितथाकर्मसमीहते
तोसुखेच्छा॥ नोहृदयपल्लवग्रंथिसन्निधात्॥ यतः सएवपरमोगुरुः॥ ननुयपहारनादिभिः सत्वशुद्धिं विनाकथंग्रंथिभेदः स्यात् तत्राह॥ यस्य
सेवयैवपुंसा नालनोमनसोमलं तमो विजस्यात्॥ अहो नमलः निरं वर्णं स्वस्वरूपमत्रेतसईशो नोगुरुर्भयात्॥ यतः सएवगुरोरपि परमोगु
रुः॥ मलहानेदृष्टांतः॥ रुद्ररोदनं रजतं॥ यद्दरोदानदुद्वस्यरुद्रत्वं यदेवश्रीयत तद्रजतं हिरण्यमभवदिति श्रुतेः॥ ततयथाग्नेःसंपर्का
जनोबुधोयं निजकर्मबंधनः सुखेच्छयाकर्मसमीहतेसुखं॥ यत्सेवयातांविधुनोत्यसन्मतिंग्रंथिंसभिंघाद्धृदयंसनोगुरुः॥ ४३॥ य
त्सेवयाग्नेरिवरुद्ररोदनं पुमान्विजह्यान्मलमात्मनस्तमः॥ भजेतवर्णंनिजमेषसोव्ययोभूयात्सईशः परमोगुरोर्गुरुः॥ ४४॥ नयत्प्रसादायुत
भागलेशमन्येचदेवागुरवोजनाःस्वयं॥ कर्तुंसमेताः प्रभवंतिपुंसस्तमीश्वरंत्वांशरणंप्रपद्ये॥ ४५॥ अचक्षुरंधस्ययथाग्रणीः कृतस्त
थाजनस्याविदुषोबुधोगुरुः॥ त्वमर्कदृक्सर्वदृशांसमीक्षणोवृतोगुरुर्नः स्वगतिंबुभुत्सतां॥ ४६॥

+यत्प्रसादस्यायुतभागस्यलेशमात्रमपि अन्येदेवादयः सर्वेसमेता अपि स्वयं तन्निरपेक्षाः संतः कर्तुं नप्रभवंति॥
+
**नदेवदृष्टांतेनस्पष्टयन्नाह

मलं त्यजति स्ववर्णं भजते न तु क्षालनादिभिः मलत्यागः तथा नयत्क्षालनादिभिर्मलत्यागः किंतु त्वत्सेवयैव तेषां तु सेवांग त्वमेवेति भावः॥ परमेश्वरत्व
परमगुरुत्वं चप्रपंचयन्नाह॥ अचक्षुरिति॥ अविदुषोजनस्याबुधो विद्वान्गुरुस्तथैव च अर्क दृक् प्रकाशकः स्वतएवदृक् कृतांतयस्य सः अर्क दृक्
अतः सर्वदृशां सर्वेंद्रियाणां समीक्षणः प्रकाशकः॥ अतएव स्वगतिं॥ बोद्धुमिच्छद्भिर्नोस्माभिर्गुरुर्वृतोसि॥ ७॥

112

अतीतः पाये मयं मत्स्य...

बोधं हरेरवतारस्तं यः प्रकीर्त्तयेत ॥ पूर्वोयः प्रलयः तस्यावसाने ॥ सत्यव्रतस्य ऋषीणां च ॥ श्रेत्रिणोगच्छंतीति तल्लिंगसमवाया

अतीतप्रलयापाये उत्थिताय स वेधसे ॥ हत्वासुरं हयग्रीवं वेदान्प्रत्याहरद्धरिः ॥ ५३ ॥ सतु सत्यव्रतोराजा ज्ञानविज्ञानसंयुतः ॥
विष्णोः प्रसादात्कल्पेस्मिन्नासीद्वैवस्वतोमनुः ॥ ५४ ॥ सत्यव्रतस्य राजर्षेर्मायामत्स्यस्य शार्ङ्गिणः ॥ संवादं महदाख्यानं श्रुत्वा मुच्येत
किल्विषात् ॥ ५५ ॥ अवतारं हरेर्योयं कीर्त्तयेदन्वहं नरः ॥ संकल्पास्तस्य सिध्यंति स याति परमां गतिं ॥ ५६ ॥ प्रलयपयसि धातुः सु
प्तशक्तेर्मुखेभ्यः श्रुतिगणमपनीतं प्रत्युपादत्त हत्वा ॥ दितिजमकथयद्यो ब्रह्मसत्यव्रतानां तमहमखिलहेतुं जिह्ममीनं नतोस्मि ॥
५७ ॥ यत्पादपद्ममकरंदममंदभाग्याः संतो भजंति न भजंति च मंदभाग्याः ॥ नारायणः स निजपादरजोभिरस्मच्चित्तदर्प्पणतलं
विमलं करोतु ॥ ५८ ॥ इति श्रीभागवते महापुराणे अष्टमस्कंधे [आदिमत्स्यावतारकथनं नाम] चतुर्विंशोध्यायः ॥ २४ ॥ समाप्तोयमष्टमस्कंधः ॥

५८

दङ्कुवचनं ॥ जिह्ममीनं मायामत्स्यं ॥ ॥ इति श्रीभागवतार्थदीपिकायां श्रीधरस्वामिविरचितायां अष्टमस्कंधे चतुर्विंशतितमोध्यायः ॥ ॥

भा.
टी.
५८

114

अष्टमस्कंधः

सणरं तारयिष्यंतं तरिष्यन् भवसागरं ॥ स एवास्माकं गुरुत्वेन तुष्टाव हरिं महीपतिः ॥ १ ॥ अत्रेदं चिंत्यं किमयं महाप्रलयो दैनंदिनो वेति ॥ न तावत् ब्राह्मो
लय इति योऽसावस्मिन्महाकल्पे इति प्राप्तं नेति ब्रूमः महाप्रलये पृथिव्यादीनामवशेषासंभवात् ॥ नापि ब्राह्मी निशायां युक्तिविरोधात् ॥ अतो दै
नंदिन इति युक्तं ॥ न चैतदपि संगच्छते ॥ स्वायंभुवे केऽरन्नादृष्यादिभिर्विना कस्माद् वैवस्वतमेकं नि त्रैलोक्याविनं न हन्यतीति मन्वोक्तेरनुपपत्तेः ॥ यच्चो
क्तं प्रथमस्कंधे रूपं स जगृहे मात्स्यं चाक्षुषांतरसंप्लवे नाव्यारोप्य महीमय्यामपाद्वैवस्वतं मनुमिति तदपि तदा दुर्घटं ॥ नहि प्रलयद्वयेपि म
हीमय्यां नाव्यारोहः संभवति न चाक्षुषमन्वंतरे प्रलयोऽस्ति । तथा च सति सत्यव्रतो मनुर्वैवस्वत इत्यपि दुर्घटं स्यात् ॥ तत्रात्र वदामः सर्वे दुःखादिति

राजोवाच ॥ अनाद्यविद्योपहतात्मसंविदस्तन्मूलसंसारपरिश्रमातुराः ॥ यदृच्छये
होपसृता यमाप्नुयुर्विमुक्तिदो नः परमो गुरुर्भवान् ॥ ४६ ॥ श्रीकृष्णाय नमः ॥ ०

दर्शोऽपि न संगच्छते । नहि तदौषधीनां सत्वानां चावशेषः संभवति ॥ तस्मादन्यथा वर्ण्यते ॥ नैवायं वास्तवः कोपि प्रलयः किंतु सत्यव्रतस्य ज्ञा
नोपदेशाय आविर्भूतो भगवान् वैराग्यार्थमकस्मात्प्रलयमिव दर्शयामास ॥ यथास्मिन्नेव वैवस्वतमन्वंतरे मार्कंडेयाय दर्शितवान् ॥ त
दप्युक्तं लयेव च महाकल्पे स्मिन्निति निरोपणं संगच्छते ॥ तथा च ततः समुद्र उद्वेलः सर्वतः स्मापयन्तेति तस्यैव तथा दर्शनमुक्तमित्यादि कृ
प्रस्तुतं स्तोत्रं व्याचक्ष्महे ॥ तत्र नानायोनिषु संसरतः स्वयमज्ञानात्कृपयैव तस्माद् धिंदुष्टा मुक्तये तमेव प्रार्थयते ॥ अनादीति अनाद्यविद्यया तयोप ५६
हता आवृता आत्मसंविद् येषां ते अत एव विद्यामूलैः संसारपरिश्रमेणातुराः ॥ इह संसारे यदृच्छया यद्वा भवदनुग्रहादेव उपसृताः संतो यं प्राप्नुयुः
तमवाप्य नेव सा ता गुरुः स नः । ग्रंथिं भिंद्यादित्युत्तरेणान्वयः ॥ ४६ ॥

115

ओषधी: आदाय इति शेषः ॥ ऋषीणामेभ्यो लोके विचरिष्यसि ॥ मया अनुगृहीतं प्रसादीकृतं ॥ अपरोक्षं वेत्स्यसि ।

महाहिना वासुकिना

हृदि

116

त्वं तावदोषधीः सर्वा बीजान्युच्चावचानि च ॥ सप्तर्षिभिः परिवृतः सर्वसत्वोपबृंहितः ॥ ३२ ॥ आरुह्य बृहतीं नावं विचरिष्यस्यविक्लवः ॥ वासुकिना
एकार्णवे निरालोके ऋषीणामेव वर्चसा ॥ ३३ ॥ दोधूयमानां तां नावं समीरेण बलीयसा ॥ उपस्थितस्य मे शृंगे निबध्नीहि महाहिना
३४ ॥ अहं त्वामृषिभिः साकं सहनावमुदन्वति विकर्षन्विचरिष्यामि यावद्ब्राह्मी निशा प्रभो ॥ ३५ ॥ मदीयं महिमानं च परं ब्रह्मेति शब्दितं
वेत्स्यस्यनुगृहीतं मे संप्रश्नैर्विवृतं हृदि ॥ ३६ ॥ इत्थमादिश्य राजानं हरिरंतरधीयत ॥ सोन्ववैक्षत तं कालं यं हृषीकेश आदिशत् ॥ ३७ ॥
आस्तीर्य दर्भान् प्राक्कूलान्राजर्षिः प्रागुदङ्मुखः ॥ निषसाद हरेः पादौ चिंतयन्मत्स्यचेष्टितं ॥ ३८ ॥ ततः समुद्र उद्वेलः सर्वतः प्लावयन्म
हीं ॥ वर्द्धमानो महामेघैर्वर्षद्भिः समदृश्यत ॥ ३९ ॥ ध्यायन्भगवदादेशं ददृशे नावमागतां ॥ तामारुरोह विप्रेन्द्रैरादायौषधिवीरुधः ॥ ४० ॥
तमूचुर्मुनयः प्रीता राजन्ध्यायस्व केशवं ॥ स वै नः संकटादस्मादविता शं विधास्यति ॥ ४१ ॥ सोनुध्यातस्ततो राज्ञा प्रादुरासीन्महार्णवे ॥
एकशृंगधरो मत्स्यो हैमो नियुतयोजनः ॥ ४२ ॥ निबध्य नावं तच्छृंगे यथोक्तो हरिणा पुरा ॥ वरत्रेणाहिना तुष्टस्तुष्टाव मधुसूदनं ॥ ४३ ॥

प्रकाशितं

त्वया कृतैः संप्रश्नैर्मया विवृतं सं[illegible] ॥ वरत्रेण उदरकरूपेण ॥ ॐ ॥ ॥ श्रीगोपीजनवल्लभाय नमः ॥ श्रीकृष्णाय नमः ॥